Digitized by eGangotri and Sarayu Trust.

॥ श्रीः ॥

योगयात्रा

श्रीवराहमिहिराचार्यकृता.

ज्योतिषाचार्य पं० श्रीहरिनन्दन-
मिश्रकृतप्रकाशिकाटीकोपेता
महामहोपाध्यायजगद्गुरु-
पं० श्रीः सुधाकरद्विवेदि-
संशोधिता

साचेयम्

प्रकाशिकर्त्रा डायमण्डजुबिलीयन्त्रे मुद्रापयित्वा
प्रकाशिता.

सम्बत् १९६४

अस्या: सर्वेऽधिकारा: प्रकाशयित्रा स्वायत्तीकृता: ।

मूल्यम् १॥) डाकव्यय ।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ श्रीः ॥

योगयात्रा

श्रीवराहमिहिराचार्यकृता.

ज्योतिषाचार्य पं० श्रीहरिनन्दन-
मिश्रकृतप्रकाशिकाटीकोपेता
महामहोपाध्यायजगद्गुरु-
पं० श्री ६ सुधाकरद्विवेदि-
संशोधिता

साचेयम्

प्रकाशिकर्त्रा डायमण्डजुबिलीयन्त्रे मुद्रापयित्वा
प्रकाशिता.

सम्बत् १९६४

अस्याः सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

मूल्यम् १।) डाकव्यय ।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ श्रीः ॥

योगयात्रा

श्रीवराहमिहिराचार्यकृता.

ज्योतिषाचार्य पं० श्रीहरिनन्दन-
मिश्रकृतप्रकाशिकाटीकोपेता
महामहोपाध्यायजगद्गुरु-
पं० श्री १ सुधाकरद्विवेदि-
संशोधिता

साचेयम्

प्रकाशिकर्त्रा डायमण्डजुबिलीयन्त्रे मुद्रापयित्वा
प्रकाशिता.

सम्बत् १९६४

अस्याः सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।


मूल्यम् १॥) डाकव्यय ।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



भूमिका

अथेयं योगयात्रा श्रीमद्वराहमिहिराचार्यरचिता केनाप्यनिर्दिष्टनाम्नाऽग्रजन्मना क्षुधापीडितमनसा कानपुरनगरे कस्यापि वैश्यस्य गृहे ताम्रकर्षद्वयेन विक्रीता अथ च दैववशात्तद्गृह एव कानपुरवासी गौड़वंशावतंस श्रीघासीरामोऽप्यन्यदिने चारुरचनाय राजिकानयनार्थं गतः सोऽपि वणिक् तत्पुस्तकादेव पत्रद्वयमुद्धृत्य पुटीकृत्य तत्रैव राजिकाबन्धनाय प्रवृत्तस्तेन घासीरामेण निवारितः । अहो वणिक् इदं पत्रद्वयं पुस्तकाकारं भाति अतो यदि समग्रं भवेत्तदा सम्यगालोच्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्यापि मौल्यं दास्यामि इति श्रुत्वा वणिक् सर्वं याथातथ्यं पुस्तकागमननिदानमुक्त्वाऽन्यानि सर्वाणि पत्राणि तत्पत्रद्वय-सहितानि तस्मै घासीरामायाददत्। ततोऽसौ स्वगृहं गत्वा सर्वाणि पत्राणि क्रमशो नियोज्य आदितः पुस्तकान्तावधिमख-ण्डितं जर्जरीभूतं षट्त्रिंशदधिकषोडशशत १६३६ सम्वल्लिखितं वि-लोक्य सहर्षं ताम्रकर्षत्रयं हस्ते धृत्वा तद्वैश्यगृहं गत्वाऽकथयत्। अहो वणिक् गृह्यतां स्वपुस्तकमौल्यम्। तेनाऽपि वणिजा सह-र्षेण न गृहीतं मौल्यममौल्यमेव दत्तं पुस्तकमिति। ततोऽन्यदिने घासीरामोऽपि योग्यं योग्याय दातव्यमिति मनसि विचिन्त्य मह्यं दत्वा मद्विद्यार्थिना सार्कं मां प्रार्थयदिति हे गुरो पुस्तकस्यास्य टीकां कृत्वा मुद्रापयित्वा प्रकाश्यतामिति शिवम्। मयकाऽपि तदारभ्य पुस्तकस्यास्य मुद्रणविषयं सटीकमटीकं वेति बहुधा-न्वेषितं परञ्च क्वापि न प्राप्तमतस्तत्प्रभृति पुस्तकस्यास्य विवृति-करणे श्रीमद्गुरुचरणस्मरणमवलम्ब्य तत्परोभूत्वा विवृतिः पूर्णीकृता ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ योगयात्राया विषयानुक्रमणिका ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

इति योगयात्राविषयानुक्रमणिका समाप्ता

Digitized by eGangotri and Sarayu Trust.



श्रीगणेशाय नमः ।

अथ योगयात्रा

प्रकाशिकाटीकोपेता

श्रीगणेशाय नमः ।। त्रिस्कन्धविद्याचतुरो वराहो योऽभूत्पुरा ग्रन्थकृतां वरिष्ठः । तन्निर्मितो जीर्णतरप्रबन्धो घास्यादिरामेण च दैवलब्धः ॥ १ ॥ प्रोत्साहितस्तेन च सर्वशिष्यैर्व्याख्यान्वितं मुद्रणमाशु कृत्वा । प्रकाश्यतां तद्धरिनन्दनोऽहं समुद्यतीभूय करोमि टीकाम् ॥ २ ॥ सिद्धिदं सर्ववस्तूनां गणेशं स्वगुरुं गिरम् । नत्वा करोमि विवृतिं योगयात्राभिधस्य च ॥ ३ ॥ अथ करतलामलकीकृतसकलज्योतिर्विद्यः श्रीमद्वराहमिहिराचार्यो योगयात्राभिधग्रन्थं चिकीर्षुश्चिकीर्षितार्थनिर्विघ्नपरिसमाप्त्यर्थं चतुर्वर्गफलदातृपितृभ्य आदित्यदासेभ्यो भूसूर्येभ्यः स्वगुरुभ्यः स्वाशीर्वादप्रार्थनरूपं मङ्गमाचरतीति ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यश्चक्षुर्जगतः सहस्रकरवद्धाम्नां च जन्मार्कवन्-
मोक्षद्वारमपावृतं च रविवद्ध्वान्तान्तकृत्सूर्यवत् ।
आत्मा सर्वशरीरिणां सवितृवत्तिग्मांशुवत्कालकृत्-
साध्वीं नः स गिरं करोतु सविता योऽन्यैरतुल्योपमः॥१॥

यश्चक्षुर्जगत इति॥ स सविता मत्पिता गुरुराचार्य आदित्यदास आदित्यस्य दिवि सूर्यस्य दासस्तद्भक्त अतएव तद्भक्तत्वात् तद्गुणशालित्वाच्च तदात्मको भुवि सूर्यः (आदित्यदासतनयस्तदवाप्तबोध इतिबृहज्जातकोल्लेखात्) नोऽस्माकं साध्वीं समीचीनां गिरं वाणीं करोतु । किंविशिष्टो मत्पिता आदित्यदासो यो जगतःसंसारस्य चक्षुर्नेत्रम् । ज्योतिःशास्त्राणां वेदचक्षुस्त्वात् तज्ज्ञाता तत्प्रतिपादयिता तच्छास्त्रकर्ता कारयिता च तथाविध इत्यतो युक्तम् (यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते मनीषिण इति) अतः शास्त्रारम्भे गुरुरेवार्थप्रकाशक अतः स एव स्तुत्य इति क इव सहस्रकरवत् सहस्रमनन्तं करो यस्येति तथा स सूर्यस्तद्वादिति पुनर्धाम्नां ज्ञानभास्करकिरणानां जन्मोत्पादकः क इवार्कवदिति सूर्यवत् पुनर्विशिनष्टि इह भुवि मोक्षद्वारमनेनैरापावृतं न आवृतमित्यपावृतमप्युद्रितम् । अर्थान्मुक्तिपदप्रवेशपदवीकपाटमनेनैव मत्पित्रा सवित्राऽ मुद्रितमुद्घाटितमिति । क इव रविवदिति सूर्यवत् यथोक्तम् द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति॥ पुनर्ध्वान्तान्तकृत् ध्वान्तमज्ञानतिमिरं तदन्तकृत्प्रकाशकः । क इव सूर्यवदिति व्यक्तम् । सर्वशरीरिणां सकलजन्तूनामात्मा आत्मवित्त्वादिति क इव सवितृवत् सूर्यवत् (सूर्य आत्मा जगतस्तस्थुषश्चेति) कालकृत् समयावबोधकः (कैः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वरचितानेकयन्त्रैः) क इव तिग्मांशुवत् सूर्यवदिति स्पष्टम् । अत एव योऽन्यैःसूर्यभिन्नैरतुल्योपमः । अर्थाद्यस्मिन् आदित्यदासे भुवि सूर्ये दिवि सूर्यस्यैवोपमा घटते नान्यस्येति शिवम् ॥ १ ॥

अथ विशेषयात्रासमयकथनाय विदिताविदितजन्मानं
स्वगुणालङ्कृतराजानमुररीकृत्योच्यते ।

वक्ष्यामि भूपमधिकृत्य गुणोपपन्नं
विज्ञातजन्मसमयं प्रविभक्तभाग्यम् ।
अज्ञातसूतिमथवा विदितैष्यभाग्यं
सामुद्रयात्रिकनिमित्तशतैः पृथूक्तैः ॥ २ ॥

वक्ष्यामीति ॥ गुणोपपन्नं गुणैः सन्धिविग्रहादिषड्गुणैरुपपन्नं सम्पन्नं भूपं राजानमधिकृत्य प्रधानीकृत्य किं विशिष्टं विज्ञात जन्मसमयं विज्ञातो जन्मसमयो जन्मकालो यस्येति तथा तम् पुनर्विशिनष्टि प्रविभक्तभाग्यं प्रकर्षेण विभक्तानि भाग्यानि यस्येति तथा तमथवाऽज्ञातसूतिमविदितजन्मानमथवाऽविदितैष्यभाग्यमज्ञातभाविभाग्यं पृथूक्तैर्विस्तरोक्तैः सामुद्रयात्रिकनिमित्तशतैः समुद्रे भवं सामुद्रं चिह्नं शुक्तिकमलादि यात्रायां भवं यात्रिकं तयोर्द्वन्द्व इति तथा तत्र उक्तानि शुभाशुभसूचकानि शकुनशतानीति तथा तैः सामुद्रयात्रिकनिमित्तशतैर्वक्ष्यामि कथयिष्यामि यात्रासमयमिति शेषः ॥ २ ॥

तत्रादौ दैवं विशदीकृत्य दृष्टान्तेन पुरुषदैवस्य प्राधान्यं दर्शयति ।

कर्म्मान्यजन्मजनितं सदसच्च दैवं तत्केवलं
भवति जन्मनि सत्कुलाद्ये । बाल्यात्परं विनय-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सौष्ठवपात्रता च पुंदैवजा कृषिवदित्युपपाद्य-
मेतत् ॥ ३ ॥

कर्म्मान्यजन्मजनितमिति ॥ अन्यजन्मजनितं पूर्वजन्मकृतं सच्छुभमसदशुभं कर्म तदेव दैवमिह कथ्यते तथाच प्राग्जन्मनि कृतं कर्म शुभं वा यदिवाऽशुभं दैवशब्देन निर्द्दिष्टमिह जन्मनि तद्बुधैरिति तत्केवलं तदेव दैवं केवलं प्रधानं सत्कुलाद्ये जन्मनि भवति अर्थादन्यजन्मनि सत्कर्मकृतं सत्कुले जन्म भवति असत्कर्म-णाऽसत्कुले जन्म मिश्रकर्मणा मध्यकुले बाल्यात्परं बालभावाद-नन्तरं विनयसौष्ठवपात्रता विनयोऽतिदाक्षिण्यम् सुष्ठुभावः सौष्ठ-वम् तयोर्द्वन्द्वो विनयसौष्ठवे तयोः पात्रमिति विनयसौष्ठवपात्रं तस्य भाव इति तथा पुंदैवजा पुंसो दैवं तस्माज्जाता पुंदैवजा भवति इति हेतोः कृषिवत् क्षेत्रधान्यवत् एतदुपपाद्यम् यथा सुजनसु-बीजसुक्षेत्रसुसंस्कारतः सुधान्योत्पत्तिर्भवति तथैवोपपादनीयमिति ३

अथ पौरुषदैवप्राधान्यं दर्शयति ।

सामन्तकालवसुधोद्यममन्त्रभृत्यै-
दैवेन चेति कृषिवन्नृपतेः फलाप्तिः ।
स्याच्छिद्रमेकमपि चेत्तत एव सर्व्वं
नाशं प्रयाति हि हतेः स्रवणादिवाम्भः ॥ ४ ॥

सामन्तकालवसुधोद्यममन्त्रभृत्यैरिति ॥ सामन्तकालवसुधोद्यममन्त्र-भृत्यैः सामन्तोमाण्डलिकः कालःसमयः वसुधा भूमिरुद्यम उद्योगो मन्त्रो विचारः भृत्यः सेवकस्तैःपौरुषैरित्यर्थः दैवेन च कृषिव-न्नृपते राज्ञः फलाप्तिः कार्य्यसिद्धिर्भवति यथा सुजनसुसमयसु-भूमिसुद्यमसुविचारसुसेवकदैवेन च सुखेन सुधान्योत्पत्तिर्भवति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथैव राज्ञः कर्मसिद्धिरिति एकमपि छिद्रं चेदन्यथा स्यात् तत एव तस्मादेव सर्वं कार्यं नाशं प्रयाति गच्छति दृतेः चर्मपात्रस्य स्रवणात् परिस्रवादम्भो जलमिव नाशं प्रयातीति ॥ ४ ॥

अथ केवलं पौरुषमेव कार्यफलसाधने निदानं न भवतीत्याह

ग्रहर्क्षतिथ्युद्गमराशिहोराद्रेक्काणभागाद्यनुकूलमात्रम्
भवेद्धियासोर्यदि सिद्धिहेतुः स्वयं भवेद्दैवविदेव राजा ५

ग्रहर्क्षतिथ्युद्गमराशिहोराद्रेक्काणभागाद्यनुकूलमात्रमिति ॥ ग्रहर्क्षतिथ्युद्गमराशिहोराद्रेक्काणभागाद्यनुकूलमात्रमेव यदि यियासोर्जिगमिषोः सिद्धिहेतुर्भवेत् तदा स्वयं दैवविदेव राजा भवेत् ग्रहः सूर्यादि । ऋक्षं नक्षत्रमाश्विन्यादि तिथिः प्रतिपदादि उद्गमो लग्नं राशिः मेषादिः । होरा राश्यर्द्धमथवा कालहोरा । द्रेक्काणो राशित्रिभागो भागो नवमांशोऽह्यादिपदेन सप्तमांशद्वादशांशादयः। एतेषामनुकूलमात्रं तत्तत्कार्य्येषु यथाविहितापन्नमेव सिद्धिहेतुस्तत्तत्कार्य्यसंपादककारणं यदि भवेत् तदा स्वयं स्वयमेवात्मनैव दैवविज्ज्योतिर्विद्राजा भवेत् ॥ ५ ॥

अथ पुनस्तदेव द्रढयति सदृष्टान्तकम् ।

मन्त्राभिषेकमणिबन्धनशान्तिकर्म-
होमोपवाससुरयागजपादिमात्रम् ।
स्यात्सिद्धिहेतुरथ चेद्विजिगीषतोर्नु
कस्मात्तदा नरपतिर्न भवेत्पुरोधाः ॥ ६ ॥

मन्त्राभिषेकमणिबन्धनशान्तिकर्म्मेति ॥ मन्त्राभिषेकमणिबन्धनशान्तिकर्म्महोमोपवाससुरयागजपादिमात्रं अथ चेद्यदि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अरीन् प्रतिविजगीषतःजेतुमिच्छतः सिद्धिहेतुः स्यात् मन्त्रो दीक्षा अभिषेको राज्याभिषेको मणिबन्धनं मणिधारणं शान्तिकर्म्म विनायकादिशान्तिर्होमो हवनम् उपवासश्चान्द्रायणादिव्रतम् सुरयागो दर्शपौर्णमासादियज्ञो जपो गायत्र्यादिमन्त्रजप आदिशब्देन विविधदेवाराधनम् एतदेव नतुदैवमित्यर्थः शत्रून् प्रति जेतुमिच्छोः सिद्धिहेतुः सिद्धिदायको भवेत्तदा कस्मात्कारणात्पुरोधाः पुरोहितो मन्त्रादिकर्म्मकारयिता नरपतिर्न्नराणां पतिर्न्नरपती राजा कथं न भवेत् ॥ ६ ॥

अथ येषां राज्ञां धनजनबाजिगजाद्यपेक्षा न भवेत्तेषामेते स्वादरं न कुर्य्युरित्याह ।

बुधार्थशास्त्राण्यपि मन्त्रिणोऽपि
कुर्युः प्रणामं न नरेश्वराणाम् ।
यद्याभिजात्यद्विपबाजिपत्ति-
कोशाद्यपेक्षा न भवेत्प्रधाना ॥ ७ ॥

बुधार्थशास्त्राण्यपि मन्त्रिणोऽपि नरेश्वराणां प्रणामं न कुर्युः बुधो ज्ञानी अर्थः प्रयोजनवान् शास्त्रं शास्त्री एतेऽपि मन्त्रिणः सचिवा अपि प्रणामं प्रकर्षेण नमनमिति तथा नरेश्वराणां, राज्ञां न कुर्युः यदि आभिजात्यद्विपबाजिपत्तिकोशाद्यपेक्षा प्रधाना न भवेत्तर्हि अर्थात् परिजनगजाश्वदूतवस्तुचयादीनां प्रधाना मुख्याऽपेक्षा न चेदिति ॥ ७ ॥

अथ गजबाजिधनादिके सत्यपि यः सूद्यमं न करोति स विनश्यतीत्याह ।

स्वदेशे सन्तुष्टः करितुरगकोशे सति न यो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भवेद्यायी सैन्यैः कृतपरिभवो याति विलयम् ।
स्वचक्रेणैवासौ क्षपितधनराष्ट्रो भवति वा
गतो यो नादत्ते सुनयचरितो नीतिविधुरान् ॥८॥

यः करितुरगकोशे गजाश्वधनसमूहे सति विद्यमानेऽपि स्वदेशे आत्मदेशे सन्तुष्टः सम्यक् तुष्टो भवेत् स सैन्यैः परसैन्यैः कृतपरिभवः तिरस्कृतः विलयं विशेषेण लयं नाशं याति प्राप्नोति वा स्वचक्रेण स्वमण्डलेनैव क्षपितधनराष्ट्रो भवति । अर्थात् स्वदेशीयजनैरेव तिरस्कृतीभूय धनदेशाभ्यां रहितो भवति । वा यः सुनयचरितः शोभननीतिचारी गतः परदेशं जयार्थं गत्वाऽपि नीतिविधुरान् नीतौ रणनये ये विधुराः कष्टाः तान्न आदत्ते न गृह्णाति अर्थात् नीतिपूर्वकरणक्लेशान् न स्वीकरोति सोऽपि विलयं याति ॥ ८ ॥

अथ कालस्थलयोर्बलाबलमाह ।

उलूकस्य ध्वाङ्क्षो निशि बलिभुजां सोऽन्हि वशगः
स्थले नक्रं सिंहो मृगपमुदके हन्ति जलजः ।
अबुद्ध्वा यः कालं व्रजति नृपतिर्देशमथवा
हते दर्प्पे वाक्यं स्मरति विदुषां सोऽरिवशगः ॥९॥

निशि रात्रौ ध्वाङ्क्षः काको उलूकस्य पेचकस्य वशगो वश्यो भवति । अह्नि दिने सोऽप्युलूको बलिभुजां काकानां वशगो भवति । स्थले भूमौ सिंहो नक्रं ग्राहं हन्ति नाशयति उदके जले जलजो ग्राहो मृगपं सिंहं हन्ति । यो नृपती राजा कालं समयमबुद्ध्वाऽज्ञात्वा व्रजति गच्छति अथवा देशंस्थलं अज्ञात्वा व्रजति ततो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दर्पे सामर्थ्ये हते नष्टे सत्यरिवशगः शत्रुतिरस्कृतो हि पश्चात्तापेन विदुषां पण्डितानां वाक्यं कथनं स्मरतीति ॥ ९ ॥

अथ वशीकृतशत्रुवर्गेणापि पौरुषं न त्याज्यं त्यागे हानिं दर्शयति ।

रिपोः कृत्वाऽवज्ञां जितमिति विदित्वा मदबला-
न्न यत्नो हातव्यः शिखिविषसमोऽल्पोपि हि रिपुः ।
प्रमत्तोऽद्रेः कुञ्जादयुतबलभागैरपि नरै-
र्हतो बद्धस्तम्भे कषति मदलेखां द्विपपतिः ॥१०॥

रिपोः शत्रोरवज्ञामनादरं कृत्वा मदबलादहङ्काराज्जितमिति विदित्वा ज्ञात्वा यत्न उद्योगो नहातव्यो न त्याज्यः । अल्पोऽपि स्वस्मान्न्यूनोपि रिपुः शत्रुर्हि यतः शिखिविषसमो भवति बाण-विषतुल्यो भवति । लघुरपि बाणो वह्निः संस्पृश्यान्तर्नाशयति । प्रमत्तो मदान्धोऽपि द्विपपतिर्हस्तीन्द्रः पर्वतस्य कुञ्जात् वनविशेषात् अयुतबलभागैरनेकवीर्यविभागैर्नरैर्मनुजैर्हतः स्तम्भे दृढकाष्ठे बद्धो मदलेखां कपोलपालीं कषति घर्षते अर्थाद्बन्धनमोचनायचेष्टा विशेषं करोतीति ॥ १० ॥

अथ दुर्गघटनरक्षणलक्षणविधानपूर्वकशुद्धपार्ष्णी राजा परराष्ट्रं गच्छेदित्याह ।

वप्रप्राकारयन्त्रप्रहरणपरिखातोयमेयेन्धनाढ्यं
दुर्गं कृत्वात्मगुप्तं द्विपतुरगभिषक्शिल्पविप्राभ्युपेतम् ।
लुब्धत्रस्ताभिमानिप्रकुपितकृभृतां ज्ञातशीलैर्विहीनं
कृत्वा शूराप्तसंस्थं परविषयमियाच्छुद्धपार्ष्णिर्नरेन्द्रः ११

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वप्रप्राकारयन्त्रप्रहरणपरिखातोयमेयेन्धनाढ्यं दुर्गं कृत्वा । वप्रः परिखोद्धृतमृत्कूटः । वा प्राकाराधारः । प्राकारो यष्टिकराटकादिरचितवेष्टनम् । यन्त्रं यत्यतेऽनेनेति यन्त्रम् । प्रहरणं शस्त्रं शतघ्न्यादि । परिखा खेयम् । तोयं जलम् । परिखया तोयमिति तथा मेयं मातुं योग्यमिन्धनं काष्ठं जलोत्तारककाष्ठं सेतुर्वा जलोद्धारककाष्ठसेतुरेतैराढ्यं युक्तं दुर्गं दुर्गमस्थानं [लोकेकिलां] रचयित्वा पुनः किं विशिष्टम् । आत्मगुप्तमात्मीयजनैर्गुप्तं रक्षितम् । पुनर्विशिनष्टि द्विपतुरगभिषक्शिल्पिविप्राभ्युपेतम् । गजाश्ववैद्यकारुब्राह्मणयुक्तम् । पुनर्लुब्धत्रस्ताभिमानिप्रकुपितकुभृताम् । अर्थात् लोलुपकातर्य्यहङ्कार्य्यतिक्रोधितदुष्टराज्ञां ज्ञातशीलैः परिचितचरितैर्विहीनं विशेषेण हीनं वर्जितम् । लुब्धादीनां ये परिचितास्तैरपि हीनम् । शूराप्तसंस्थं कृत्वा शूरा भटा आप्ताः विश्वास योग्यास्तैः संस्थं सुरक्षितं दुर्गं कृत्वा नरेन्द्रः पराविषयं परस्य शत्रोर्विषयं देशं ईयाद्गच्छेत् । कीदृशो नरेन्द्रः शुद्धपार्ष्णिः शुद्धा अकुटिलाः पार्ष्णयः पार्श्ववर्त्तिनो यस्य सतथा ।

अथपरराष्ट्रं गत्वा किङ्कर्तव्यमित्याह ।

बुद्ध्वा शक्तिं स्वपरबलयोः सामभेदप्रदानैः
कृत्वोपायैर्व्यसनसमरोपायसंरक्षणैश्च ।
भक्त्या साधून् धनविरहितानर्थलुब्धांश्च दानै-
र्नैयाद्भेदैस्त्रिभिरपि न ये साधयेत्तांश्च दण्डैः ॥ १२ ॥

स्वपरबलयोः स्वशत्रुसैन्ययोः शक्तिं बलं बुद्ध्वा कैरिति सामभेदप्रदानैः साम शान्तिः भेदउपजापः । प्रदानमतिदानम् । एतैः कृत्वा पुनर्व्यसनसमरोपायसंरक्षणैरुपायैः । व्यसनं दुरभ्यासः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समरोपायः संग्रामविधिः । संरक्षणं सम्यक्रक्षणमेतैः । उपायैश्च भक्त्या सेवया साधून् साधुजनान् नेयाद्वशं कुर्यात् धनविरहितान् दरिद्रान् च पुनरर्थलुब्धान् धनलोलुपान् दानैर्नयात् एवं सामभिर्दानैर्भेदैश्च वशं नेयात् । एतैस्त्रिभिरपि ये वशं नईयुस्तान् दण्डैर्वशं साधयेत् कुर्यात् ॥ १२ ॥

अथ सामदण्डादिनाथग्रहकथनपूर्वकतत्सिद्धिं कथयति ।

साम्नो जीवः सभृगुतनयो दण्डनाथौ कुजार्कौ
दानस्येन्दुः शिखियमबुधाः सासुरा भेदनाथाः ।
वीर्योपेतैरुपचयकरैर्लग्नगैर्वीर्यगैर्वा
तत्तत्सिद्धिं व्रजति तदहः स्वांशकैर्वापि तेषाम् ॥ १३ ॥

सभृगुतनयः शुक्रसहितो जीवो गुरुः साम्नः शान्तेर्नाथः स्वामी । कुजार्कौ मंगलसूर्यौ दण्डनाथौ दण्डस्वामिनौ भवतः । इन्दुश्चन्द्रो दानस्य नाथो भवति । शिखियमबुधाः सासुरा अर्थाद्राहुसहिताः केतुशनिबुधा भेदनाथा भवन्ति । वीर्योपेतैर्वीर्ययुक्तैरेतैः सामदण्डादिनाथैरुपचयकरैर्वर्धिष्यमाणकिरणैः लग्नगैर्लग्नप्राप्तैः । वा वीर्यगैर्बलिष्ठैस्तत्तत्सिद्धिं सामदण्डादिकार्यसिद्धिं राजा व्रजति प्राप्नोति वा तदहः तद्दिने सामादिस्वामिनां दिने वा सिद्धिं व्रजति । वापि तेषां स्वामिनां स्वांशकैर्नवमांशैः सिद्धिं व्रजति ॥ १३ ॥

अथ सन्धिविग्रहादिषड्गुणघटितकृत्यमाह ।

षाड्गुण्ये सन्धिरादौ परिपणरचितो विग्रहोऽस्यापकारी नैतौ चेदासनं तत्परपुरगमनं सर्वसैन्येन यानम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सैन्यार्द्धेनाभियुंक्ते परपुरमपि यत्तद्द्विधा यानमुक्तं
संश्लेषोऽन्यत्र यः स्यात्स खलु निगदितः संश्रयो-
ऽन्योगुणानाम् ॥ १४ ॥

षाड्गुण्ये षड्गुणस्य सन्धिविग्रहादिकस्य कर्म्म व्यापारः षाड्गुण्यं तस्मिन्। आदौ प्रथमतः सन्धिर्मेलकः कार्य इति परिपणरचितो दुराग्रहेण कृतो विग्रहो विवादो राज्ञोऽपकारी विकारी भवति। एतौ सन्धिविग्रहौ चेद्यदि न भवतस्तदासनं गमनाय मन्त्रिसभा विधेयम्। तत्परपुरगमनं तत्पश्चादासनादनंतरं शत्रुनगरगमनं शत्रुस्थानयात्रा सर्वसैन्येन यानं सकलसैन्यसहितं यात्रेति सैन्यार्द्धेन सेनादलेनापि परपुरं शत्रुपुरमभियुंक्ते एतद्यत्ताद्द्विधा द्विप्रकारकं यानमुक्तं कथितम् अन्यत्र गुणानां संश्लेषः यः स्यात्स-खलु गदितः गुणानां सन्धिविग्रहयानादीनां मध्ये संश्रयः समाश्रयः। बलिना शत्रुणा पीडितः सन् बलवदाश्रयणं निगदितः॥ यथोक्तमाचार्य्यैः॥ सन्धिर्न्ना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणा इति॥ सन्धिः सन्धानं स्वर्णादिना शत्रूणां प्रीत्युत्पादनमिति। परमण्डले दाहलुण्ठनादिग्रहणं विग्रहः। शत्रुं प्रति विजिगीषोर्गमनं यानं शक्तिप्रतिबंधे सति कालं प्रतीयादिति दुर्गादिकं निर्म्माय तत्रावस्थानमासनम्। बलिना सह सन्धिः। अबलेन सह विग्रह इति प्रकारद्वयं द्वैधम्। अरिणा पीड्यमानस्य बलवद्भूपालाद्याश्रयणं आश्रयः। एतेषां भेदास्तु कामन्दकीयादौ द्रष्टव्या इति॥ १४॥

अथ समयभेदवशेनाक्रन्दपौरादिसंज्ञाग्रहानाह।

मध्यान्हेऽर्कस्तुहिनकिरणो नित्यमाक्रन्दसंज्ञः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पौरः पूर्वे भवति दिनकृद्यायिसंज्ञोऽन्त्यसंस्थः ।
जीवः सौरिस्तुहिनकिरणस्यात्मजश्चेतिपौराः
केतुर्यायी सभृगुजकुजः सिंहिकानन्दनश्च ॥१५॥

मध्याह्नेऽर्क इति ॥ मध्याह्ने दिनार्द्धसमयेऽर्कः सूर्य आक्रन्दसंज्ञो नेता भवति । तुहिनकिरणश्चन्द्रो नित्यमहर्निशमाक्रन्दसंज्ञो भवति । पूर्वे पूर्वाह्णे दिनकृत्सूर्यः पौरो ग्राम्यो जनो भवति । अन्त्यसंस्थोऽपराह्णसंस्थो यायिसंज्ञो भवति । गमनशीलो गन्ता भवति । जीवो बृहस्पतिः । सौरिः शनिस्तुहिनकिरणस्यात्मजो बुधश्चेति पौरा नित्यं भवन्ति । केतुर्यायी भवति । किम्विशिष्टः सभृगुजकुजः शुक्रमंगलसहितश्चशब्दाद्यायी सिंहिकानन्दनो राहुरपि भवति ॥ १५ ॥

अथाक्रन्दपौरादिग्रहबलाबलवशेनकर्तव्यान्याह ।

यानं यायिभिरासनं शुभकरैर्वीर्यान्वितैर्नागरै-
र्द्वैधीभावमियाद्यदा शुभकराः पौराः सयायिग्रहाः ।
सौम्यैः सन्धिरसद्ग्रहैश्च बलिभिर्युद्धेऽनुकूलैर्जयः
सर्वैरप्यशुभप्रदैर्नरपतिर्दैवान्वितं संश्रयेत् ॥१६॥

यानं यायिभिरिति ॥ यायिभिर्यायिसंज्ञैः शुभकरैरुपचितकिरणैर्बलयुतैर्ग्रहैर्यानं गमनं विधेयम् । यदा पौराः पौराख्यग्रहा अशुभकराः । अनुपचितकिरणा निर्बलाश्च सयायिग्रहाः यायिग्रहसहितास्तदा द्वैधीभावं विग्रहोत्पादकं कर्म्म इयात् प्राप्नुयात् । सौम्यैः शुभग्रहैर्वीर्यान्वितैः सन्धिर्मेलको विधेयः । असद्ग्रहैः पापैर्बलिभिर्बलयुतैरनुकूलैः संमुखस्थैर्युद्धे जयः स्यात् । सर्वैः शुभा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुभग्रहैरशुभमर्दैरशुभफलदायकैर्दैवान्वितं दैवयुक्तं राजा संश्रयेत् संसेवेत ॥ १६ ॥

अथ धनप्रशंसामाह ॥

कोशो हि राज्यतरुमूलमतोऽस्य शाखाः
पक्षी विपक्ष इव किं निधनः करोति ।
अन्नादिवेन्द्रियगणो वसुतस्तथान्नं
तत्प्राप्तिरक्षणविवृद्धिषु यत्नवान् स्यात् ॥ १७ ॥

कोशो हि राज्यतरुमूलमिति ॥ हि यतः कोशो धनागारो राज्यतरुमूलं राज्यरूपवृक्षस्य मूलं भवति। अतोऽस्य तरोः शाखाः समुचिताः । निधनो धनरहितो राजा विपक्षः पक्षाभ्यां रहितः पक्षीव किं करोति । नासौ परराष्ट्रादिगन्तुं क्षमो भवति। अन्नादिन्द्रियगणइव । यथान्नादेवेन्द्रियगणो भवति । तथा वसुतो धनतोऽन्नं भवति । अतस्तत्प्राप्तिरक्षणविवृद्धिषु धनचयाप्तिस्थितिविवर्द्धनेषु यत्नवान् तत्परः स्यात् भवेद्राजेति ॥ १७ ॥

अथ यैरुपायैर्धनास्थितिर्भवति तानाह ।

नीचाचिराढ्यनृपवल्लभतस्करेभ्यो
राष्ट्रं नृपेण परिरक्ष्यमतोऽस्य कोशः ।
काले करप्रणयनं च यथोचितानां
तन्नार्थयेद्भवति येन जनापवादः ॥ १८ ॥

नीचाचिराढ्यनृपवल्लभतस्करेभ्य इति॥नीचो दुराचारी । अचिराढ्यो नूतनधनी । नृपवल्लभः परराजप्रियः तस्करश्चौरः । एतेभ्यो राष्ट्रं देशो रक्ष्यं रक्षणीयमतः कारणादस्य कोशो धना-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गारो भवति । काले समये प्राप्ते यथोचितानां दुष्टशिष्टमिश्र जनानामनुचितकर्मकारिणां करप्रणयनं बलिग्रहणं दण्डं च कार्य्यं तन्नार्थयेत् न याचेत येन जनापवादो लोके भुवने चापवादोऽपकीर्त्तिर्भवेदिति ॥ १८ ॥

अथ यात्रासमयमाह ।

यात्रा नृपस्य शरदीष्टफला मधौ च
छिद्रे रिपोर्न नियमोऽस्ति तु केचिदाहुः ।
छिद्रेऽप्यरेर्भवति दैवयुतस्य सिद्धिः
सामान्यमामिषमिदं प्रतिभूमिपानाम् ॥ १९ ॥

यात्रा नृपस्येति ॥ शरदि शरदृतौ नृपस्य राज्ञो यात्रा इष्टफलाऽभिमतफलदा भवति । चशब्दान्मधौ बसन्तर्त्तावपि इष्टफला भवति । रिपोः शत्रोश्छिद्रे व्यसने नियमः समयनियमः कालप्रतीक्षणं न इति केचिदाहुः । अरेः शत्रोश्छिद्रेऽपि विपद्यपि दैवयुतस्य सुप्रारब्धान्वितस्य राज्ञः सिद्धिः कार्य्यसिद्धिर्भवेत् । प्रतिभूमिपानां विपक्षराजानां सामान्यमामिषं दुष्टभक्ष्यमिदं ज्ञेयम् ॥ १९ ॥

अथ दैवहीनयुक्तस्य कर्त्तव्यमाह ।

शत्रोर्वधाय सचिवं शुभदैवयुक्त-
माज्ञापयेन्नृपतिरात्मनि दैवहीने ।
जह्यान्न चार्थमतिदैवपरोऽपि भूत्वा
दृष्टे द्विपे द्विपपदाऽनुसृतिः किमर्थम् ॥ २० ॥

शत्रोर्वधायेति ॥ आत्मनि स्वस्मिन् दैवहीने सुप्रारब्ध-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रहिते सति नृपती राजा शुभदैवयुक्तं सुप्रारब्धशालिनं सचिवं मंत्रिणं शत्रोर्विधाय शत्रुमारणायाज्ञापयेत्। अतिदैवपरोऽपि सुप्रारब्धयुक्तोऽपि भूत्वाऽर्थं धनं न जह्यात् न त्यजेत। द्विपे गजे दृष्टे दृग्गोचरे सति द्विपपदानुसृतिगर्जचरणानुसरणं किमर्थं कथमिति २०

अथ सुसमयेनैव सिद्धिमाह।

कालोऽभ्युपैति सकृदेव नरं कथंचि-
त्प्राप्नोति तन्न समयं खलु कालकांक्षी।
कालेन गोचरगताननपेक्ष्य भक्ष्या-
न्मन्दक्रमोऽप्यजगरः समुपैति सिद्धिम्॥ २१॥

कालोऽभ्युपैतीति॥ कालः सुसमयः नरं मनुष्यं प्रति कथंचित् केनापि प्रकारेण सकृदेवैकवारमेवाभ्युपैत्यभ्युपागच्छति। तत्समयं सुसमयं कालकांक्षी पुमान् न प्राप्नोति। येन समयेन तत्क्षणमेव सिद्धिर्भवेदिति। ननु समयस्यैव सिद्धिकरत्वं कुत इत्यत आह कालेनेति। गोचरगतान् दृक्पथगतान् भक्ष्यान् खाद्यान् अनपेक्ष्योपेक्ष्य मन्दक्रमोऽपि स्वल्पगाम्यप्यजगरः सर्पविशेषः कालेन समयेन सिद्धिं भोजनप्राप्तिरूपां समुपैति सम्यक् प्राप्नोति॥ २१॥

अथ पुनः समयं प्रशंसयति।

दुर्गस्थितं फलमपक्वमनल्पयत्नात्
संसिद्धमप्युपकरोति गुणं न पुंसाम्।
साधारणं स्वपतितं च भवेद्यतोऽतः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कालेऽभियुक्तपतितं रसवत्सुखाय ॥ २२ ॥

इति श्रीवराहमिहिरकृतायां योगयात्रायां दैवपुरुषाकारा-
ध्यायः प्रथमः ॥ १ ॥

दुर्गस्थितमिति ॥ दुर्गस्थितं दुःखेन गन्तुं शक्यंदुर्गमशक्यस्थानं तत्र स्थितं फलमपक्कं पाकरहितमनल्पयत्नाद्बहुयत्नात्संसिद्धमपि सम्यक् पक्कमपि पुंसां नृणां गुणं प्रति नोपकरोति नत्वुपकारभावं प्राप्नोति । साधारणमयत्नलभ्यं स्वपतितं स्वेनैव पतितं फलं यतो भवेत्तत्त्वस्तस्मात्कारणात्काले सुसमयेऽभियुक्तपतितं रसवद्रसयुक्तं सुखाय भवतीति ॥ २२ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां
दैवपुरुषाकाराध्यायः प्रथमः

अथाचाराध्यायो व्याख्यायते तत्रादौ दोषरहितस्यैव
गन्तुर्लग्नादिगुणं सम्यग्भवतीत्याह ।

रक्तासिताद्या हि यथाम्बरस्य
वर्णाः सितस्यैव भवन्ति सम्यक् ।
विलग्नतिथ्यादिगुणास्तथैव
विशुद्धदोषस्य भवन्ति यातुः ॥१॥

रक्तासिताद्याहीति ॥ यथा सितस्यैव शुक्लस्यैवाम्बरस्य वस्त्रस्य रक्तासिताद्या रक्तकालादिवर्णाः सम्यक् भवन्ति तथैव विशुद्धदोषस्य दोषाद्विशुद्धस्य दोषरहितस्यैव यातुर्गन्तुर्विलग्नतिथ्यादिगुणाः सम्यक् भवन्ति यथार्थफलदाः सन्तीति । एतेन सितवस्त्रोपरि यथा रक्तकृष्णाद्येकैकवर्णाः सम्यक् भवन्ति तथैव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तद्वदेव दोषरहितस्यैव पुरुषस्य लग्नतिथ्याद्येकैकगुणा यथोक्त फलदा न त्वन्यस्य दोषशालिनो दोषादोषयुक्तस्यवेति ॥ १ ॥

अथ पुम्व्यसनान्याह ।

मद्याङ्गनावादितनृत्यगीता-
न्यक्षावृथाद्यामृगयाद्युनिद्रा ।
परोक्षनिन्देतिच कामजानि
दशैव विन्द्याद्व्यसनानि पुंसाम् ॥ २ ॥

मद्याङ्गनावादितनृत्यगीतानीति ॥ मद्याङ्गनावादितनृत्यगीतानि सुरास्त्रीवाद्यनाट्यगानानि। अक्षा द्यूतादिक्रीडा । वृथाद्या व्यर्थं पापकर्म व्यर्थं मृगया पश्वादीनां हिंसा । व्यर्थं द्युनिद्रा दिवास्वापः । परोक्ष कस्यापि निन्दा । इति दश कामोत्पन्नानि पुंसां नराणां व्यसनानि विन्द्याज्जानीयादिति ॥ २ ॥

अथाष्टविधदूषणमाह ।

वाक्पारुष्यं दण्डपारुष्यमीर्ष्या
द्रोहोऽसूया पैशुनं साहसं च ।
अर्थस्योक्तं दूषणं चाष्टसंख्यं
क्रोधोद्भूतो वर्ग एष प्रदिष्टः ॥ ३ ॥

वाक्पारुष्यमिति ॥ वाक्पारुष्यं वचनकार्कश्यम् । दण्डपारुष्यमुग्रदण्डत्वम् । ईर्ष्या परधनगुणासहिष्णुता । द्रोहो विश्वासेन व्यापादनं द्रोहः । असूया परगुणेषु दोषारोपणम् । पैशुनं पिशुनकर्म्म अन्यदीयाप्रकाश्यप्रकाशनम् । साहसंचासाध्यविषयेऽपि प्रवृत्तिव्यापारः । अर्थस्य धनस्याष्टसंख्यं दूषणमित्युक्तम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्रोधोद्भूतः क्रोधजनित एष वर्गः समुदायः प्रदिष्टः कथित आचार्य्येणेति शेषः । अत्राष्टविधत्वं पूर्वश्लोकीयदशविधात्मकैकवस्तुघटकीकृत्य बोध्यमिति अत्रत्यश्लोकीयदोषविशेषाणां गणनयाष्टविधत्वं चिन्त्यमिति दिक् ॥ ३ ॥

अथ त्रिभिः पद्यैर्मद्यदूषणं प्रकटयति ।

महदिदमनयानामास्पदं मद्यमाहु-
स्तनुधनमतिसत्वश्रेयसां कर्षणाय ।
समुपहतमतिः सन् तत्प्रधानेन्द्रियत्वा-
द्गणयति नहि भक्ष्याभक्ष्यमन्यानि चैवम् ॥ ४ ॥

महदिदमनयानामिति ॥ अनयानामन्यायानामिदं मद्यं महद्बृहदास्पदं स्थानमाचार्या आहुः । तनुधनमतिसत्वश्रेयसां शरीरार्थधीबलकल्याणानां कर्षणायाकर्षणाय मद्यंभवति। समुपहतमतिः सन् सम्यगुपनष्टबुद्धिः सन् तत्प्रधानेन्द्रियत्वाद्बुद्धिप्रधानेन्द्रियगणत्वात् भक्ष्याभक्ष्यं खाद्याखाद्यमन्यानि च गम्यागम्यादीनि न गणयति न विचारयति जन इति ॥ ४ ॥

पत्नीयत्यपि मातरं मदवशात् पत्नीं च मात्रीयति
श्वभ्रीयत्यपि मन्दिरं श्लथशिलं कूपं च गेहीयति ।
स्वल्पं वार्य्युदधीयतीश्वरमपां मोहात्स्थलीयत्यपि
मित्रीयत्यपि पार्थिवं किमपरं कुर्यान्न यन्मद्यपः॥५॥

पत्नीयत्यपीति ॥ मद्यपो मधुपायी जनो मदवशान्मादकवस्तुपानवशात् मातरमपि जननीमपि पत्नीयति पत्नीमिवाचरतीति । तथा पत्नीं च मात्रीयति मातरमिवाचरति । मन्दिरमपि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गृहमपि श्वभ्रीयति गर्तमिवाचरति । श्लथशिलं विचलितप्रस्तरं कूपं च गेहीयति गेहमिवगृहमिवाचरति । स्वल्पमत्यल्पं वारि जलं उदधीयति समुद्रमिवाचरति । अपां जलानामीश्वरं समुद्रं मोहान्मोहवशात् स्थलीयति स्थलमिवाचरति । पार्थिवमपि राजानमपि मित्रीयति मित्रमिवाचरति । अपरमस्माद्भिन्नमनाचरणीयं किं यन्मद्यपो न कुर्यात् । अर्थात्सर्वभक्ष्याभक्ष्यगम्यागम्यकर्त्तव्याकर्तव्यविवेकहीनो मद्यपो भवतीति ॥ ५ ॥

भूयोऽपि दीव्यति जितो जयलिप्सयैव
प्राप्नोति तच्च सविशेषतरं कदाचित् ।
कृत्वाऽप्रियाणि मदतः परितोऽप्यटन्ति
भूयः पिवेत्किमपि दोषविशेषकांक्षी ॥ ६ ॥

भूयोऽपीति ॥ जितः पराजितः सन्नपि भूयोऽपि मुहुर्दीव्यति जिगीषति जयलिप्सयैव जयार्थमेव तज्जयं कदाचित् कस्मिन्नपि समये सविशेषतरमधिकतरं प्राप्नोति लभते । मदतो मद्यतोऽप्रियाण्यनिष्टानि कृत्वोत्पाद्य परितोऽपि समन्ततोऽप्यटन्ति इतस्ततो गच्छन्ति । दोषविशेषकांक्षी दोषविशेषाभिलाषी भूयो बारम्बारं किमप्यनिर्वचनीयमुन्मादजनकंपिवेत् पानं कुर्यात् ॥ ६ ॥

ननु मधुनः सर्वत्रोन्मादकारकत्वेन निषेधेऽभ्यागमोत्सव भिषग्वचनोपदेशानां कागतिरित्यत आह ।

अभ्यागमोत्सवभिषग्वचनोपदेशैः
कामं पिवेदमतिलोपकृदप्रकाशम् ।
द्यूतं विनेन्द्रियसुखानि हितानि युक्त्या

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विज्ञस्य जीवितफलं विषयैर्विना किम् ॥ ७ ॥

अभ्यागमोत्सवभिषग्वचनोपदेशैरिति ॥ अभ्यागमो विशेषशास्त्रम् उत्सवो मंगलम् । भिषग्वचनोपदेशो वैद्यशास्त्रानुशासनम् । तैरमतिलोपकृत् दुर्बुद्धिनाशकृत् । एतेन यावद्बुद्धेर्विचालनं न तावद्ग्राह्यमिति व्यञ्जयति । अप्रकाशं गुप्तं यथा तथा कामं पर्याप्तं पिबेत् । द्यूतं दुरोदरं विना ऋते युक्त्या युक्तित इन्द्रियसुखानि हितानि न पश्यामीति । ननु दुरोदरादेः शिष्टैर्निषिद्धत्वेन कथमेतदिति मत्वाह । विज्ञस्य पुंसो विषयैः स्रक्चन्दनवनितादिभिर्विना जीवितफलं दृष्टफलमिति किं न किमपीति ७ ॥

अथाचाररहितस्य कुगतिमाह ।

शौचाचारविवर्जितः शव इव त्यक्तः सुहृद्बान्धवै-
र्निःशङ्को निरपत्रपो गतघृणः कृच्छ्रादवाप्ताशनः ।
बन्धुर्नास्य निबन्धनं न शपथो लोकद्वयं नेक्ष्यते
मायावी कुलपांशलश्च कितवो दोषाकरो निःसुखः ८

शौचाचारविवर्जित इति ॥ शौचाचारविवर्जितः श्रौतस्मार्त्तकर्मरहितः । शव इव मृतक इव सुहृद्बान्धवैर्मित्रस्वजनैस्त्यक्तः । निःशंकः शंकारहितो निरपत्रपो निर्लज्जो गतघृणो गता घृणा करुणा यस्येति तथा । कृच्छ्रात्कष्टादवाप्ताशनः क्लेशात्प्राप्तभोजनः । अस्याचार रहितस्य बन्धुः स्वजनो न आद्रियते तिरस्करोति । नास्य निबन्धनं वासस्थाननियमः । न शपथो वाच्यावाच्य विवेकः । लोकद्वयमिहामुत्र नेक्ष्यते नदृश्यते । मायावी मायान्वितो भवति । कुलपांशलो वंशदूषणः । कितवो धूर्त्तः । दोषाकरो दुराचारसमुद्रः । निःसुखः सुखरहितो भवति ॥ ८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अधुना कुचेष्टितराजस्य परिणाममाह ॥

दैवज्ञमन्त्रिसुहृदाप्तवचांसि राजा
यो नाद्रियेन्निजविचेष्टितदुष्टबुद्धिः ।
सोऽग्रेसरेण रहितोऽन्ध इवाचिरेण
हास्यत्वमेति पतितो विषये रिपूणाम् ॥ ९ ॥

दैवज्ञमन्त्रिसुहृदाप्तवचांसीति ॥ यो राजा दैवज्ञमन्त्रिसुहृदाप्तवचांसि । दैवज्ञो ज्योतिर्वित् । मन्त्री सचिवः । सुहृन्मित्रम् आप्तो विश्वासुकः एतेषां वचांसि उपदेशवचनानि नाद्रियेत् नादरं कुर्यात् स रिपूणां विषये देशे पतितः सन् चिरेण शीघ्रमेव हास्यत्वमुपहासतामेति । प्राप्नोति । कइव । अग्रेसरेण नेत्रा रहितोऽन्ध इव । कीदृशो राजा । निजविचेष्टितदुष्टबुद्धिः । निजेन विचेष्टितेन कर्मणा दुष्टा बुद्धिर्यस्यसेति ॥ ९ ॥

सम्प्रति सुराजलक्षणमाह कुलकेन ।

मेधावी मतिमानदीनवचनो दक्षः क्षमावानृजु-
र्धर्म्मात्माप्यनसूयको लघुकरः षाड्गुण्यविच्छक्तिमान्
उत्साही पररन्ध्रवित्कृतधृतिर्वृद्धिक्षयस्थानवित्
शूरो न व्यसनी स्मरत्युपकृतिं वृद्धोपसेवी चयः १०

मेधावीति ॥ यो राजा मेधावी धारणशीलो भवति मतिमान् बुद्धिमान् । अदीनवचनो अकातरवाक् । दक्षः क्रियासुकुशलः क्षमावान् सहनशीलः । ऋजुः सरलचित्तः । धर्म्मात्मा धर्मशीलः अनसूयक इर्ष्यारहितः । लघुकरोऽल्पकरग्राही । षाड्गुण्यवित् सन्धिविग्रहादिराजरसगुणविज्ञाता यथोक्तमाचार्यैः सन्धिर्ना

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणा इति । तत्रारिविजिगीष्वोर्व्यवस्थाकरणमैक्यं सन्धिः । विरोधो विग्रहः । विजिगीषोररिं प्रतियात्रा यानम् । तयोर्मिथः प्रतिवद्धशक्त्योः कालप्रतीक्षया तूष्णीमवस्थानमासनम् । दुर्वलप्रबलयोर्वाचिकमात्मसमर्प्पणं द्वैधीभावः । अरिणा पीड्यमानस्य बलवदाश्रयणं समाश्रय इति शक्तिमान् प्रभावोत्साहमन्त्रजशक्तित्रयवान् । तत्र कोशदण्डजन्तेजः प्रभावशक्तिः । विक्रमादिनोन्नतिरुत्साहशक्तिः । सन्धिविग्राहादीनां मन्त्रेण यथावत्स्थापनं मन्त्रशक्तिः । इत्येषां विज्ञातेति उत्साही उत्साहशाली । पररन्ध्रवित् शत्रुच्छिद्रवेत्ता कृतधृतिर्धृतधैर्य्यः वृद्धिक्षयस्थानवित् नीतित्रिवर्गवान् । तद्यथा क्षयःस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनामिति । अष्टवर्गस्यापचयःक्षयःतस्यैवोपचयो वृद्धिः । उपचयापचयराहित्येनावस्थानं स्थानम् । अथाष्टवर्गः । कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खनिर्वलं करादानमिति शूरो वीरः । न व्यसनी दुर्व्यसनरहितः उपकृतिमुपकारकारिणं स्मरति स्मरणं करोति । वृद्धोपसेवी ज्ञानगुणवयोऽधिकसेवकः ॥ १० ॥

परीक्ष्यकारी न विकत्थनश्च
दृढप्रतिज्ञोऽतिदृढप्रहारी ।
जितेन्द्रियः स्याज्जितकोपलोभ-
निद्रालसस्थानपरिग्रहश्च ॥ ११ ॥

परीक्ष्यकारीति ॥ परीक्ष्यकारी परीक्षां नीत्वा करोतीति तथा । न विकत्थनश्च न वहुवाचालो न वहुगर्व्ववाक् । दृढप्रतिज्ञो निश्चला प्रतिज्ञा यस्येति अतिदृढप्रहारी निश्चलदण्डी पुत्रमित्रशत्रुषु तुल्यापकारेषु नीतिपूर्वकसमदण्डवान् । यथोक्तं मनुना अं-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति ॥ इति ॥ जितेन्द्रियो वशीकृतेन्द्रियवर्गः स्यात् भवेत्। जितकोपलोभः स्वायत्तीकृता क्रोधलुब्धतायेनेति निद्रालसास्थानपरिग्रहश्च स्यात् वशीकृतस्वापालस्यपदप्राश्रयः ॥ ११ ॥

त्यागी विनीतः प्रियदर्शनश्च
व्यपेतमोहः प्रतिपत्तियुक्तः ।
देशस्य कालस्य च भागविज्ञः
स्वयं च यः स्याद्व्यवहारदर्शी ॥ १२ ॥

त्यागी विनीत इति ॥ यश्च त्यागी दानी । विनीतो विनयी । प्रियदर्शनश्च सुदर्शनः।व्यपेतमोहो विगतमोहः । प्रतिपत्तियुक्तस्तत्तत्कार्यव्युत्पत्तिशाली । देशस्य भागविज्ञोऽस्मिन्देशे इदं कर्म्म क्रियतेऽन्यास्मिन्देशे नेति । कालस्यच भागविज्ञोऽस्मिन्नृतौ मासे दिने चेति कर्तुमुचितमनुचितं वेति भागविज्ञः । स्वयमात्मनैव यो राजा व्यवहारदर्शी व्यवहारद्रष्टा स्यात् ॥ १२ ॥

शब्दार्थविन्न्यायपटुः प्रगल्भः
संग्रामविद्याकुशलोऽभिजातः ।
स्मिताभिभाषी मितसत्यवक्ता
दैवान्वितो यश्च स धाम लक्ष्म्याः ॥ १३ ॥

शब्दार्थविदिति ॥ शब्दार्थवित् शब्दार्थज्ञाता । न्यायो राजनीतिस्तत्र पटुः पण्डितः प्रगल्भः प्रतिभान्वितः । संग्रामविद्याकुशलो रणविद्यानिपुणः । अभिजातः कुलीनः । अभिजातस्तु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुलजे बुधइत्यमरः । स्मितः । स्मिताभिभाषी ईषद्धासपूर्वक-भाषकः । मितसत्यवक्ता मितसत्ययोः स्वल्पतथ्ययोर्वक्ता । दैवान्वितो भाग्ययुक्तो यो राजा एतत्कथितगुणैर्युक्तो भवति स लक्ष्म्याः राजश्रियो धाम स्थानं भवतीति ॥ १३ ॥

ननु यात्रोक्तं फलं कथं न सर्वेषां भवतीत्याशंक्य
दृष्टान्तद्वारा विशेषकेणाह ।

गुणैः समस्तैरपि सम्प्रयुक्ता
कन्येव यात्रा विगुणाय दत्ता ।
करोत्यकीर्त्तिं सुखवित्तहानिं
यात्रान्तरज्ञानजडस्य दातुः ॥ १४ ॥

गुणैः समस्तैरिति ॥ समस्तैः सकलैर्गुणैः सुरूपशीलविन-यादिभिः सम्प्रयुक्ता सम्यग्युक्ता विगुणाय विशेषमूर्खाय दत्ता दीयमाना । दातुः कन्यादानकर्त्तुः । कन्येव यात्रान्तरज्ञानजडस्य गमनभेदबोधमूर्खस्य दातुर्यात्रादातुरकीर्त्तिमयशः करोति सुख-वित्तहानिश्च करोति ॥ १४ ॥

गुणान्वितस्यैव गुणं करोति
यात्रा शुभर्त्तग्रहलग्नयोगात् ।
व्यर्था सदोषस्य गुणान्वितापि
वीणेव शब्दाश्रयवर्ज्जितस्य ॥ १५ ॥

गुणान्वितस्यैवेति ॥ शुभर्क्षग्रहलग्नयोगात् शोभननक्षत्रखेटो-दययोगात् यात्रा गमनं गुणान्वितस्यैव पूर्वोक्तगुणशालिन एव गुणं करोति यथोक्तफलदा स्यादिति । सदोषस्य कथितस्वाचार-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रहितस्य राज्ञो गुणान्वितापि शोभननक्षत्रग्रहयुक्ताऽपि यात्रा व्यर्था निःफला स्यात् । शब्दाश्रयवर्ज्जितस्य कर्णेन्द्रियरहितस्य वीणेव वाद्यविशेषेवेति ॥ १५ ॥

यात्रा विशुद्धाऽपि समं प्रवृत्ता
पात्रानुरूपाणि फलानि धत्ते ।
जगत्युदीर्णाऽपिहि कौशिकस्य
भा भानवी नैव तमः प्रमार्ष्टि ॥ १६ ॥

यात्रा विशुद्धाऽपीति ॥ विशुद्धाऽपि सर्वतः शोधिताऽपि यात्रा समं साकं प्रवृत्ता पात्रानुरूपाणि पात्रसदृशानि फलानि धत्ते ददाति । नच सर्वत्रैकफला भवतीति द्रढ़यति । जगतीति । जगति संसारे उदीर्णापि उद्रिक्तापि भानवी भा सूर्यद्युतिः कौशिकस्योलूकस्य तमोन्धकारं नैव प्रमार्ष्टि नैवमार्ज्जयति नह्यन्धकारं नाशयतीति ॥ १६ ॥

अथ श्वः कर्त्तव्याकर्त्तव्यविवेकसमयमाह ।

विचिन्त्य कार्याणि निशावसाने
द्विषत्सुहृन्मण्डलसंश्रितानाम् ।
बलार्थदेशेषु नियोजितानां
समाश्रितानां च कृताकृतानि ॥ १७ ॥

विचिन्त्येति ॥ निशावसाने रात्र्यन्ते द्विषत्सुहृन्मण्डलसंश्रितानां शत्रुमित्रचक्रसङ्गतानां कार्याणि विचिन्त्य विचार्य्य च शब्दाद्बलार्थदेशेषु सैन्यप्रयोजनराष्ट्रेषु नियोजितानां नियुक्तानां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाश्रितानां कृताकृतानि कार्याकार्याणि विचिन्त्य यथोचितं श्वः कारयेदिति ॥ १७ ॥

अथ श्वः पूज्यानाह ।

अनाश्रितः ख्यातगुणः परोऽपि
शूरोऽथवा साधुजनः प्रशस्तः ।
सम्पूजनीयो जनसङ्ग्रहार्थं
ममेति देशोपगतो विचिन्त्य ॥ १८ ॥

अनाश्रित इति ॥ अनाश्रितोऽनाधीनो दैवादागतः । ख्यातगुणः प्रथितगुणः । परोऽपि शत्रुरपि । शूरो वीरोऽथवा साधुजनः प्रशस्तोऽगुणरहितो जनसङ्ग्रहार्थं लोकरक्षणाय सम्पूजनीयः । सम्यग्वन्दनीयः अयं मम देशोपगत अभ्यागत इति विचिन्त्य विचार्येति ॥ १८ ॥

अथ शयनादुत्थानविधिमाह ।

सवेणुवीणापणवस्वनेन
गीतेन पूर्वं व्यपनीतनिद्रः ।
शय्यां त्यजेत्तूर्य्यरवावसाने
शृण्वन्गिरो मङ्गलपाठकानाम् ॥ १९ ॥

सवेणुवीणापणवस्वनेनेति ॥ सहवंशीविपञ्चिमर्द्दलरवेण । गीतेन गानेन । पूर्वमुत्थानतआदौ व्यपनीतनिद्रस्त्यक्तशयनः सन् तूर्य्यरवावसाने तूर्य्याख्यमुखवाद्यवादनान्ते मंगलपाठकानां बन्दिजनानां गिरो मंगलवाचः शृण्वन् शय्यां त्यजेत् ॥ १९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ त्याज्यदन्तकाष्ठान्याह

अज्ञातपूर्वाणि न दन्तकाष्ठा-
न्यद्यान्न पत्रैश्च समन्वितानि ।
नचोर्द्ध्वशुष्कानि न पाटितानि
न युग्मपर्व्वाणि बिना त्वचा च ॥ २० ॥

अज्ञातपूर्वाणीति ॥ अज्ञातपूर्वाणि दन्तकाष्ठानि अपरिचितानि दन्तधावनकाष्ठानि न अद्यात् भक्षेत् अर्थात् अपरिचितकाष्ठैर्दन्तधावनं न कुर्य्यात् । पत्रैश्च समन्वितानिच नाद्यात् । नचोर्ध्वशुष्कानि ऊर्ध्वभागनीरसानि न च पाटितानि स्फुटितानि न युग्मपर्व्वाणि न समपर्व्वाणि त्वचा बिना त्वग्रहितेन न रदधावनं कुर्यादिति ॥ २० ॥

अथ दन्तधावनदिगादिनियममाह

उदङ्मुखः प्राङ्मुखसंस्थितो वा
ऋज्वव्रणं तच्च वितस्तिमात्रम् ।
अद्यान्नरेन्द्रो विनियम्य वाचं
प्रक्षाल्य जह्याच्च शुभप्रदेशे ॥ २१ ॥

उदङ्मुखः प्राङ्मुखसंस्थितो वेति ॥ उदङ्मुख उत्तराभिमुखो वा प्राङ्मुखसंस्थितः पूर्वाभिमुखः सम्यक्स्थितः सन् ऋजु सरलमव्रणं घुणादिविकृतिरहितं वितस्तिमात्रं द्वादशाङ्गुलप्रमाणं दन्तकाष्टं नरेन्द्रो राजा वाचं बाणीं विनियम्य मौनमासाद्याद्यात् चर्वयित्वा दन्तशुद्धिं कारयेत् । किं कृत्वा प्रक्षाल्य जलेन संशोध्य शुभप्रदेशे पवित्रस्थले जह्यात्क्षिपेदिति ॥ २१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथानेन शकुनमाह

अभिमुखपतितं प्रशान्तदिक्स्थं
शुभमतिशोभनमूर्ध्वसंस्थितं च ।
अशुभकरमतोऽन्यथा प्रदिष्टं
स्थितपतितं च करोति मिष्टमन्नम् ॥ २२ ॥

अभिमुखपतितमिति ॥ अभिमुखपतितं संमुखपतितं प्रशान्तदिक्स्थं दन्तकाष्ठं शुभं करोति । ऊर्ध्वसंस्थितं यत् तदतिशोभनं करोति । अतोऽन्यथा कथितविपरीतमशुभकरं प्रदिष्टं कथितम् । स्थितपतितं स्थित्वा पतितं मिष्टमन्नं मिष्टान्नभक्षणं करोति ददातीति ॥ २२ ॥

अथातो गुरुदेवतानमस्कारपूर्वकप्रातः
कृत्यानि कुलकेनाह

प्रणम्य देवांश्च गुरूंश्च पूर्वं
दत्वा च गां वत्सयुतां द्विजाय ।
दृष्ट्वा मुखं सर्प्पिषि दर्पणे च
नक्षत्रमादौ शृणुयात्तिथिं च ॥ २३ ॥

प्रणम्येति ॥ पूर्वमादौ दन्तधावनानन्तरं देवान् स्मरणीयान् प्रणम्य प्रणामं कृत्वा चपदेन । शिष्टान् गुरून् पित्रादीन् च प्रणम्य द्विजाय ब्राह्मणाय वत्सयुतां गां सवत्सां गां च दत्वा सर्प्पिषि घृते दर्पणे मुकुरे च मुखं दृष्ट्वाऽऽदौ नक्षत्रं पञ्चाङ्गस्थं शृणुयात् तिथिं च शब्देन वारादि शृणुयादिति ॥ २३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रुत्वा तिथिं भग्रहवासरं च
प्राप्नोति धर्मार्थयशांसि सौख्यम् ।
आरोग्यमायुर्विजयं सुतांश्च
दुःस्वप्नजातं प्रियतां च लोके ॥ २४ ॥

श्रुत्वा तिथिमिति ॥ तिथिं भग्रहवासरं च श्रुत्वा धर्मार्थयशांशि प्राप्नोति । सौख्यं प्राप्नोति । आरोग्यं प्राप्नोति । आयुर्विजयं च प्राप्नोति । सुतान् पुत्रान् प्राप्नोति । दुःस्वप्नयातं दुःस्वप्नभवं लोके भुवने लोकस्तु भुवने जनइत्यमरः प्रियतां मंगलतां च प्रयाति ॥ २४ ॥

अथ प्रातर्माङ्गलिकवस्तुसेवनानन्तरं वैद्यवचनं कुर्य्यादित्याह ।

दूर्वेभदानाञ्जनतीर्थतोय-
मृद्रोचनासर्षपपुष्पगन्धान् ।
सिताम्बरोष्णीषसुवर्णरत्ना-
न्यासेव्य कुर्याद्भिषजां वचांसि ॥ २५ ॥

दूर्वेभदानञ्जनतीर्थतोयमृद्रोचनासर्षपपुष्पगन्धानिति ॥ राजा दूर्वा प्रसिद्धा । इभदानं गजमदः । मदो दानमित्यमरः । अञ्जनं सौवीराञ्जनम् । तीर्थतोयो गंगादितीर्थजलम् । मृद्रोचना गोरोचनम् । सर्षपः प्रसिद्धः । पुष्पं कुसुमम् । गन्धश्चन्दनम् । सिताम्बरोष्णीषसुवर्णरत्नानि । श्वेतवस्त्रशिरोवेष्टनकनकमणीन् आसेव्य अर्थादेभिर्दूर्वादिभिर्वस्तुभिर्यथायोग्यमात्मानमलंकृत्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भिषजां वैद्यानां वचांसि वचनानि तदुक्तौषधसेवनानि कुर्यादिति ॥ २५ ॥

अथ पूर्वोक्ताचरणानन्तरं धर्मसभां कथं समाश्रये-
दित्याहद्वाभ्याम् ।

स्मितप्रसन्नप्रथमाभिभाषितैः
प्रसाददृष्ट्या करसंपरिग्रहैः ।
यथाभिरूपं हृदयान्यपिद्विषां
प्रसादयन् धर्मसभां समाश्रयेत् ॥ २६ ॥

स्मितप्रसन्नप्रथमाभिभाषितैरिति ॥ ईषद्धाससंश्लिष्टप्रसादपूर्वकाभिभाषणैः प्रसाददृष्ट्या प्रसन्नदृशा करसंपरिग्रहैः हस्तसंग्रहणैर्यथाभिरूपं यथायोग्यं द्विषां शत्रूणामपि हृदयानि मनांसि प्रसादयन् प्रीतिमुत्पादयन् धर्मसभां धर्मसम्बन्धिनीं सभां समाश्रयेत् संसेवेत (अपिद्विषाभितिपाठेऽयमर्थः) अविद्विषामिति पाठेऽविद्विषां मित्राणांमन्यत्समानामिति ॥ २६ ॥

विनीतवेषाभरणः सदक्षिणं
करं समुद्यम्य विचक्षणान्वितः ।
सुखोपविष्टः स्थित एव वा नृपः
समारिमित्रो व्यवहारदर्शने ॥ २७ ॥

विनीतवेषाभरण इति ॥ विनीतवेषाभरणः सुनयाकारभूषणः। सदक्षिणं सानुकूलं यथा तथा करं हस्तं समुद्यम्य विचक्षणान्वितः सपण्डितः समारिमित्रः समे तुल्येऽरिमित्रे यस्येति तथा व्यवहारदर्शने व्यवहारदर्शनार्थं सुखोपविष्टो वा स्थित एव भवेदिति २७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ सभायामुपवेशानन्तरं समारिमित्रादीनां चरितं विलोक्य किं कर्तव्यमित्याह ।

क्षमान्वितोऽस्मीति विचिन्त्यमेतत्
दण्ड्येषु दण्डक्षमणं न धर्मः ।
दण्डप्रभावो हि स दुर्जनस्य
हस्तेन यो जीवति साधुवर्ग्गः ॥ २८ ॥

क्षमान्वितोऽस्मीति ॥ अहं क्षमान्वितोऽस्मिसन् भवद्भिर्निःसंशयं स्वचरितानि वक्तव्यानीति उक्त्वाकथयित्वा तेषामेतत् सुचरितं कुचरितं च विचिन्त्यं विशेषेण नीतिशास्त्रपथा चिन्त्यं विभाव्यम् । ततो भावनानन्तरं दण्ड्येषु दण्डनीयेषु एतद्दण्डक्षमणं दण्डाकरणं न धर्म्मो राज्ञामिति शेषः । यथोक्तं मनुना--अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छतीति । हियतः स दण्डप्रभावो दुर्जनस्य मध्ये समुचितः । यश्च साधुवर्गः सज्जनगणः स च राज्ञो हस्तेन जीवत्येव । अर्थात् राज्ञो हस्तेन साधूनां पालनमुचितमेवेति अथवोत्तरार्धान्वयः हि यतो यः साधुर्वगः सत्समुदायो दुर्जनस्य खलस्य हस्तेन करालकरेण जीवति स दण्डप्रभाव एव अर्थाद्राजदण्डप्रभावादेव दुर्जनहस्तेन साधुवर्गोऽपि जीवति कथमन्यथा कुटिलकरालकरेण साधुसमूहजीवनमिति ॥ २८ ॥

अथ दण्डनीयेषु क्षमाक्षमयोर्दोषगुणानाह

सुतरामभिवर्द्धतेऽभिमानो
नीचानां क्षमयान्वितेषु यस्मात् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अत उग्रतरेण ते निवर्त्या
येनान्येऽपि खलास्तथा न भूयुः ॥ २९ ॥

सुतरामभिवर्द्धतेति ॥ यस्मात्कारणात् क्षमयान्वितेषु क्षान्त्याऽयुक्तेषु राजसु नीचानां दुराचारिणां सुतरामतिशयेनाभिमानोऽभिवर्द्धतेऽत उग्रतरेणाति घोरेण स्वभावेन ते नीचा निवर्त्याः कारागारादिवासेन दण्ड्या येन कारणेनान्येपि तदतिरिक्ताः खलाः नीचास्तथा न भूयुस्तथा दुष्टकर्माणि न कुर्युरिति भूय इति पाठे-पुनरिति ॥ २९ ॥

दण्डे फलान्तरमाह ।

यस्मिन्गृहीतः सदृशापराधो
महाजनस्त्रासमुपैति तस्मिन् ।
दण्ड्यो निपात्यो मनुजेश्वरेण
कालान्तरेऽन्यद्व्यपदिश्य कार्यम् ॥ ३० ॥

यस्मिन्गृहीतः सदृशापराधइति ॥ यस्मिन् गर्हिते कर्मणि नीचो गृहीतो कारागारे स्थापितस्तस्मिन् कर्मणि सदृशापराधस्तत्तुल्यापराधो महाजनः सुजनस्त्रासं भयमुपैति अर्थात् त्वयाऽनुचितं कर्म कृतं पुनरेतादृशं कर्म न कार्यमित्युक्तेन मनुजेश्वरेण राज्ञा स महाजनो भयं प्राप्नोति मनुजेश्वरेण च गच्छति कालान्तरे समयान्तरेऽन्यत्कार्यं व्यपदिश्य समादिश्य तत्र दूषणमुत्पाद्य पुनः स महाजनो दण्ड्यो निपात्यो नीत्या ताड्य इति ॥ ३० ॥

दण्डाकरणेऽनिष्टमाह ।

द्विरद इव मदेन विप्रयुक्तो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विषरहितो भुजगो व्यसिश्च कोशः ।
परिभवमुपयाति नापराधे
यदि मनुजाधिपतिः करोति दण्डम् ॥ ३१ ॥

द्विरद इवेति ॥ यदि मनुजाधिपती राजाऽपराधेऽनुचितकर्मणि दण्डं न करोति तर्हि परिभवमनादरमुपयाति प्राप्नोति । क इव मदेन दानेन विप्रयुक्तो रहितो द्विरदो गज इव । वा विषरहितो भुजगः सर्प इव । अथवा व्यसिः खड्गरहितश्च कोश-इव परिभवमुपयाति । अर्थाद्यथा मदरहितस्य गजस्य विषरहितस्य सर्पस्य खड्गराहितस्य कोशस्य च न किमपि लोके भयं तथैवापराधे सत्यपि समुचितदण्डं यो राजा न करोति तस्य लोके न भयं भवति येन राज्येऽशान्तिः प्रसरति तस्मान्नकोपि बिभेति दण्डाकरणत्वादिति भावः ॥ ३१ ॥

अथ दण्डे फलमाह ।

एकस्य तुल्योदरपाणिपादा
दण्डात्प्रभीताः प्रणमन्ति मर्त्याः ।
अत्युग्रदण्डादपि चोद्विजन्ते
दण्डोऽपराधप्रतिमः शिवाय ॥ ३२ ॥

एकस्येति ॥ एकस्य दुराचारिणः पुंसो दण्डात् नीतिपूर्वकदण्डपातनात् तुल्योदरपाणिपादास्तत्सदृशकुक्षिहस्तचरणा मर्त्याः प्रभीताः प्रकर्षेण भीतास्त्रस्ताः प्रणमन्ति राजानमितिशेषः । अत्युग्रदण्डादपि सुभयङ्करताड़नादपि मर्त्याश्चोद्विजन्ते उद्वेगं प्राप्नुवन्ति।तस्मादपराधप्रतिमोऽपराधसदृशो दण्डःशिवाय मङ्गलाय भवति राज्ञामिति ॥ ३२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ राज्ञः पञ्च महायज्ञानाह ।

दुष्टस्य दण्डः सुजनस्य पूजा
न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा
पञ्चैव यज्ञाः कथिता नृपाणाम् ॥ ३३ ॥

दुष्टस्येति ॥ दुष्टस्य कुटिलस्य दण्डः । सुजनस्य साधोः पूजाऽर्चा । न्यायेन नीत्या कोशस्य धनागारस्य च संप्रवृद्धिः सम्यग्वर्द्धनम् । अर्थिषु याचकेषु अपक्षपातः पक्षपातराहित्यम् । राष्ट्ररक्षा देशरक्षणं पञ्चैव इत्येव नृपाणां राज्ञां यज्ञाः कथिता न च दर्शपौर्णमासयागज्योतिष्टोमादय इति चानुषङ्गिका इति भावः ॥ ३३ ॥

सर्वदाऽनेककार्यभारपरिश्रान्तेऽपि दण्डकरणमाह ।

श्रान्तश्च तस्मिन्विनियुज्य साधून्
सङ्ग्रामविद्यादिविभक्तकालः ।
सर्वाणि कार्याणि यथा क्रमेण
कुर्यान्नृपः प्रत्यहमात्मवांश्च ॥ ३४ ॥

श्रान्तश्च तस्मिन्विनियुज्येति ॥ सङ्ग्रामविद्यादिविभक्तकालो रणविद्यादिविविधविभक्तमानसमयोऽतएव श्रान्तश्च तस्मिन् कार्ये दण्डादिके साधून् सत्पुरुषान् राजनीतिनिपुणान् विनियुज्य समभियोज्य सर्वाणि राजकार्याणि यथाक्रमेण कथितमार्गेण प्रत्यहमात्मवानात्मवेत्ता नृपो राजा कुर्यात्कारयेद्वा ३४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ राज्ञः क्षौरनियममाह ।

राज्ञा कार्यं पञ्चमे पञ्चमेऽन्हि
चौरर्क्षे वा श्मश्रुभस्योदये वा ।
त्यक्त्वा ताराः पञ्चसप्तत्रिपूर्वा
यात्राकाले नैव कार्यं न युद्धे ॥ ३५ ॥

राज्ञा कार्यमिति ॥ राज्ञा नृपेण पञ्चमे पञ्चमेऽह्नि दिने क्षौरं कार्यं वाऽनियमे क्षौरर्क्षे क्षौरोक्तनक्षत्रे वा श्मश्रुभस्योदये श्मश्रूक्तनक्षत्रमुहूर्ते चौरं वा श्मश्रुतस्योदये पाठे तस्योदये क्षौरभस्योदये श्मश्रुकर्म कार्य्यम् । पञ्चसप्तत्रिपूर्वास्ताराास्त्यक्त्वा प्रत्यरिवधविपत्तारा वर्जयित्वा यात्राकाले गमनसमये क्षौरं नैव कार्यं युद्धे च न कार्यमिति ॥ ३५ ॥

अथाचारे फलितमाह ।

आचारस्थः सागरान्तां धरित्रीं
भुङ्क्ते दीर्घं कालमुत्खातशत्रुः ।
यत्राचारस्तत्र धर्मस्य वृद्धि-
र्धर्माद्भोगान् देहभेदेऽपि भुङ्क्ते ॥ ३६ ॥

इति श्रीवराहमिहिराचार्यविरचितायां योगयात्राया-
माचाराध्यायो द्वितीयः ॥ २ ॥

आचारस्थ इति ॥ आचारस्थः कथितनीतिनिष्ठो राजा उत्खातशत्रुः उन्मूलितविपक्षो दीर्घं कालं चिरसमयं सागरान्तां समुद्रान्तां धरित्रीं पृथ्वीं भुङ्क्ते भोगं कुरुते । यत्र राजनि आ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चारस्तत्र तस्मिन् धर्मस्य स्वधर्मस्य वृद्धिर्भवति । धर्म्माद् देह-भेदेऽपि देहान्तरेऽपि भोगान् राज्यादिविविधसुखानि भुङ्क्ते भोगं कुरुते ॥ ३६ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायामाचाराध्यायो द्वितीयः ॥ २ ॥

अथाभियोगाध्यायो व्याख्यायते तत्रादौ स्वाचारयुजा राज्ञाऽनाचारिनृपोऽभियोज्य इति ।

अभिहितगुणसंयुतेन राज्ञा
कथितगुणात्ययसंस्थितोऽभियोज्यः ।
उपहतमुपलभ्य चास्य देशं
बलमथवा निरुपद्रुतोऽभियुञ्ज्यात् ॥ १ ॥

अभिहितगुणसंयुतेनेति । अभिहितगुणसंयुतेन कथिताचारगुणशालिना राज्ञा नृपेण कथितगुणात्ययसंस्थितः कथिताचारातीतनिष्ठोऽपरो राजाऽभियोज्यः पराभवितुं योग्य उपहतं चास्यदेशं राष्ट्रमथ बलं सैन्यमुपलभ्य प्राप्य निरुपद्रुतःस्वयमुपद्रवरहितः सन् अभियुञ्ज्यात् कलहाह्वानं कुर्यादिति ॥ १ ॥

अथातोऽभियोगदेशान् ब्रवीति कुलकेन ।

प्रचुरमशकयूकं मक्षिकादंशपूर्णं
बलमजलदवृष्ट्या पांशुवाताहतं वा ।
पिशितरुधिरधान्यप्राणिवृष्ट्या हतं वा
करितुरगमनुष्या यत्र वाध्या न दीनाः ॥ २ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रचुरमशकयूकमिति ॥ यत्र यस्मिन्देशे प्रचुरमशकयूकं प्रचुरं बहु मशक उष्मजो जीवो यूकं केशमलजो जीवविशेषः । मक्षिकादंशपूर्णम् । माक्षिका प्रसिद्धा । दंशो वनमक्षिका । एतत्पूर्णं बलं सैन्यं भवति वा पक्षान्तरे अजलदवृष्ट्या पांशुवाताहतं विना मेघजलवर्षणेन धूलिचण्डवायुहतं सैन्यं यत्र भवति । पिशितरुधिरधान्यप्राणिवृष्ट्या हतं वा पिशितं मासम् रुधिरः शोणितम् । धान्यं शस्यम् । प्राणी जीवः । एतेषां वृष्ट्या हतं नाशितं सैन्यम् । तत्र करितुरगमनुष्या बाध्याः तत्रैव हस्त्यश्वनरा बाधितुं योग्याः । न दीना दरिद्रा न बाध्याः । दीनास्तु स्वयमेव वश्या भवन्तीति तत्रत्यप्रभोर्वशत्वादिति भावः ॥२॥

शब्दायन्ते मुहुरपि शिवा गर्दभध्वानतुल्यं
त्यक्तस्नेहाः परिजनसुहृद्वाहनोपस्करेषु ।
कष्टं को नः शरणमिति वा वादिनो यस्य सैन्ये
विद्विष्टा वा प्रवरपुरुषाः सोऽभियोज्यो नृपेण ॥३॥

शब्दायन्त इति ॥ यत्र मुहुरपि वारंवारमपि शिवाः शृगाला गर्दभध्वानतुल्यं यथा तथा शब्दायन्ते शब्दं कुर्वते । परिजनसुहृद्वाहनोपस्करेषु निजजनमित्राश्वरथांगेषु त्यक्तस्नेहाः रहितप्रेमाणः । उपस्करो रथांगमिति कौमुद्याम् कष्टं नोऽस्माकं कः शरणं रक्षिता इति वादिनो यस्य सैन्ये बले नराः स्युर्भवेयुः । वा यस्य सैन्ये प्रवरपुरुषाः सुधीरनरा विद्विष्टा विद्वेषवन्तः । स देशो नृपेण राज्ञाऽभियोज्यो कलहादानंकर्तुं योग्य इति ॥ ३ ॥

निद्रालस्यावनतवदनाः केतनस्वप्नशीला
भ्रष्टाचारा मलिनपुरुषच्छाययाक्रान्तदेहाः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दीर्घश्वासाः सजलनयनाःशोकलोभाभिभूताः
सैन्ये यस्य द्विजगुरुसुहृद्द्वेषिणश्चैव योधाः ॥४॥

निद्रालस्यावनतवदना इति ॥ यस्य राज्ञः सैन्ये निद्रालस्यावनतवदना निद्रालसाभ्यामधोमुखा नरा भवन्ति । केतनस्वप्नशीलाः केतुस्वप्नशीला स्वप्ने पताका पतनं यत्र वीराः पश्यंतीति भ्रष्टाचारास्त्यक्ताचाराः मलिनपुरुषच्छायया नीचनरप्रभयाऽऽक्रान्तदेहाः। दीर्घश्वासाः दीर्घश्वासयुक्ताः सजलनयनाः साश्रुनेत्राः । शोकलोभाभिभूताः शोकलोभाभ्यां पराभविताः । तथा द्विजगुरुसुहृद्द्वेषिणो विप्रपितृमित्रद्वेष्टारो योधा भटा भवन्ति स राजा देशो वा नृपेणाभियोज्यः पराभावितुं योग्यः ॥ ४ ॥

अकारणप्रोद्गतरोमकूपा
जये निराशाः प्रकृतेरपेताः ।
अमङ्गलाचेष्टितजातहासाः
सैन्ये नरा यस्य सचाभियोज्यः ॥ ५ ॥

अकारणात्प्रोद्गतरोमकूपा इति ॥ यस्य राज्ञः सैन्ये सेनायां अकारणप्रोद्गतरोमकूपा नरा भवेयुः । अर्थादहैतुकरोमाञ्चशालिनो जना भवेयुः । जये फलनिष्पत्तौ निराशा आशारहिता नरा भवेयुः । प्रकृतेरपेताः स्वभावतो रहिता अमङ्गलाचेष्टितजातहासाः । अशुभसूचकगतहासा नरा भवेयुः । स राजाऽभियोज्यो भवतीति ॥ ५ ॥

कपोतकोलूकमधूनि यस्य
समाश्रयन्ते ध्वजचामराणि ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

छत्रायुधादीनि च सोऽभियोज्यो
यस्याथवाऽनाहततूर्य्यशब्दः ॥ ६ ॥

कपोतकोलूकमधूनीति ॥ यस्य राज्ञो ध्वजचामराणि कपोतकोलूकमधूनि समाश्रयन्ते । पारावतपेचकक्षौद्राण्याश्रयणं कुर्वते । सोऽभियोज्यः । छत्रायुधादीनि च यस्य समाश्रयान्ते सोऽभियोज्योऽथवा यस्यानाहततूर्य्यशब्दो विनाऽध्मातत्तूर्याख्यवाद्यरवो भवति सोऽभियोज्यो राज्ञेति शेषः ॥ ६ ॥

प्रतीपगत्वं सरितामिषोश्च
शोषोऽथवाऽशोष्यजलाशयानाम् ।
अवारिदेशे सलिलप्रवृत्ति-
रहैतुकं चाप्सु तरेच्छिला वा ॥ ७ ॥

प्रतीपगत्वमिति ॥ सरितां नदीनामिषोर्बाणस्य च प्रतीपगत्वं विलोमरयत्वं भवत्यथवाऽशोष्यजलाशयानामगाधतड़ागादीनां शोषो भवति । अपिच । अवारिदेशे निर्जलदेशे सलिलप्रवृत्तिर्जलसञ्चारो भवति । अप्सु जलेष्वहैतुकं च निष्कारणं शिला प्रस्तरस्तरेच्चलेत् वा सोऽभियोज्य इति पूर्वेणान्वयः ॥७॥

भङ्गपातचलनान्यनिमित्तं
रोदनानि च सुरप्रतिमानाम् ।
अग्निरूपमनिलेन विनावा
निश्चलानि च यदा प्रचलन्ति ॥ ८ ॥

भङ्गपातचलनानीति ॥ अनिमित्तं निष्कारणं यस्य राज्ञो भङ्गपातचलनानि । भङ्गो व्रणादिः । पातः पतनम् । चलनं विच-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लनम् । सुरप्रतिमानां देवप्रतिमानां रोदनानि च भवन्ति । वा पक्षान्तरेऽनलेनाग्निना विनाग्निरूपं दृश्यते । निश्चलान्यचलानि च प्रतिमादीनि यदा प्रचलन्ति तदाऽसौ राजा राज्ञाऽभियोज्य इति८

प्रसूतिवैकृत्यमकालपुष्पा-
ण्यरण्यसत्त्वस्य पुरप्रवेशः ।
प्रदोषकाले कृकवाकुशब्दा
हिमागमे चान्यभृतः प्रलापाः ॥ ९ ॥

प्रसूतिवैकृत्यमिति ॥ यदा प्रसूतिवैकृत्यं प्रसववैकृत्यं भवति बालकद्वयस्याङ्गावयवन्यूनाधिकस्य वा यत्रोत्पत्तिः।अकालपुष्याण्य-समये वृक्षेषु पुष्पप्रादुर्भावा भवन्ति । अरण्यसत्त्वस्य वन-प्राणिनः पुरप्रवेशो ग्रामप्रवेशो भवति । प्रदोषकाले रजनीमुखे कृकवाकुशब्दाः कुक्कुटशब्दा भवन्ति। हिमागमे हिमर्त्तावन्यभृतः कोकिलस्य प्रलापा भवन्ति । तदाऽभियोज्य इति ॥ ९ ॥

दीर्घं दीनं संहताः सारमेयाः
क्रोशन्त्युच्चैर्न्नित्यमेवानृतौ च ।
हन्युर्योषा योषितो निर्घृणाश्च
दृश्यं नित्यं नक्तमिन्द्रायुधं वा ॥ १० ॥

दीर्घं दीनमिति ॥ यत्र संहताः संमिलिताः सारमेयाः कुकुराः । दीर्घमुच्चैर्दीनं यथा तथा क्रोशन्ति रुदन्ति नित्यमेवा-नृतौ अहर्निशं विनर्त्तौ निर्घृणा दयारहिता योषाः स्त्रियो योषितः पराः स्त्रीः हन्युः मारयेयुः । नित्यं सततं नक्तं रात्राविन्द्रा-युधं शक्रधनुर्दृश्यं वा भवेत् । तत्राभिज्योज्य इति ॥ १० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिला वितैला यदि वार्द्धतैला-
सस्यस्य वृद्धिर्यदि वाऽतिरिक्ता ।
अन्नस्य वैरस्यमसृक् तरूणां
शुष्कप्ररोही विरुजां प्रणाशः ॥ ११ ॥

तिला वितैला इति ॥ यदि तिला वितैलास्तैलरहिता भवन्ति । यदिवार्द्धतैला भवेयुः । यदि वा सस्यस्य धान्यस्य वृद्धिरतिरिक्ता अत्यधिका भवेत् । अन्नस्य वैरस्यं विरसता तरूणां वृक्षाणां मध्येऽसृक् शोणितं यदि दृश्यते । शुष्कप्ररोही शुष्कीभूय बीजाङ्कुराणां प्रादुर्भावो भवेद्यदि विरुजां रोगरहितानामनेकेषां प्रणाशः प्रकर्षेणातिशयेन नाशो विलयोभवेद्यत्र स देशोऽभियोज्य इति ॥ ११ ॥

विहाय सर्पाखुविडालमत्स्यान्
स्वजातिमांसान्युपभुञ्जते वा ।
व्रजन्ति वा मैथुनमन्यजात्यां
दीप्ताश्च नित्यं विहगा मृगाश्च ॥ १२ ॥

विहायेति ॥ यत्र वा सर्पाखु विडालमत्स्यानहिमूषकमार्जारमीनान् विहाय त्यक्त्वा स्वजातिमांसान् उपभुञ्जते यत्र वाऽन्यजात्यां स्वभिन्नजात्यां मैथुनं व्रजन्ति रतिं गच्छन्ति च नित्यमनेकदिनं विहगाः पक्षिणो मृगा हरिणाश्च दीप्ता अर्थादीप्तायां दिशि दृश्यन्ते तत्राभियोज्य इति ॥ १२ ॥

भङ्गः पातस्तोरणेन्द्रध्वजानां
शीतोष्मानां व्यत्ययो भूविदारः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निम्नोच्चानां तुङ्गता निम्नता च
छाया चार्कस्याभिमुखेन याता ॥ १३ ॥

भङ्गः पातस्तोरणेन्द्रध्वजानामिति ॥ तोरणेन्द्रध्वजानां बहिर्द्वारशक्रध्वजानां भङ्गः पातो भवेत् । भङ्गः खण्डनम् । पातः पतनम् । शीतोष्मानां व्यत्ययो भवेत् । शीते उष्णता । उष्णे शीतता । भूविदारो भूस्फाटनं भवेत् । निम्नोच्चानां नीचतुङ्गानां तुङ्गतोच्चता निम्नता नीचता च यदि भवेत् । अर्कस्य सूर्यस्य छाया कान्तिरभिमुख्येन स्वाभिमुख्येन याता गता भवेत् यत्र तत्राभियोज्य इति ॥ १३ ॥

त्र्यहातिरिक्तः पवनोऽति चण्डो
गन्धर्वसंज्ञस्य भवेत्पुरस्य ।
व्यक्तिर्भवेच्चाहनि तारकाणां
नक्तं च तारागणसंप्रणाशः ॥ १४ ॥

त्र्यहातिरिक्त इति ॥ पवनो वायुस्त्र्यहातिरिक्तस्त्रिदिनाधिकोऽतिचण्डः प्रचण्डो वहेत् । गन्धर्वसंज्ञस्य पुरस्य दिने व्यक्तिर्भवेत् दृश्यत्वं भवेत् । आकाशे अहनि च तारकाणामृक्षाणां व्यक्तिर्दृश्यता भवेत् । नक्तं रात्रौ तारागणसंप्रणाशो भवेद्यत्र स देशोऽभियोज्य इति ॥ १४ ॥

प्रासादवेश्मवसुधाशरगुल्मनिम्ने-
ष्वावासका बलिभुजामनपत्यता वा ।
एकाण्डजत्वमथवा भुवि मण्डलानि
कुर्वन्ति चक्रकमिवोपरि वा भ्रमन्तः ॥ १५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रासादवेश्मवसुधाशरगुल्मनिम्नेष्विति ॥ यत्र प्रासादवेश्मवसुधाशरगुल्मनिम्नेषु हर्म्यगृहभूमुञ्जाम्रकाण्डनीचेषु बलिभुजां काकानामावासका नीडा भवन्ति। इत्येकोयोगः। वाऽनपत्यताऽसन्तानता भवेत्। इति द्वितीयो योगः। अथवैकाण्डजत्वमेकाण्डोत्पन्नत्वं तृतीयः। वा भुवि पृथिव्यां मण्डलानि कुर्व्वन्तीति चतुर्थः। वोपरि भ्रमन्तो भ्रमणं कुर्व्वन्तश्चक्रकमिव मण्डलानि कुर्व्वन्ति पञ्चम इति। स देशोऽभियोज्यः ॥ १९ ॥

उल्काभिघातेन तमोऽतिदीप्त्या
वक्रातिवक्रेण सुतो धरित्र्याः।
केतुर्गतिस्पर्शनधूपनेन
चारेण पीडां कुरुतेऽर्कपुत्रः ॥ १६ ॥

उल्काभिघातेनेति ॥ तमो राहुरुल्काभिघातेनोल्कापतनेन दीप्त्या चारेण पीडां कुरुते। धरित्र्याः सुतो मङ्गलो वक्रातिवक्रेण चारेण पीडां बाधां कुरुते केतुर्गतिस्पर्शनधूपनेन चारेण पीडां कुरुते। अर्कपुत्रः शनैश्चरश्चारेण सञ्चारेण पीडां कुरुते प्रजानामिति शेषः ॥ १६ ॥

अथान्यदाह युग्मेन।

त्रिभिस्त्रिभिर्भैरथ कृत्तिकाद्यै-
र्निपीडितैर्भूपतयोऽभियोज्याः।
पञ्चालनाथो मगधाधिपश्च
कलिङ्गपडुज्जयनीपतिश्च ॥ १७ ॥

त्रिभिस्त्रिभिर्भैरिति ॥ अथ त्रिभिस्त्रिभिर्भैः कृत्तिकाद्यैर्नवधा विभक्तैर्निपीडितैः योऽन्यग्रहेण विजितः केतुना चाभि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धूनितः ॥ उल्कयाभिहतश्चैव स निपीडित उच्यते ॥ तद्देशैः क्रमेण नवधा भूपतयो राजानोऽभियोज्याः के तानाह । पञ्चालनाथो पञ्चालदेशस्वामी । मगधाधिपो मगधदेशस्वामी । च-पुनः । कलिङ्गराट् कलिंगदेशाधिपः । उज्जयनीपतिरवन्तीदेशाधिपः ॥ १७ ॥

आनर्त्तराट् सैन्धवहारहोरौ
मद्रेश्वरोऽन्यश्च कुरङ्गनाथः ।
एते हि कूर्माङ्गसमाश्रितानां
विशेषपीडामुपयान्ति भूपाः ॥ १८ ॥

आनर्त्तराडिति ॥ आनर्त्तराट् आनर्त्तदेशाधिपः । सैन्धवहारहोरौ तयोरधिपती । मद्रेश्वरो मद्रस्वामी । अन्यश्च कुरङ्गनाथः । हियतः । कूर्माङ्गसमाश्रितानां नवधा विभक्तानां एते पूर्वोक्ता भूपा राजानो विशेषपीडामुपयान्ति विशेषतः पीडां प्राप्नुवन्ति १८

अथ युग्मेन ग्रहदेशानाह ।

अङ्गेषु सूर्यो यवनेषु चन्द्रो
भौमो ह्यवन्त्यां मगधेषु सौम्यः ।
सिन्धौ गुरुर्भोजकटे च शुक्रः
सौरः सुराष्ट्रे विषये बभूव ॥ १९ ॥

अङ्गेष्विति ॥ अङ्गेषु विषयेषु देशेषु सूर्यो बभूव । यवनेषु यवनदेशेषु चन्द्रो बभूव । भौमो मङ्गलो हि अवन्त्यामुज्जयिन्यां बभूव । मगधेषु मगधदेशेषु सौम्यो बुधो बभूव । सिन्धौ सिन्धुदेशे गुरुर्बृहस्पतिर्बभूव । भोजकटे देशे च शुक्रो बभूव । सौरः शनैश्चरः सुराष्ट्रे विषये देशे बभूव ॥ १९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

म्लेच्छेषु केतुश्च तमः कलिङ्गे
यातो यतोऽतः परिपीडयन्ति ।
स्वजन्मदेशान्परिपीडयन्ति
ततोऽभियोज्याः क्षितिपेन देशाः ॥ २० ॥

म्लेच्छेषु केतुरिति ॥ म्लेच्छेषु देशेषु यतः केतुर्यात उत्पन्नो बभूव । तमोराहुर्यतः कलिङ्गे देशे यातो बभूव । अतस्ते परिपीड़िता ग्रहाः स्वजन्मदेशान् स्वकीयजन्मदेशान् परिपीडयन्ति ततस्तस्मात्कारणात्क्षितिपेन राज्ञा परिपीड़िता देशा आभियोज्या इति ॥ २० ॥

अथ विशेषमाह ।

सम्पूज्यन्ते भैरवोच्चानुनादै-
रक्तैर्मांसैस्तालजङ्घादयो वा ।
दृश्यन्ते वा यातुधानाः प्रभूता
भ्रष्टश्रीकः सोऽपि देशोऽभियोज्यः ॥ २१ ॥

सम्पूज्यन्त इति ॥ यत्र भैरवोच्चानुनादैर्भयङ्करप्लुतस्वरै रक्तैः शोणितैः मांसैर्मांसपिण्डैस्तालजङ्घादयो भूतविशेषाः सम्पूज्यन्ते । यत्र वा पक्षान्तरे यातुधानाराक्षसाः प्रभूता अधिका दृश्यन्ते । भ्रष्टश्रीको नष्टराज्यलक्ष्मीकः सोऽपि देशोऽभियोज्यो राज्ञेति शेषः ॥ २१ ॥

अथान्यगम्यदेशमाह ।

देशभ्रंशो यैर्निमित्तैः प्रदिष्ट-
स्तास्तावार्त्तां वक्ति लोके विशङ्कः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्यक्त्वा देशं यान्ति यं भिक्षुका वा
गम्यो देशो सोऽप्यसाधुप्रवृत्तः ॥ २२ ॥

देशभ्रंशो यैर्निमित्तैरिति ॥ यैर्निमित्तैर्यैः कारणैर्देशभ्रंशो देशनाशः प्रदिष्टः कथितः । तास्ता वार्त्ता विशङ्कः शङ्कारहितः । लोके भुवने वक्ति यदि कथयति । वा भिक्षुका अर्थिनो यं देशं त्यक्त्वा हित्वा देशमन्यदेशं यान्ति गच्छन्ति । असाधुप्रवृत्तो नीचजनसङ्गतः सोऽपि देशो गम्यो गमनार्हो भवति ॥ २२ ॥

अथाध्यायोपसंहारे सदृष्टान्तकशान्तिकर्म्माह ।

रोगाभिभूतं विषदूषितं वा
यथा विनाशाभिमुखं शरीरम् ।
वैद्यः प्रयोगैः सुदृढं करोति
राष्ट्रं तथा शान्तिभिरग्रजन्मा ॥ २३ ॥

इति श्रीवराहमिहिरकृतायां योगयात्रायामभियोगाध्यायस्तृतीयः ॥ ३ ॥

रोगाभिभूतमिति ॥ रोगाभिभूतं व्याधिग्रस्तं शरीरं देहं विनाशाभिमुखं विनाशोन्मुखं वैद्यः प्रयोगैर्भेषजप्रयोगैर्यथा सुदृढं करोति । वा विषदूषितं शरीरं विनाशाभिमुखं वैद्यः प्रयोगैर्यथा सुदृढं सुस्थिरं करोति । तथाऽग्रजन्मा ब्राह्मणो राष्ट्रं देशं शान्तिभिः शान्तिकर्मभिः सुदृढमुत्पातरहितं करोतीति ॥ २३ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायामभियोगाध्यायस्तृतीयः ॥ ३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ योगाध्यायो व्याख्यायते तत्रादौ लग्नादि-द्वादशभावसंज्ञानाह ।

देहः कोशो योद्धा वाह्यं मन्त्रः शत्रुर्मार्गोऽप्यायुः ।
चित्तं कर्म प्राप्तिर्मन्त्री प्राग्लग्नाद्या भावाश्चिन्त्याः॥

देहः कोश इति ॥ देहः कोशः योद्धा वाह्यम् मन्त्रः शत्रुर्मार्गोऽपि आयुः चित्तं कर्म प्राप्तिर्मन्त्रीति प्राग्लग्नाद्याः प्रथमभावाद्या भावाश्चिन्त्या विज्ञेयाः ॥ १ ॥

अथ पापसौम्याः केषु २ भावेषु शुभाशुभफलानि वर्द्धयन्ति तदाह ।

त्रिलाभवर्ज्यं रविसौरिभौमा
निघ्नन्ति नो कर्मणि सूर्यभौमौ ।
पुष्णन्ति सौम्या रिपुराशिवर्ज्य-
मस्तं भृगुर्मृत्युविलग्नमिन्दुः ॥ २ ॥

त्रिलाभवर्ज्यमिति ॥ रविसौरिभौमास्त्रिलाभवर्ज्यं स्थानं निघ्नन्ति सूर्यभौमौ कर्मणिस्थितौ तत्र फलं नो निहतः । सौम्याः शुभग्रहाः रिपुराशिवर्ज्यं षष्ठभाववर्ज्यं पुष्णन्ति पोषयन्ति । अस्तं वर्जयित्वा शुक्रः पुष्णाति । मृत्युविलग्नमष्टमप्रथमलग्नं हित्वा चन्द्रः शुभकरो भवतीति ॥ २ ॥

अथ यात्रायां पञ्चाङ्गशुद्धौ विशेषमाह ।

तिथ्युद्गमेन्दुकरणर्क्षदिनक्षणेषु
शुद्धेष्वभीष्टफलदा नृपतेर्यथा स्यात् ।
यात्रा तथापरमिदं कथयामि गुह्यं
शिष्याय नैतदचिराध्युषिताय दद्यात् ॥ ३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिथ्युद्गमेन्दुकरणर्क्षदिनक्षणेष्विति ॥ तिथ्युद्गमेन्दुकरणर्क्ष-दिनक्षणेषु तिथिलग्नचन्द्रतिथ्यर्द्धनक्षत्रवारमुहूर्तेषु शुद्धेषु विहितेषु । नृपतेर्नरेन्द्रस्य यात्रा गमनं यथाभीष्टफलदा स्यात् । तथा तद्वत् परं श्रेष्ठं भिन्नं वा इदं गुह्यं गोप्यं कथयामि । एतदचिराध्युषितायाल्पकालगुरुसेविने नैव दद्यात् ॥ ३ ॥

अथ कैः केषां सिद्धिरित्याह ।

योगैः क्षितिपा विनिर्गताः
शकुनैस्तस्करचारणादयः ।
नक्षत्रबलैर्द्विजातयः
क्षणवीर्यादितरो जनोऽर्थभाक् ॥ ४ ॥

योगैः क्षितिपा इति ॥ योगैर्वक्ष्यमाणैर्विनिर्गताः कृतप्रस्थानकाः क्षितिपा राजानोऽर्थभाजो भवन्ति । तस्करचारणादयश्चौरनर्त्तकादयः शकुनैर्वक्ष्यमाणैः शुभशकुनैरर्थभाजो यात्राफलवन्तो भवन्ति । द्विजातयो ब्राह्मणा नक्षत्रबलैः कथितनक्षत्रगुणैरर्थभाजो भवन्ति । इतरः कथितोतरो जनो क्षणंवीर्य्यान्मुहूर्त्तबलादर्थभाग्भवतीति ॥ ४ ॥

अथातो यात्रिक शुभाशुभविविधयोगान् वक्तुं
दृष्टान्तद्वारेणाह ।

यद्वद्योगवशाद्व्रजत्यगरतां द्रव्यैर्विषं योजितं
संयुक्तं मधुना घृतं च विषतां गच्छेद्यथा दृश्यते ।
तद्वद्योगसमुद्भवं प्रकुरुते हित्वा ग्रहः स्वं फलं
यस्मात्तेन समुद्यतोऽस्मि गदितुं योगान्
विचित्रानिमान् ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यद्यद्योगवशादिति ॥ मधुना क्षौद्रेण संयुक्तं घृतं विषतां विषत्वं गच्छेदिति यथा दृश्यते द्रव्यैर्योजितमेतद्विषं यद्यद्योगवशा-द्येषां येषां योगवशात्संमेलनादगदतां विषाभावत्वं व्रजति प्राप्नो-तीति यथा दृश्यते । तद्वत्तथैव विषाविषत्वमिव ग्रहः स्वं फलमा-त्मीयशुभाशुभत्वं विहाय त्यक्त्वा यस्मात्कारणात् योगसमुद्भवं फलं प्रकुरुते । तेन कारणेन इमान् वक्ष्यमाणान् विचित्रान् योगान् गदितुं वक्तुं समुद्यतोऽस्म्यहमिति । अथागदतामिति पाठे च द्रव्यैरनेकविधवस्तुभिः संयोजितं विषं यद्यद्योगवशाद्येषां येषां सम्मेलनादगतां रोगाभावत्वं व्रजतीति यथा दृश्यते मधुना संयुक्तं घृतं च यथा विषतां । विषत्वं गच्छेदिति यथा दृश्यते-त्यग्रे समानमिति ॥ ५ ॥

अथ योगानाह ।

लग्ने गुरुर्बुधभृगू हिबुका ४ त्मज ५ स्थौ
षष्ठौ ६ कुजार्कतनयौ दिनकृत्तृतीयः ३ ।
चन्द्रश्च यस्य दशमो १० भवति प्रयातु-
स्तस्याभिवाञ्छितफलाप्तिरलं नृपस्य ॥ ६ ॥

लग्ने गुरुरिति ॥ गुरुर्बृहस्पतिर्लग्ने भवति । बुधभृगू हिबुका-त्मजस्थौ चतुर्थपञ्चमस्थौ । कुजार्कतनयौ मङ्गलशनी षष्ठौषष्ठ-स्थौ भवतः । दिनकृत् सूर्यस्तृतीयो भवति। यस्य प्रयातुर्गन्तुश्चन्द्रो दशमो भवति । तस्य नृपस्य राज्ञोऽभिवाञ्छितफलाप्तिरलं पर्याप्तं भवतीति ॥ ६ ॥

अथपुनर्योगान्तरमाह ।

होरातृतीयरिपुलाभगतैः क्रमेण

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जीवार्किभौमरविभिर्भृगुजेऽनुकूले ।
यातोऽतिदृप्तमपि शत्रुबलं निहन्ति
नैशं तमिस्रमिव तिग्ममयूखमाली ॥ ७ ॥

होरातृतीयरिपुलाभगतैरिति॥जीवार्किभौमरविभिः क्रमेण होरा १ तृतीय ३ रिपु ६ लाभ ११ गतैः । भृगुजे शुक्रेऽनुकूले सति । यातो गतः सन् अतिदृप्तमतिगर्वितं शत्रुबलं निहन्ति नाशयति । तिग्ममयूखमाली सूर्यो नैशं निशासम्बन्धिनं तमिस्रमन्धकारमिव ॥७॥

पुनर्योगान्तरमाह ।

उदया १ रि ६ नभःस्थल १० गै-
र्दिनकृद्यमशीतकरैः ।
न भवन्त्यरयोऽभिमुखा
हरिणा इव केशरिणः ॥ ८ ॥

उदयारिनभस्थलगैरिति ॥ दिनकृद्यमशीतकरैः । रविशनिचन्द्रैरुदयारिनभस्थलगैर्लग्नषष्ठदशमगतैस्तदाऽरयः शत्रवोऽभिमुखाः संमुखा न भवन्ति । केशरिणः सिंहस्याभिमुखा हरिणा इवेति ॥ ८ ॥

पुनर्योगान्तरमाह ।

गुरुरुदये रिपुराशिगतोऽर्को
यदि निधने न च शीतमयूखः ।
भवति गतोऽत्र शशीव नरेन्द्रो
रिपुवनिताननतामरसानाम् ॥ ९ ॥

गुरुरुदय इति ॥ गुरुर्जीव उदये लग्ने यद्यर्कः सूर्यो रिपुराशि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गतः षष्ठस्थः । निधनेऽष्टमे शीतमयूखश्चन्द्रो न भवति । तदाऽत्राऽस्मिन्योगे गतः सन् नरेन्द्रो राजा रिपुवनिताननतामरसानां शत्रुस्त्रीमुखकमलानां शशीव भवति । अर्थाद्वैरिवर्गं निहत्य तस्य स्त्रीमुखकमलं मुकुलयति वैधव्यमुत्पादयतीति ॥ ९ ॥

पुनर्योगान्तरमाह ।

शुक्रवाक्पतिबुधैर्धनसंस्थैः
सप्तमे शशिनि लग्नगतेऽर्के ।
निर्गतो नृपतिरेति कृतार्थो
वैनतेयवदहिं विनिगृह्य ॥ १० ॥

शुक्रवाक्पतिबुधैरिति ॥ शुक्रवाक्पतिबुधैर्भृगुगुरुबुधैर्धनसंस्थैर्द्वितीयस्थैः । सप्तमे शशिनि चन्द्रो अर्के सूर्ये लग्नगते । अत्र निर्गतो नृपती राजा कृतार्थः सन् । एति गृहमिति शेषः । अहिं सर्पं विनिगृह्य विशेषेण निःशेषेण गृहीत्वा वैनतेयवत् गरुडवत् गृहमेति ॥ १० ॥

पुनर्योगान्तरमाह ।

मूर्त्तिवित्तसहजेषु संस्थिताः
शुक्रचन्द्रसुततिग्मरश्मयः ।
यस्य यानसमये रणानले
तस्य यान्ति शलभा इवारयः ॥ ११ ॥

मूर्त्तिवित्तसहजेष्विति ॥ शुक्रचन्द्रसुततिग्मरश्मयो भृगुबुधसूर्य्या मूर्त्तिवित्तसहजेषु तनुधनपराक्रमेषु संस्थिताः क्रमेण यस्य राज्ञो यानसमये यात्राकाले एवं भवन्ति । तस्य रणानले सङ्-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ग्रामाग्नौ शलभा कीटविशेषा इवारयः शत्रवो यान्ति गच्छन्ति विलयमिति शेषः ॥ ११ ॥

पुनर्योगान्तरमाह ।

सूर्येन्दू बलवर्जितौ बलयुतौ जन्मेशलग्नेश्वरौ
पाताले४दशमे१०ऽपि वा शशिसुतो लग्नस्थितो
वाक्पतिः। षट्सप्ताष्टम ६।७।८ वर्जितेषु भृगुजः
स्थानेषु यस्य स्थितो यातुस्तस्य न विद्विषो रण-
मुखा तिष्ठन्ति योषा इव ॥ १२ ॥

सूर्येन्दू बलवर्जिताविति ॥ सूर्येन्दू बलवर्जितौ बलरहितौ भवतः । जन्मेशलग्नेश्वरौ जन्मराशिलग्नस्वामिनौ बलयुतौ । अपि वा शशिसुतो बुधः पाताले ४ दशमे १० वा वाक्पति-र्गुरुर्लग्नस्थितः । षट्सप्ताष्टमवर्जितेषु स्थानेषु भृगुजो यस्य यातुर्गन्तुः स्थितो भवेत् । तस्य राज्ञो रणमुखे सङ्ग्रामसंमुखे विद्विषः शत्रवो न तिष्ठन्ति योषा इव स्त्रिय इव ॥ १२ ॥

पुनर्योगान्तरमाह ।

सौरे भौमे लग्नगे१ऽर्के ख १० मध्ये
कर्म १० ण्याये ११ भार्गवे चन्द्रजे च ।
यायाद्भूपः शत्रुदेशं निहन्तुं
दृप्तं शत्रुं कालवत् क्रूरचेष्टः ॥ १३ ॥

सौरे भौम इति ॥ सौरे भौमे लग्नगे अर्के सूर्ये खमध्ये दशमे । भार्गवे शुक्रे चन्द्रजे बुधे च कर्म १० ण्याये दशमे लाभे च अत्र योगे भूपो राजा शत्रुदेशं रिपुराष्ट्रं हन्तुं यायात् गच्छेत्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदा दृप्तं गर्वितं शत्रुं माति कालवत्क्रूरचेष्टः सन् यमसमकुटिलाकृतिः सन् शत्रुं नाशयेदिति शेषः ॥ १३ ॥

पुनर्योगान्तरमाह ।

लाभशत्रुसहजेषु यमारौ सौम्यशुक्रगुरवो बलयुक्ताः। गच्छतो यदि ततोऽस्य धरित्री सागराम्बुरसना वशमेति ॥ १४ ॥

लाभशत्रुसहजेष्विति ॥ यमारौ शनिमङ्गलौ लाभशत्रुसहजेषु ११। ६। ३ स्थितौ यदि सौम्यशुक्रगुरवो बलयुक्ता भवेयुः। अस्मिन्योगे गच्छतो राज्ञः ततस्तदनन्तरमस्य सागराम्बुरसना धरित्री पृथ्वी वशमेति तदायत्तत्वंव्रजतीति ॥ अर्थादासमुद्रान्तसकलवसुधाभोगी भवति समुद्रजलमेव रसना काञ्ची कटिभूषणं यस्याः सा तथेति । मेखला काञ्ची सप्तकी रशना तथेत्यमरः ॥ १४ ॥

पुनर्योगान्तरमाह ।

पापास्तृतीये ३ हिबुके ४ सितज्ञौ
जीवो विलग्ने शशलाञ्छनोऽस्ते ।
यस्योद्यमे तस्य बलं रिपूणां
कृतं कृतघ्नेष्विव याति नाशम् ॥ १५ ॥

पापास्तृतीय इति ॥ यस्य राज्ञ उद्यमे रणोद्यमे रणयात्रायां पापाः पापग्रहाः तृतीये सहजे भवन्ति । सितज्ञौ शुक्रबुधौ हिबुके चतुर्थे भवतः । जीवो गुरुर्लग्ने । शशलाञ्छनश्चन्द्रोऽस्ते सप्तमे । तस्य रिपूणां शत्रूणां बलं सैन्यं नाशं याति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्राप्नोति । कृतघ्नेषु कृतकार्यनाशकेषु नराधमेषु कृतं कार्यमिवेति ॥ १५ ॥

पुनर्योगान्तरमाह ।

चन्द्रेऽस्तगे ७ देवगुरौ विलग्ने १
ज्ञशुक्रयोः कर्मणि१० लाभ ११ गेऽर्के ।
सौरारयोर्भ्रातृगयोश्च यातो
नृपः स्वभृत्यानिव शास्ति शत्रून् ॥ १६ ॥

चन्द्रेऽस्तग इति । चन्द्रेऽस्तगे सप्तमे । देवगुरौ बृहस्पतौ विलग्ने । ज्ञशुक्रयोः कर्मणि दशमेस्थितयोः । अर्के सूर्य्ये लाभगे । सौरारयोः शनिमङ्गलयोर्भ्रातृगयोस्तृतीयप्राप्तयोः । अस्मिन्योगे यातो नृपो राजा स्वभृत्यानात्मसेवकानिव शत्रून् शास्ति शासनांकरोतीति ॥ १६ ॥

पुनर्योगान्तरमाह ।

गुरौ विलग्ने १ यदि वा शशाङ्के
षष्ठे ६ रवौ कर्म १० गतेऽर्कपुत्रे ।
सितज्ञयोर्बन्धुसुतस्थयोश्च
यात्रा जनित्रीव हितानि धत्ते ॥ १७ ॥

गुरौ विलग्न इति ॥ गुरौ बृहस्पतौ विलग्ने तथैव यदि वा शशाङ्के चन्द्रे विलग्ने । रवौ षष्ठे । अर्कपुत्रे शनैश्चरे कर्मगते दशमस्थे । सितज्ञयोः शुक्रबुधयोर्बन्धुसुतस्थयोस्तृतीयपञ्चमस्थयोश्च अत्र यात्रा जनित्रीव मातेव हितान्यभीष्टानि धत्ते दधाति ॥ १७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्योगान्तरमाह ।

पत्यौ गिरां लग्नगतेऽ१ वशेषै-
रेकादशा ११ र्थो २ पगतैर्यियासोः ।
विदार्यते शत्रुवलं समन्ता-
द्धर्मो यथा हेतुशतैर्युगान्ते ॥ १८ ॥

पत्यौ गिरामिति । गिरां वाचां पत्यौ स्वामिनि बृहस्पतौ लग्नगते चपुनः शेषैर्ग्रहैरेकादशाऽर्थोपगतैरेकादशद्वितीयस्थैस्तदा यियासोर्गमनशीलस्य राज्ञः शत्रुबलं रिपुसैन्यं विदार्यते यथा समन्तात्सर्वतः हेतुशतैर्विविधकारणैर्युगान्ते युगावसाने धर्मो जातिदेशकुलव्रताचारो विदार्यते ॥ १८ ॥

पुनर्योगान्तरमाह ।

त्रिषण्णवान्त्येष्वबलः शशांक-
श्चान्द्रिर्वली यस्य गुरुश्च केन्द्रे ।
तस्यारियोषाभरणैः प्रियाणि
प्रियाः प्रियाणां जनयन्ति सैन्ये ॥ १९ ॥

त्रिषण्णवान्त्येष्विति ॥ यस्य राज्ञो यात्रासमयेऽबलो बलरहितः शशाङ्कश्चन्द्रस्त्रिषण्णवान्त्येषु ३ । ६ । ९ । १२ स्थितो भवति । चान्द्रिर्बुधो बली गुरुश्च बृहस्पतिश्च केन्द्रे भवति । तस्य राज्ञः सैन्ये सेनायामरियोषाभरणैः शत्रुवनिताभूषणैः प्रिया नायिकाः प्रियाणां बल्लभानां प्रियाणि नूतनप्रेमाणि जनयन्त्युत्पादयन्ति अर्थात् शत्रोर्जयात् सैन्यजनानां तत्पत्नीभूषणानां लाभो भवतीति ॥ १९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्योगान्तरमाह ।

केन्द्रोपगतेन वीक्षिते
गुरुणा त्र्यायचतुर्थगे सिते ।
पापैरनवाष्टसप्तमै-
र्वसु किं तन्न यदाप्नुयाद्गतः ॥ २० ॥

केन्द्रोपगतेनेति ॥ त्र्यायचतुर्थगे ३ । ११ । ४ सिते शुक्रे । केन्द्रोपगतेन १ । ४ । ७ । १० । गुरुणा वीक्षिते । पापैः पापग्रहैरनवाष्टसप्तमैः स्थितैर्गतः सन् । कृतगमनः तत्किमनिर्वचनीयं वसु धनं यन्न प्राप्नुयात् । अर्थात् सर्वमप्यमूल्यं धनं प्राप्नुयादेव शत्रोर्विजयाद्दिति ॥ २० ॥

पुनर्योगान्तरमाह ।

लग्नारिकर्महिबुकेषु शुभेक्षिते ज्ञे
द्यूनान्त्यलग्नरहितेष्वशुभग्रहेषु ।
यातुर्भयं न भवति प्रतरेत्समुद्रं
यद्यश्मना किमुत शत्रुसमागमेषु ॥ २१ ॥

लग्नारिकर्महिबुकेष्विति । लग्नारिकर्महिबुकेषु १ । ६ । १० ४ शुभेक्षिते शुभग्रहदृष्टभूते ज्ञे बुधे सति । अशुभग्रहेषु पापेषु द्यूनान्त्यलग्नरहितेषु सत्सु । अत्र योगे यातुर्गन्तुर्भयं न भवति यद्यश्मना प्रस्तरेण सार्कं समुद्रं प्रतरेत्किमुत शत्रुसमागमे तरणे वक्तव्यतेति ॥ २१ ॥

पुनर्योगान्तरमाह ।

यस्योदयास्तारिचतुस्त्रिसंस्थाः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुक्राङ्गिरोऽङ्गारकसौम्यसौराः ।
द्विषद्दलस्त्रीवदनानि तस्य
क्लान्तानि कान्तानवलोकयन्ति ॥ २२ ॥

यस्योदयास्तारिचतुर्थसंस्था इति । यस्य राज्ञो गमने शुक्राङ्गिरोऽङ्गारकसौम्यसौरा भृगुगुरुकुजबुधशनय उदयास्तारिचतुस्त्रिसंस्था लग्नसप्तमषष्ठचतुर्थत्रिकसंस्थिताः क्रमेण तस्य द्विषद्दलस्त्रीवदनानि शत्रुसैनिकनारीमुखानि क्लान्तानि खेदाम्बुस्नपितानि कान्तान् स्वपतीनवलोकयन्तीति ॥ २२ ॥

पुनर्योगान्तरमाह ।

पूर्वोक्तयोगे धनगो बुधश्चे-
च्छशाङ्कसूर्यौ च दशायसंस्थौ ।
अस्मिन् गतस्यालिकुलोपगीता
नानावनोत्था द्विरदा भवन्ति ॥ २३ ॥

पूर्वोक्तयोग इति ॥ पूर्वोक्तयोगे पूर्वप्रतिपादितयस्योदयास्तारिचतुस्त्रिसंस्था इति योगे चेद्यदि बुधो धनगो भवेत् । शशाङ्कसूर्यौ च दशायसंस्थौ भवतः । अस्मिन् योगे गतस्य प्रस्थितस्य नृपस्यालिकुलोपगीता भ्रमरचयोपगीता नानावनोत्था विविधारण्यजाता द्विरदा गजा भवन्ति शत्रोर्विजयादिति ॥२३॥

पुनर्योगान्तरमाह ।

सूर्यादयोऽरिसहजाम्बरशत्रुलग्न–
बंध्वायगाः सुरगुरोर्दिवसश्च यस्य ।
यानेऽरिसैन्यमुपगच्छति तस्य नाशं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मीमांसकश्रवणकेष्विव तीर्थपुण्यम् ॥ २४ ॥

सूर्यादय इति ॥ सूर्यादयः सप्तग्रहाः क्रमेणारि ६ सहजा ३ म्बर १० शत्रु ६ लग्न १ बन्ध्वायगाः ४ । ११ । याने यात्रायां यस्य सुरगुरोर्बृहस्पतेर्वारो भवति । तस्यारिसैन्यं मीमांसकश्रवणकेषु वृद्धश्रावकेषु तीर्थपुण्यमिव नाशमुपगच्छति विलयं प्रयाति २४

पुनर्योगान्तरमाह ।

त्रिनिधनतनुसप्तमारिसंस्थाः
कुजसितजीवबुधा रविश्च यस्य ।
खलजनजनितेव लोकयात्रा
न भवति तस्य चिराय शत्रुसेना ॥ २५ ॥

त्रिनिधनतनुसप्तमारिसंस्था इति ॥ यस्य याने यात्रासमये कुजसितजीवबुधा रविश्च त्रि ३ निधन ८ तनु १ सप्तमा ७ रि ६ संस्थाः क्रमेण भवन्ति । तस्य राज्ञः शत्रुसेना चिराय बहुकालं न भवति खलजनजनिता लोकयात्रा परलोकगमनमिव अर्थाद्यथा खलजनानां स्वर्गगमनं दुर्लभं तथैव तत्सैन्यस्य शत्रुसेनाविजयो दुर्लभ इति ॥ २५ ॥

पुनर्योगान्तरमाह ।

कुजरविजयुतेऽरिभे गतानां
जलसहजोपगतैः सितार्कजीवैः ।
रिपुबलमुपयाति नाशमाशु
श्रुतमधनस्य कुटुम्बचिन्तयैव ॥ २६ ॥

कुजरविजयुत इति ॥ कुजरविजयुतेऽरिभे सति मङ्गलशनि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सहिते षष्ठराशौ सति । सितार्कजीवैः शुक्रसूर्यबृहस्पतिभिर्जल४ सहजो ३ पगतैश्चतुर्थतृतीयप्राप्तैः । अस्मिन् योगे गतानां प्रस्थितानां राज्ञां रिपुबलं शत्रुसैन्यमाशु शीघ्रं नाशमुपयाति । अधनस्य दरिद्रस्य कुटुम्बचिन्तयाऽऽत्माजनोदरपूरणचिन्तया श्रुतं शास्त्रमिव ॥ २६ ॥

पुनर्योगान्तरमाह ।

लग्नत्रिधर्मारिदशायगेषु
सितार्किजीवेन्दुकुजेन्दुजेषु ।
सार्के बुधे चारिबलं विनाश-
मायाति गुह्यं पिशुनेष्विवोक्तम् ॥ २७ ॥

लग्नत्रिधर्मारिदशायगेष्विति । सितार्किजीवेन्दुकुजेन्दुजेषु शुक्रशनिगुरुविधुभौमबुधेषु क्रमेण लग्न १ त्रि ३ धर्मा ९ रि ६ दशायगेषु १० । ११ । सार्के सूर्यसहिते बुधे सति च शब्देनास्मिन्योगे गतस्य राज्ञोऽरिबलंशत्रुसैन्यं विनाशमायाति पिशुनेषु खलेषु गुह्यं रहस्यमुक्तं कथितमिवेति ॥ २७ ॥

पुनर्योगान्तरमाह ।

एकान्तरर्क्षे भृगुजात्कुजाद्वा
सौम्ये स्थिते सूर्यसुताद्गुरोर्वा ।
प्रध्वस्यतेऽरिर्नचिराद्गतस्य
वेषाधिको भृत्य इवेश्वरस्य ॥ २८ ॥

एकान्तरर्क्ष इति । भृगुजाच्छुक्रात्कुजान्मंगलाद्वा सौम्ये बुधे एकान्तरर्क्षे एकान्तरराशौ स्थिते । वा सूर्यसुताच्छनैश्चराद्गुरो-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बृहस्पतेर्वा एकान्तरराशौ सौम्ये स्थिते सति नाचिरादल्पकाला-मतस्य राज्ञोऽरिः शत्रुः प्रध्वस्यते प्रणश्यते प्रभोरग्रे वेषाधिको भृत्य इव सेवक इवेति ॥२८॥

पुनर्योगान्तरमाह ।

एकान्तरा यदि गता भवनेषु षट्सु
पृष्ठस्थितस्य सुरशत्रुगुरोः प्रयाणे ।
यातस्य नात्र रिपवो प्रसहन्ति वीर्यं
विष्णोरिवोद्धृतगदारथपादपाणेः ॥ २९ ॥

एकान्तरा यदीति । यदि षट्सु भवनेषु सर्वग्रहा एकान्तरगता अर्थात् कस्मादपि स्थानत एकान्तरेण षट्स्थानेषु भवेयुरिति । तथा यस्य प्रयाणे यात्रायां पृष्ठस्थितस्य सुरशत्रुगुरोः शुक्रस्य तस्य यातस्य अत्र रिपवः शत्रवो वीर्यं बलं न प्रसहन्ति न सहन्ते उद्धृतगदारथपादपाणोर्विष्णोरिवेति ॥ २९ ॥

पुनर्योगान्तरमाह ।

निरन्तरं यदि भवनेषु पञ्चसु
ग्रहाः स्थिता दिवसकरेण वर्जिताः ।
यियासतो यदि च भवन्ति पृष्ठत-
स्तदा परान् बलभिदिवावकृन्तति ॥३०॥

निरन्तरं यदि भवनेष्विति । यदि दिवसकरेण सूर्येण वर्जिता रहिताः सकलग्रहा निरन्तरमन्तररहितं यथा तथा पञ्चसु भवनेषु येष्वेव स्थानारम्भेषु स्थितास्तथा यदि यियासतो गमनशीलस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पृष्ठतः शुक्रो भवेत्तदा स परान् शत्रून् वज्रभिदिन्द्र इवावक्रान्ताति मारयतीति ॥ ३० ॥

पुनर्योगान्तरमाह ।

भृगुपुत्रमहेन्द्रगुरू गमने
सहितौ यदि भं युगपत्त्यजतः ।
ज्ञगुरू यदि वांशकमेकगतौ
समरे सुरराडिव भाति तदा ॥ ३१ ॥

भृगुपुत्रमहेन्द्रगुरू गमन इति । यदि सहितावेकचस्थितौ भृगुपुत्रमहेन्द्र गुरू शुक्रबृहस्पती गमने यात्रायां भं राशिं युगपदेकदैव त्यजतो जहतः । तदा समरे संग्रामे सुरराडिन्द्र इवाभाति । यदिवा ज्ञगुरू अंशकमेकगतौ तदा समरे सुराडिन्द्र इव भातीति ॥ ३१ ॥

पुनर्योगान्तरमाह ।

निस्त्रिंशवक्रोपगते च वक्रे
वक्रेण वक्रं नृपतिं निहन्यात् ।
पानप्रसक्तं निशि वा प्रसुप्तं
तस्यैव चास्ते यदि वांशकः स्यात् ॥ ३२ ॥

निस्त्रिंशवक्रोपगत इति ॥ वक्रे मङ्गले निस्त्रिंशवक्रोपगतेऽर्थात् निस्त्रिंशमुशलनाम्नि वक्रगतौ तर्हि वक्रेण कुटिलमार्गेण वक्रं कुटिलं नृपतिं राजानं निहन्यात् मारयेत् । वा पानप्रसक्तं मादकपानरतं निशि रात्रौ प्रसुप्तं तस्यैव मङ्गलस्य च शब्देन वक्रेण निहन्यात् यद्यस्ते सप्तमभावे तस्यैवांशकः स्यादिति इह कुजस्य पञ्चधा वक्रत्वं भवतीति यथोक्तं बृहत्संहितायां स्वयमेव वराहेणेति । उष्णमश्रुमुखं व्यालो लोहिताननमेव च । निस्त्रिंशमुशलं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चेति पंच वक्राः कुजस्येति । तत्रैव निस्त्रिंशवक्रो यथा । असिमुशलं सप्तदशादष्टादशतोऽपि वा तदनु वक्रे । दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयमिति ॥ ३२ ॥

पुनर्योगान्तरमाह ।

पुत्रो धरित्र्या दिनकृत्सुतश्च
यदा त्यजेतां युगपन्नवांशम् ।
तदाह्यवस्कन्दगतो नरेन्द्रो
भुङ्क्ते रिपून् तार्क्ष्य इव द्विजिह्वान् ॥ ३३ ॥

पुत्रो धरित्र्या इति ॥ धरित्र्याः पृथिव्याः पुत्रो मङ्गलो दिनकृत्सुतः शनिश्च यदा युगपदेकदैव नवांशं त्यजेताम् । तदा हि अवस्कन्दगतो सङ्ग्रामगतो नरेन्द्रो राजा रिपून् शत्रून् भुङ्क्ते भक्षणमिवकरोति । द्विजिह्वान् सर्पान् तार्क्ष्य इव गरुड इवानायासेन दर्शनमात्रेणैव वशीकुरुत इति ॥ ३३ ॥

पुनर्योगान्तरमाह ।

बुधभार्गवमध्यगते हिमगौ
हिबुकोपगते च नृपः प्रवसन् ।
पुरुहूतदिशं यदि वान्तकृतः
पुरुहूतयमप्रतिमो भवति ॥ ३४ ॥

बुधभार्गवमध्यगत इति ॥ हिबुकोपगते लग्नाच्चतुर्थगते हिमगौ चन्द्रे बुधभार्गवमध्यगते बुधशुक्रयोरन्तर्गते । अत्र योगे नृपो राजा पुरुहूतादिशं पूर्वदिशं प्रवसन् प्रविशन् वा यदि वान्तकृतो यमस्य दिशं दक्षिणां प्रविशन् पुरुहूतयमप्रतिमो भवति । पूर्वे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुरुहूत इन्द्रस्तत्प्रतिमस्तत्सदृशो भवति । दक्षिणे यमप्रतिमः कालसदृशो भवति उभयत्र शत्रुहन्ता भवतीति ॥ ३४ ॥

पुनर्योगान्तरमाह ।

सितेन्दुजौ चतुर्थगौ निशाकरश्च सप्तमे ।
यदा तदा गतो नृपः प्रशास्त्यरीन् विना रणान् ३५

सितेन्दुजाविति ॥ सितेन्दुजौ शुक्रबुधौ चतुर्थगौ निशाकरश्चन्द्रश्च सप्तमे यदा भवति तदा गतः प्रस्थितो नृपो राजा रणान् सङ्ग्रामान् विना । अरीन् शत्रून् प्रशास्ति प्रकर्षेण तदाधिपत्यं करोति स्ववशे विधायेति ॥ ३५ ॥

पुनर्योगान्तरमाह ।

शशिनि चतुर्थगृहं समुपेते
बुधसहितेऽस्तगते भृगुपुत्रे ।
गमनमवाप्य पतिर्मनुजानां
जयति रिपून् समरेण विनैव ॥ ३६ ॥

शशिनि चतुर्थगृहं समुपेत इति ॥ यदा शशिनि चन्द्रे चतुर्थगृहं समुपेते भृगुपुत्रे शुक्रे बुधसहितेऽस्तगते सप्तमभावगते प्राप्ते तदा मनुजानां नराणां पती राजा गमनमवाप्य यात्रां प्राप्य समरेण विनैव समरमकृत्वैव रिपून् शत्रून् जयति ॥ ३६ ॥

पुनर्योगान्तरमाह ।

क्षितितनययुतान्नवांशका-
द्यदि शतमे भृगुजोऽथवा गुरुः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शतगुणमपि हन्त्यरेर्बलं
विषमिव कायमसृक्पथोपपन्नम् ॥ ३७ ॥

क्षितितनययुतादिति ॥ क्षितितनययुतान्मङ्गलयुतान्नवांशाद्यदि शतमे शततमे नवांशे (नामैकदेशेन नामग्रहणमित्यनेनात्र शशब्देन शतं गृह्यते) नवांशे भृगुजः शुक्रोऽथवा गुरुर्भवति । अत्र योगे शतगुणमप्यरेर्बलं स्वबलात्स्वसेनायाः शतगुणमधिकं शत्रुसैन्यं हन्ति नाशयति । विषमिवेति असृक्पथोपपन्नं रुधिरमार्गेण प्राप्तं विषं कायं शरीरमिव । अर्थाद्यथा कयापि नाड्या शरीरान्तर्गतं विषं तच्छरीरं नाशयति तथा ॥ ३७ ॥

पुनर्योगान्तरमाह ।

शतांशकादूर्ध्वमवस्थिते बुधे
यमारयोस्तत्र गतस्य भूभृतः ।
प्रयाति नाशं समरे द्विषद्बलं
यथार्थिभावोपगतस्य गौरवम् ॥ ३८ ॥

शतांशकादूर्ध्वमिति ॥ यमारयोः शतांशकादूर्ध्वम् । यमः शनिः । आरो मंगलस्तत्र शनिर्यस्मिन्नवांशके स्थितस्तत्रैवारो मंगलस्तस्मान्नवांशकाच्छतांशकादूर्ध्वमवस्थिते बुधे सति । तत्र तस्मिन्योगे गतस्य प्रस्थितस्य भूभृतो राज्ञो द्विषद्बलं शत्रुबलं समरे संग्रामे नाशं प्रयाति । यथार्थिभावोपगतस्य याचकस्य गौरवं नाशं प्रयाति ॥ ३८ ॥

अथपुनर्योगान्तरमाह ।

नक्षत्रमेकं युगपत्प्रविष्टौ
यदा धरित्रीतनयामरेज्यौ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुर्यात्तदान्तं द्विषतो बलस्य
द्रौणिर्यथारीन्निशि सौप्तिकेन ॥ ३९ ॥

नक्षत्रमेकमिति । यदा धरित्रीतनयामरेज्यौ मंगलबृहस्पती एक-नक्षत्रं युगपदेकदैव प्रविष्टौ भवतस्तदा प्रस्थितो नृपो द्विषतां शत्रूणां बलस्य सैन्यस्यान्तं नाशं कुर्यात् । यथा निशि रात्रौ द्रौणिर्द्रोणस्यापत्यं पुमान् द्रौणिरश्वत्थामा सौप्तिकेन अरीन् शत्रून् प्रणाशितवान् ॥ ३९ ॥

पुनर्योगान्तरमाह ।

ऋक्षं गुरुज्ञौ बुधभार्गवौ वा
यदा प्रविष्टौ युगपत्समेतौ ।
अर्थानवाप्नोति तदा विचित्रान्
छात्रः सुतीर्थान् गुरुपूजयैव ॥ ४० ॥

ऋक्षं गुरुज्ञाविति ॥ यदा गुरुज्ञौ बृहस्पतिबुधौ वा, बुधभार्गवौ बुधशुक्रौ समेतावेतौ ऋक्षं राशिं युगपत्प्रविष्टौ तदागन्ता विविधनानाश्चर्य्यजनकानर्थान् धनानि अवाप्नोति प्राप्नोति । यथा छात्रः शिष्यः छात्रान्तेवासिनौ शिष्य इत्यमरः । गुरुपूजया गुर्वाराधनेन सुतीर्थान् स्वागमान् सुशास्त्राणि अवाप्नोति । निपानागमयोस्तीर्थमित्यमरः ॥ ४० ॥

पुनर्योगान्तरमाह ।

यात्रादिगीशाद्यदि पञ्चमेऽन्यो
गृहे ग्रहो वीर्ययुतोऽवतिष्ठेत् ।
समुद्यताशाकथितानि भङ्क्त्वा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

फलानि वीर्यान्नयति स्वकाष्ठाम् ॥ ४१ ॥

यत्रादिगीशादिति ॥ यात्रादिगीशाद्गन्तव्यदिगीशाद्यदि पञ्चमे गृहेऽन्यो ग्रहो वीर्ययुतोऽवतिष्ठेत् तदाऽसौ बली समुद्यताद्याक-थितानि गन्तव्यदिक्कथितानि फलानि भङ्क्त्वा भङ्गं कृत्वा वीर्या-त्स्वबलात्स्वकाष्ठां स्वां दिशं नयति प्रापयति ॥ ४१ ॥

पुनर्योगान्तरमाह ।

एकोऽपि जीवज्ञसितासितानां
कुजात्त्रिकोणे रवितोऽथवेन्दुः ।
यत्रोद्यतस्तत्र न याति याता
तयोर्बलीयान्नयति स्वकाष्ठाम् ॥ ४२ ॥

एकोऽपीति ॥ जीवज्ञसितासितानां गुरुबुधभृगुशनीनामेकोऽप्ये-काक्यपि कुजान्मङ्गलात्त्रिकोणे नवमे वा पञ्चमे भवति । अथवा रवितः सूर्यादिन्दुश्चन्द्रस्त्रिकोणे भवति । तदा याता गन्ता यत्रो-द्यतो यस्यां दिशि गन्तुमुद्यतस्तत्र दिशि न याति न गच्छति । तयोर्बलीयान्नुद्दिष्टप्रतिबन्धदिगीशयोर्यो बलाधिकोऽसौ स्वकाष्ठां स्वदिशं तं नयतीति ॥ ४२ ॥

पुनर्योगान्तरमाह ।

जन्मोदयर्क्षं हिबुकास्तसंस्थं
यस्याशुभैर्दृष्टयुतं न सौम्यैः ।
स शांडिलीं प्राप्य यथा गरुत्मान्
दैन्यं गतोऽभ्येति हतस्वपक्षः ॥ ४३ ॥

जन्मोदयर्क्षमिति ॥ यस्य पुंसो जन्मोदयर्क्षं हिबुकास्तसंस्थं चतुर्थसप्तमस्थमशुभैः पापैर्दृष्टयुतं सौम्यैः शुभग्रहैर्न दृष्टयुतं यात्रा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समये । स पुमान् गन्ता शाल्मलिं प्राप्य गरुत्मान् गरुड इव दैन्यं दीनतां गतः प्राप्तो हतस्वपक्षोऽभ्येति ॥ ४३ ॥

पुनर्योगान्तरमाह ।

होराष्ठमे जन्मगृहाष्टमे वा
स्वाच्छत्रुभाच्छत्रुगृहोदये वा ।
तद्राशिपैर्वा गमनं विलग्ने
तुल्यं नराणां विषभक्षणेन ॥ ४४ ॥

होराष्टम इति ॥ होराष्टमे स्वजन्मलग्नादष्टमोदये वा जन्मगृहाष्टमे जन्मराशितोऽष्टमे राशौ लग्ने वा स्वादात्मनः शत्रुभाच्छत्रुराशेः शत्रुगृहोदये स्वशत्रुराशितः षष्ठराश्युदये वा अत्र गमनं नराणां विषभक्षणेन तुल्यं परिणामेऽनर्थास्पदं भवति । तद्राशिपैर्वेति तद्राशिपैर्जन्मलग्नराश्यष्टमशत्रुराशिषष्ठस्वामिभिर्लग्नेस्थितैर्वा विषभक्षणेन तुल्यं गमनं भवतीति ॥ ४७ ॥

पुनर्योगान्तरमाह ।

रिपुनिधनविलग्ने स्वात्त्रिषड्लाभगे वा
बलवति भवनेशे स्वे कृशे शत्रुपक्षे ।
अनभिमुखदिगीशे दिक्पतौ सुस्थिते च
व्रजति यदि यथेष्टं प्राप्नुयात्तत्र याता ॥ ४५ ॥

रिपुनिधनविलग्नइति ॥ स्वे भवनेशे स्वभवनस्वामिनि बलवति बलयुक्ते रिपुनिधनविलग्ने षष्ठाष्टमलग्ने । वा स्वात्स्वस्थानात् त्रिषड्लाभगे । स्वे शत्रुपक्षे कृशे दुर्बले । अनभिमुखदिगीशे सम्मुखेतरादिशि स्थिते दिक्स्वामिनि । दिक्पतौ दिगीशे सुस्थिते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शोभनस्थानस्थिते । अत्र यदि याता गन्ता व्रजति गच्छति तर्हि यथेष्टं यथेप्सितफलं प्राप्नुयात् ॥ ४५ ॥

पुनर्योगान्तरमाह ।

केन्द्रत्रिकोणेषु शुभाः प्रशस्ता-
स्तेष्वेव पापा न शुभप्रदाः स्युः ।
पापोऽपि कामं बलवन्नियोज्यः
केन्द्रेषु शून्यं न शिवाय केन्द्रम् ॥ ४६ ॥

केन्द्रत्रिकोणेष्विति । शुभाः शुभग्रहाः केन्द्रत्रिकोणेषु प्रशस्ता भवन्ति पापाः पापग्रहाः । यथोक्तं लघुजातके क्षीणेन्दुर्कयमारौः पापास्तैः संयुतः सौम्य इति । तेष्वेव केन्द्रत्रिकोणेषु १।४।५।७।९।१० न शुभप्रदाः स्युः शून्यं ग्रहरहितं केन्द्रं शिवाय मङ्गलाय न भवतीति ॥ ४६ ॥

पुनर्योगान्तरमाह ।

सौम्यैश्च पापैश्च चतुष्टयस्थैः
कृच्छ्रेण सिद्धिं समुपैति याता ।
प्रपातपातप्रतिघातवक्रै-
र्नदीव धात्रीधरकन्दरेषु ॥ ४७ ॥

सौम्यैश्च पापैश्चेति ॥ सौम्यैः शुभग्रहैः पापैः पापग्रहैश्च चतुष्टयस्थैः केन्द्रस्थैर्याता गन्ताऽत्र कृच्छ्रेण कष्टेन सिद्धिं कार्यसिद्धिं समुपैति गच्छति । अत्र दृष्टान्तमाह प्रपातपातप्रतिघातवक्रैः प्रकर्षेण पातः पतनं प्रपातः । प्रपाते पातः प्रपातपातः । प्रपातपाते प्रतिघात इति । तथा तेन प्रपातपात-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिघातेन वक्राः कुटिला इति तथा तैः प्रपातपातप्रतिघातवक्रैर्धात्रीधरकन्दरेषु भूधरदरीषु नदीव कृच्छ्रेण स्वाभिलषितस्थानं समुपैति ॥ ४७ ॥

पुनर्योगान्तरमाह ।

गुरौ विलग्ने भृगुजेऽरिसंस्थे
चन्द्रेऽष्टमे हन्ति गतोऽरिसेनाम् ।
धिष्टं यथा दक्षिणमार्गचारी
रूक्षोऽथवा ह्रस्वतनुश्च शुक्रः ॥ ४८ ॥

गुरौ विलग्न इति ॥ गुरौ बृहस्पतौ विलग्ने सति । भृगुजे शुक्रेऽरिसंस्थे षष्ठस्थे चन्द्रेऽष्टमे लग्नादष्टमे । अत्र योगे गतः प्रस्थितोऽरिसेनां शत्रुबलं निहन्ति नाशयति । यथा दक्षिणमार्गचारी सरलवर्त्मगामी अर्थान्नीतिपूर्वकगामी रूक्षः कान्तिहीनोऽथवाऽसौ ह्रस्वतनुर्वामनः च शब्देन दक्षिणमार्गचारी शुक्र एवं क्षो धिष्ठं कुटिलं हन्ति नाशयतीति ॥ ४८ ॥

पुनर्योगान्तरमाह ।

सिंहाजतौलिमिथुना मृगकर्कटौ च
स्वेशान्विता यदि भवन्ति शनिश्च लग्ने ।
तत्सैनिकाः परबलं क्षपयन्ति यातु-
र्मूर्खस्य वित्तमिव चारणचाटुकाराः ॥ ४९ ॥

सिंहाजतौलिमिथुना इति ॥ यदि सिंहाजतौलिमिथुना मृगकर्कटौ च । एते राशयः स्वेशान्विताः स्वस्वस्वामियुता भवन्ति । शनिश्च लग्ने भवति । तत्तस्य यातुर्गन्तुः सैनिकाः सेनारक्षकाः । सेनारक्षास्तु सैनिका इत्यमरः । परबलं शत्रुसैन्यं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्षपयन्ति नाशयन्ति । चारणचाटुकाराः मूर्खस्याज्ञस्य वित्तमिवेति । चारणाः कुशीलवा नटविशेषाः चारणास्तु कुशीलवा इत्यमरः । चाटुकाराः प्रेम्णा मिथ्यावादिनः । अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनमित्यमरः । यथानटविशेषप्रीतिपूर्वकमिथ्यावादिनो मूर्खस्य धनं नाशयन्तीति ॥४९॥

पुनर्योगान्तरमाह ।

उदये गुरुसौम्यभार्गवैः
सहजेऽर्कार्किकुजैश्च गच्छतः ।
न भवन्त्यरयो रणे स्थिराः
कितवानामिव वित्तसञ्चयाः ॥ ५० ॥

उदये गुरुसौम्यभार्गवैरिति ॥ गुरुसौम्यभार्गवैर्बृहस्पतिबुधशुक्रैः । उदये लग्ने स्थितैरर्कार्किकुजैश्च रविशनिमङ्गलैः सहजे स्थितैः । अत्र गच्छतो नृपस्य रणे संग्रामेऽरयः शत्रवः स्थिरा न भवन्ति । कितवानां मिथ्याहितवादिनां धूर्तानां धनसञ्चया इवेति ॥ ५० ॥

पुनर्योगान्तरमाह ।

जातकोक्तनृपयोगगतानां
प्रत्यहं भवति राज्यविवृद्धिः ।
वातघूर्णितमिवार्णवयानं
परबलं समुपैति विनाशम् ॥ ५१ ॥

जातकोक्तनृपयोगगतानामिति ॥ जातकोक्तनृपयोगगतानां बृहज्जातकादिकथितराजयोगप्रस्थितानां प्रतिदिनं दिनं दिनं प्रति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

राज्यविद्धिर्भवति । वातघूर्णितपर्णचयानमिव वायुभ्रमितसमुद्र-
चोदितमिव परबलं शत्रुसैन्यं विनाशं समुपैति ॥ ५१ ॥

पुनर्योगान्तरमाह ।

होराश्रिते देवगुरौ प्रयाता
क्रूरग्रहैः कर्मणि लाभगैर्वा ।
कृत्वा रिपूणां क्षयमक्षताङ्गः
स्वयं क्षितीशोऽक्षयकोशमेति ॥ ५२ ॥

होराश्रित इति ॥ देवगुरौ बृहस्पतौ होराश्रिते लग्नस्थिते क्रूरग्रहैः पापग्रहैः कर्मणि दशमे स्थितैर्वा लाभगैरेकादशस्थैरक्षताङ्गः सन् रिपूणां शत्रूणां क्षयं कृत्वा स्वयं क्षितीशो राजाऽक्षयं नाशरहितं कोशमर्थराशिमेति प्राप्नोति ॥ ५२ ॥

पुनर्योगान्तरमाह ।

लाभार्थलग्नेषु शुभा रविः खे
यस्यारसौरौ सहजेऽरिभे वा ।
तस्यार्थकोशः समुपैति वृद्धिं
लाभो यथा प्रत्यहमर्थवृद्ध्या ॥ ५३ ॥

लाभार्थलग्नेष्विति ॥ यस्य गमने शुभाः शुभग्रहा अक्षीणविधुबुधगुरुभृगवो लाभार्थलग्नेषु स्थिताः । खे १० दशमे रविः सूर्यः । आरसौरौ मंगलशनी सहजे ३ तृतीये वाऽरिभे ६ षष्ठे । तस्यार्थकोशो वृद्धिं समुपैति । यथा प्रत्यहं प्रतिदिनमर्थवृद्ध्या धनचयेन यथा लाभः प्राप्तिर्भवतीति ॥ ५३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्योगान्तरमाह ।

स्वोच्चोपगैर्जीवकुजार्कजार्के-
रेभिस्त्रिभिर्वा कथितैकलग्ने ।
राज्ञः प्रणाशं समुपैति शत्रुः
सौख्यं द्विभार्यस्य यथाऽधनस्य ॥ ५४ ॥

स्वोच्चोपगैरिति ॥ जीवकुजार्कजार्कैरेभिश्चतुर्भिर्वा त्रिभिः स्वोच्चोपगैर्निजनिजोच्चगैः कथितैकलग्ने सति । अत्र प्रस्तारेण षोडशयोगा भवन्ति । अत्र योगे प्रस्थितस्य राज्ञः शत्रुः प्रणाशं प्रकर्षेण नाशं समुपैति । यथाऽधनस्य धनरहितस्य द्विभार्यस्य द्वे भार्ये यस्येति तथा तस्य । सौख्यं नाशं समुपैति ॥ १४॥

पुनर्योगान्तरमाह ।

एकोऽपि जीवार्ककुजार्कजानां
स्वोच्चे विलग्ने स्वगृहे यदीन्दुः ।
जातस्य यान्त्यत्र पराः प्रणाशं
महाकुलानीव कुटुम्बभेदैः ॥ ५५ ॥

एकोऽपीति ॥ जीवकुजार्कजानां गुरुमङ्गलशनैश्चराणामेको ऽपि स्वोच्चे विलग्ने भवति । स्वोच्चे भूत्वा लग्ने सति । यदीन्दुश्चन्द्रः स्वगृहे कर्के भवति । अत्र योगे यातस्य प्रस्थितस्य पराः शत्रवः प्रणाशं यान्ति गच्छन्ति । कुटुम्बभेदैः स्वजनभेदैरात्मीयविग्रहैर्महाकुलानिवेति ॥ ५५ ॥

पुनर्योगान्तरमाह ।

लग्नाच्चतुर्थेऽतिबले शशाङ्के

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

योगाद्विना चन्द्रबलेन याता ।
लब्ध्वापि लक्ष्मीं बहुरत्नपूर्णां
क्षिप्रं क्षयं याति यथा शशाङ्कः ॥ ५६ ॥

लग्नाच्चतुर्थ इति ॥ अतिबले शशाङ्के चन्द्रे लग्नाच्चतुर्थे योगाद्विना इतरसुयोगं वर्जयित्वा चन्द्रबलेन याता गन्ता बहुरत्नपूर्णां लक्ष्मीं लब्ध्वाऽपि क्षिप्रं शीघ्रं क्षयं नाशं याति यथा शशाङ्कश्चन्द्रोऽतिपूर्णत्वं गत्वा पुनः क्षीयते तथैवेति ॥ ५६ ॥

पुनर्योगान्तरमाह ।

येषां गमे नवमपञ्चमकण्टकस्थाः
सौम्यास्तृतीयरिपुलाभगताश्च पापाः ।
आयान्ति ते स्वभवनानि पुनः कृतार्था
दत्ताद्विजातिषु पुरा विधिवद्यथार्थाः ॥ ५७ ॥

इति श्रीवराहमिहिराचार्य्यविरचितायां योगयात्रायां
योगाध्यायश्चतुर्थः ॥ ४ ॥

येषामिति ॥ येषां राज्ञां गमे यात्रायां सौम्याः शुभग्रहा नवमपञ्चमकण्टकस्थाः त्रिकोणकेन्द्रस्थाः । पापास्तृतीयरिपुलाभगताः । ते राजानः पुनः कृतार्थाः कृतोऽर्थः प्रयोजनसिद्धिर्यैस्ते तथेति स्वभवनानि निजगृहाणि आयान्ति । यथा पुरा पूर्वं द्विजातिषु ब्राह्मणेषु विधिवद्विधिपूर्वकं यथा भवति तथा दत्ता अर्था आयान्ति यथा पूर्वस्मिन् समये स्वादरपूर्वकं ब्राह्मणेषु कृतदाना विषमेष्वपि स्थानेषु स्वकार्यं साधयित्वा गृहमायान्तीति ॥ ५७ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां
योगाध्याश्चतुर्थः ॥ ४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ मिश्रकाध्यायो व्याख्यायते तत्रादौ पूर्वादिदिक्षु राशिनक्षत्रकथनपूर्वकपारिघदण्डसर्वादिग्गमनार्ह-नक्षत्र्याण्याह ।

पूर्वादितस्त्रिपरिवर्त्तगतैरजाद्यै-
र्मैस्सप्तकैरनलभाच्च गमो जयाय ।
वाय्वग्निदिक्स्थपरिघस्य समार्द्धगैश्च
मैत्राश्विहस्तगुरुभेषु च सर्वदिक्षु ॥ १ ॥

पूर्वादितस्त्रिपरिवर्त्तगतैरिति ॥ पूर्वादितः दिशस्त्रिपरिवर्त्त-गतैस्त्रिरावृत्तिगतैरजाद्यैर्मेषाद्यै राशिभिर्भवति। मेषः पूर्वे। वृषो दक्षिणे मिथुनं पश्चिमे। कर्क उत्तरे। एवं पुनः पुनः स्थापनेन त्रिस्त्रि-राशयो भवन्ति पूर्वादौ। तत्र पूर्वादिदिक्ष्वनलभात्कृत्तिकातः सप्त-कैर्भैर्नक्षत्रैर्गमो यात्रा जयाय भवति वाय्वग्निदिक्स्थपरिघस्य स-मार्द्धगैश्च मैत्राश्विहस्तगुरुभेषु चानुराधाश्विनीकरपुष्येषु च नक्ष-त्रेषु सर्वदिक्षु यात्रा शुभाय भवतीति ॥ १ ॥

अथ दिक्षु भशूलमाह ।

पूर्वेणैन्द्रं दक्षिणेनाजपादं
रोहिण्योऽतश्चार्यमाख्यं च शूलम् ।
कामं यायात्सम्परायेषु कार्ये-
ष्वेवंद्वारे प्रोक्त शूलानि तानि ॥ २ ॥

पूर्वेणैन्द्रमिति ॥ पूर्वेण पूर्वदिशा ऐन्द्रं इन्द्रसम्बन्धिनक्षत्रं ज्येष्ठाख्यं दक्षिणेनाजपादं पूर्वभाद्रपदं रोहिण्योऽतश्चार्यमाख्यमुत्तर-फाल्गुनीभं क्रमेण पश्चिमोत्तरे। इति शूलं ज्ञेयम्। एवं द्वारे पूर्वादि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिशि शूलानि तानि मोक्ष त्यक्त्वा सम्परायेषु युद्धादिषु। युद्धा-यत्योः साम्पराय इत्यमरः। कार्य्येषु कामं यथेच्छं यायात् गच्छेदिति ॥ २ ॥

अथ मध्यमनक्षत्राणां परिहारमाह।

विवर्जयेत्त्वाष्ट्रयमोरगाणा-
मर्द्धं द्वितीयं गमने जयेप्सुः।
पूर्वार्द्धमाग्नेयमघानिलानां
स्वाती मघां चोशनसः समस्ताम् ॥ ३ ॥

विवर्जयेदिति ॥ त्वाष्ट्रयमोरगाणां चित्राभरण्यश्लेषाणां द्वितीयमुत्तरमर्द्धं गमने जयेप्सुर्जयेच्छुर्विवर्जयेत्। आग्नेयमघानिलानां कृत्तिकामघास्वातीनां पूर्वार्द्धं विवर्जयेत्। स्वातिं मघां चोशनसः शुक्रस्य मते समस्तां सम्पूर्णां विवर्जयेत् ॥ ३ ॥

अथ सुयोगेऽप्युत्पातक्रूरग्रहपीड़ितनक्षत्रे गमननिषेधं दृष्टान्तेनाह।

उत्पातपापग्रहपीड़िते भे
ये यान्ति भूरिग्रहसंयुते वा।
ते पूर्ववित्तान्यपि नाशयन्ति
धातुप्रशक्ता इव मूर्तिकेन्द्राः ॥ ४ ॥

उत्पातपापग्रहपीडित इति ॥ उत्पातपापग्रहपीडिते भे उत्पातस्त्रिविधो दिविभूम्यन्तरिक्षजः। पापग्रहः क्रूरग्रहः ताभ्यां पीड़िते हते भे नक्षत्रे भूरिग्रहसंयुते बहुग्रहसंयुते वा ये राजानो यान्ति गच्छन्ति ते पूर्ववित्तान्यपि पूर्वधनान्यपि नाशयन्ति। धातुप्रशक्ता

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धातुप्रधानाः धातुः कांस्यादिः । तद्रचिता मूर्तिकेन्द्रा मूर्तीनां देवप्रतिमानां मध्ये इन्द्रा इव । यथा प्रतिमानां धातुरचितेन्द्रप्रतिमा धनानि नाशयन्ति इन्द्रस्य धातुप्रतिमाऽर्थहारिणीति प्रतिमानिर्माणविधौ प्रसिद्धम् ॥४॥

अथ दिगीशकथनपूर्वकललाटीनिषेधं दृष्टान्तेनाह ।

रविसितकुजराहुसौरिचन्द्रा
ज्ञगुरुयुताः पुरतः क्रमाद्दिगीशाः ।
व्रजति यदि ललाटगे दिगीशे
पतति ततो द्रुमवत्सरित्तटात्सः ॥ ५ ॥

रविसितकुजराहुसौरिचन्द्रा इति ॥ रविसितकुजराहुसौरिचन्द्रा ज्ञगुरुयुताः पुरतः पूर्वाग्नेयदक्षिणनैऋत्यपश्चिमवायूत्तरैशानेषु क्रमाद्दिगीशा दिक्स्वामिनो भवन्ति । यदि ललाटगे दिगीशे दिक्स्वामिनि सति व्रजति ततो गमनानन्तरं पतत्यसौ गन्ता सरित्तटात् सरोवरकूलाद्द्रुमवद्वृक्षवदिति ॥ ५ ॥

अथायनप्रतिलोमनिषेधं दृष्टान्तेनाह ।

यातोऽयनस्य प्रतिलोमकाष्ठां
यः स्यात्स्वतन्त्रोऽपि जितः परेषाम् ।
स केवलव्याकरणाभियुक्तः
काव्यज्ञगोष्ठ्यामिव हास्यमेति ॥ ६ ॥

यातोऽयनस्येति ॥ योऽयनस्य सौम्ययाम्यायनास्य यथोक्तं सौम्ययाम्यायने मकरकर्कटयोर्निरुक्त इति प्रतिलोमकाष्ठां विलोमकाष्ठां उत्तरायणे दक्षिणम् दक्षिणायने उत्तरम् । यातो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गतः स्यात् । स्वतन्त्रोऽपि स्वाधीनोऽपि स शत्रूणां जितो भवति। यथा केवलव्याकरणाभियुक्त एक एव शब्दशास्त्राधीतः काव्यज्ञगोष्ठ्यां काव्यनिपुणसभायां हास्यमुपहास्यतां प्राप्नोतीति ॥ ६ ॥

अथायनवशेन गमनप्रशंसां दृष्टान्तेनाह ।

अयनेन गतोऽर्कसोमयो-
र्द्युनिशं वा स्थितयोःपृथक् पृथक् ।
विदुषामिव सर्वशास्त्रवित्
समवाये द्विषतां विराजते ॥ ७ ॥

अयनेनेति ॥ अर्कचन्द्रयोरयनेन यदि गतः प्रस्थितो भवेत् अर्थादर्कचन्द्रौ यद्युत्तरायणे तदोत्तरां गतो यदि दक्षिणे तदा दक्षिणां गतो वा पृथक् पृथक् स्थितयोस्तयोर्द्युनिशं दिवारात्रौ गतः प्रस्थितः । अर्थात् यदि सूर्य उत्तरायणे चन्द्रो दक्षिणायने तदोत्तरां दिने गतो दक्षिणां रात्रौ प्रस्थितस्तदा विदुषां पण्डितानां मध्ये सर्वशास्त्रविदिव सकलनिगमागमाचार्यवद्द्विषतां शत्रूणां मध्ये विराजते शोभत इति ॥ ७ ॥

अथ रिक्तायां भद्रायां गमननिषेधमाह ।

तिथिं चतुर्थीं नवमीं चतुर्दशीं
विहाय विष्टिं करणं च गच्छतः ।
भवन्ति चामीकरवाजिवारणा-
श्चतुर्थिपूर्वाश्च तदाप्तिवारणाः ॥ ८ ॥

तिथिमिति ॥ चतुर्थीं नवमीं चतुर्दशीं तिथिं विहाय त्यक्त्वा च शब्देन विष्टिं भद्राख्यं करणं विहाय गच्छतो राज्ञश्चामीकर-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाजिवारणा भवन्ति । अर्थात् सुवर्णाश्वहस्तिनो भवंति चतुर्थिपूर्वास्त्रितिथयो विष्टयश्च तदाप्ति वारणास्तेषां सुवर्णाश्वहस्तीनां प्राप्तौ वारणा प्रतिबन्धका भवन्तीति ॥ ८ ॥

अथ दुष्टतिथिनक्षत्रयोगगमनं निषेधयति दृष्टान्तेन ।

ऋक्षे तिथौ वा व्यतिपातदुष्टे
यो याति मोहात्खलु वैधृतौ वा ।
स नाशमायात्यचिरेण याता
राजेव दैवज्ञविलोमचेष्टः ॥ ९ ॥

ऋक्षे तिथाविति ॥ दुष्टे निषिद्धे ऋक्षे नक्षत्रे वा दुष्टे तिथौ रिक्तादौ व्यतिपातदुष्टे व्यतिपातादिदुष्टयोगे यो मोहान्मोहवशाद्याति गच्छति वा वैधृतौ पाते खलु निश्चयेन याति । स याता गन्ता अचिरेण लघुसमयेन नाशमायाति नाशं प्राप्नोति । दैवज्ञविलोमचेष्टो राजेव गणकदृष्टिप्रतिकूलप्रभावो नृप इवेति ९

अथ विहितनक्षत्रादिफलमाह ।

आरोग्यमृक्षेण धनं क्षणेन
कार्यस्य सिद्धिस्तिथिना शुभेन ।
राश्युद्गमेनाध्वनि सिद्धिमाहुः
प्रायः शुभानि क्षणदाकरेण ॥ १० ॥

आरोग्यमृक्षेणेति ॥ ऋक्षेण विहितेनारोग्यमेति । क्षणेन सुमुहूर्तेन धनमेति । शुभेन तिथिना कार्यस्य सिद्धिः स्यात् । राश्युद्गमेन सुलग्नोदयेनाध्वनि मार्गे सिद्धिमाहुराचार्याः । प्रायो बाहुल्येन क्षणदाकरेण शुभनिशाकरेण शुभचन्द्रेण आचार्याः शुभान्याहुः ॥ १० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ कथिताचारविराजमानस्यैव यात्रा फलदा भवतीति दृष्टान्तेनाह ।

न राजते भूरिगुणान्विताऽपि
व्यर्थव्ययस्य क्षितिपस्य यात्रा ।
शुक्रे प्रणष्टे धनदर्पितस्य
विवाहयात्रेव जरार्दितस्य ॥ ११ ॥

न राजत इति ॥ भूरिगुणान्विताऽपि बहुसुगुणयुक्ताऽपि क्षितिपस्य राज्ञो यात्रा व्यर्थव्ययस्याऽनुचितधनादिव्ययशालिनो न राजते न शोभते । शुक्रे कन्दर्पे प्रणष्टे प्रकर्षेण नष्टे सति धनदर्पितस्य धनगर्वितस्य जरार्दितस्यातिवृद्धस्य पुंसो विवाहयात्रेव सा विफलेति ॥ ११ ॥

अथ संमुखशुक्रबुधवज्रपातहतदिक्फलं दृष्टान्तेनाह ।

प्रतिशुक्रबुधाशनिवृष्टिहता
दिगधः कुरुते नृपतिं गमने ।
मदिरामुदिता मदनाकुलिता
प्रमदेव कुलं परवेश्मरता ॥ १२ ॥

प्रतिशुक्रबुधेति ॥ प्रतिशुक्रबुधाशनिवृष्टिहतादिक् गमने नृपतिं राजनमधः कुरुते । संमुखशुक्रबुधवज्रवर्षणपीडिताऽऽशा गमने यात्रायां राजानं गमनफलान्नीचैः कुरुते । मदिरामुदितेति । मदिरामुदिता सुरापानहर्षिता । मदनाकुलिता कामाकुलिता । परवेश्मरता परभवनासक्ता । प्रमदा कामिनी । कुलमिव । एतादृशी कामिनी यथा पतिपितृमातृकुलमधो लज्जावनतं कुरुते तथैवेयं यात्रा गन्तारमधः कुरुत इति ॥ १२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ कदा यात्रा सफला भवतीत्याह दृष्टान्तेन ।

वीर्यान्वितैर्यायिभिरात्मभद्रैः
क्लेशं विना हन्ति चमूमरीणाम् ।
त्रैलोक्यलाभेऽप्यसमाप्तकार्यां
तृष्णां यथा चीरफलाम्बुतुष्टः ॥ १३ ॥

वीर्यान्वितैरिति । यायिभिर्यायिसंज्ञैः पूर्वोक्तैर्ग्रहैर्वीर्यान्वितैर्बलयुक्तैः पुनः किम्भिविशिष्टैरात्मभद्रैः स्वकल्याणकारकैर्ग्रहै राजा क्लेशं विना युद्धादिश्रमसृतेऽरीणां शत्रूणां चमूं सेनां हन्ति नाशयति । त्रैलोक्यलाभेऽपीति त्रैलोक्यलाभेऽपि त्रैलोक्यराज्यप्राप्तेऽप्यसमाप्तकार्य्यां तृष्णां यथा चीरफलाम्बुतुष्टो योगी हन्तीति ॥१३॥

(अथ पूर्वाशादिप्रास्थानिकविधिप्रशंसां दृष्टान्तेनाह)

सर्पिस्तिलौदनमषैः पयसा च भुक्त्वा
पूर्वादिवारणरथाश्वनरैर्गतस्य ।
सोढुं प्रतापमरयो न नृपस्य शक्ता
गन्धद्विपस्य कलभा इव दानगन्धम् ॥ १४ ॥

सर्प्पिस्तिलौदनमषैरिति । सर्प्पिस्तिलौदनमषैर्घृततिलौदनमाषैः पयसा दुग्धेन च साकं भुक्त्वा पूर्वादिदिशं वारणरथाश्वनरैर्गतस्य अर्थात् पूर्वस्यां दिशि घृतसाकं भुक्त्वा वारणेन गजेन गतस्य प्रास्थितस्य दक्षिणे तिलौदनसाकं भुक्त्वा रथेन गतस्य पश्चिमे माषसाकं भुक्त्वाऽश्वैर्गतस्य उत्तरे पयसा दुग्धेन साकं भुक्त्वा नरैर्नरयानैर्गतस्य नृपस्य राज्ञः प्रतापं सोढुमरयः शत्रवो न शक्ताः समर्था न भवन्ति । गन्धद्विपस्य गजविशेषस्य दानगन्धं मदवारि कलभाः करिशावका इवेति ॥ १४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ शकुनमनोवायुप्रशंसां चतुर्भिर्विशदयति ।

एकतश्च सकलानि निमित्ता-
न्येकतश्च मनसः परिशुद्धिः ।
चेतसोऽस्ति सहसा न रणे भी-
र्मारुतोऽपि विजयाजयहेतुः ॥१५॥

एकतश्चेति ॥ एकतश्चैकत्र सकलानि निमित्तानि सकलशुभसूचकशकुनानि । एकतश्चान्यत्र मनसश्चेतसः परिशुद्धिः परिशुद्धता । चेतसः परिशुद्धे राज्ञः सहसाऽतर्कितेन रणे सङ्ग्रामे भीर्भयं न भवति । अन्यतो मारुतोऽपि वायुरपि विजयाजयहेतुर्जयपराजयकारणं भवतीति ॥ १५ ॥

भूरिशूरवरवाजिकुञ्जरा-
ज्ञातयुद्धगतयोऽभिमानिनः ।
क्वापि यान्ति घनतूलराशिव-
न्मारुताभिहतवक्षसोऽरयः ॥१६॥

भूरिशूरवरवाजिकुञ्जरा ॥ इति ॥ भूरिशूरवरवाजिकुञ्जरा बहुवीरप्रबलाश्वगजाः । ज्ञातयुद्धगतयः परिचितयुद्धक्रमाः । अत एवाभिमानिनोऽरयः शत्रवो मारुताभिहतवक्षसो वायुघातितोरस्थलाः सन्तः क्वापि कुत्रापि यान्ति पराभवं गच्छन्ति । घनतूलराशिवत् मेघकार्पाससमुदायवद्विलयं यान्तीति ॥१६॥

अनुलोमगते प्रदक्षिणे
सुरभौ देहसुखेऽनिले गतः ।
तिमिराणि गभस्तिमानिव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रसभं हन्ति बलानि विद्विषाम् ॥ १७ ॥

अनुलोमगत इति॥ अनुलोमगते सन्मुखप्राप्ते प्रदक्षिणे स्वदक्षिणभागगते सुरभौ सुगन्धयुक्ते (सुरभिर्घ्राणतर्पणः । इष्टगन्धः सुगन्धिः स्यादित्यमरः) देहसुखे शरीरसुखजनकेऽनिले वायौ गतः प्रस्थितः सन् प्रसभं बलात् विद्विषां शत्रूणां बलानि सैन्यानि हन्ति नाशयति । तिमिराणि अन्धकारान् गभस्तिमान् सूर्य इवेति ॥ १७ ॥

उपपत्तिरयत्नतो यदा
तृणयानाशनरत्नवाससाम् ।
प्रमदाक्षितिनागवाजिनां
विजयद्वारमपावृतं तदा ॥ १८ ॥

उपपत्तिरिति ॥ यदा तृणयानाशनरत्नवाससां यात्रासमये घासवाहनभक्ष्यमणिवस्त्राणां प्रमदाक्षितिनागवाजिनां कन्याभूगजाश्वानामयत्नतोऽनायासत उपपत्तिरुपपन्नं प्राप्तिर्भवति तदा तस्मिन् गमने विजयद्वारं जयगृहमुखमपावृतं न आवृतं वेष्टितमित्यपावृतं ज्ञेयमिति ॥ १८ ॥

अथ विशेषमाह ।

लग्नस्य येंऽशा ह्युदिता ग्रहो य-
स्तेषु स्थितो लग्नफलं स धत्ते ।
यस्तानतीतः स भवेद्द्वितीयः
स्थानेषु शेषेष्वपि चिन्त्यमेतत् ॥१९॥

लग्नस्य येंऽशाह्युदिता इति। लग्नस्य यात्रालग्नस्य येंऽशा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ये लवा हि उदिता भुक्तास्तेषूदितांशेषु यो ग्रहः स्थितोऽसौ लग्नोत्पन्नफलं धत्ते ददाति । यो ग्रहस्तानुदितांशानतीतोऽतिक्रान्तः स द्वितीयो भवेत् । शेषेषु लग्नेतरस्थानेष्वपि एतच्चिन्त्यमिति ॥ १९ ॥

अथान्यदाह ।

गतोऽनुकूलैर्ग्रहभाग्निमारुतै-
र्मनोऽब्दविद्युत्स्वनवृष्टिकार्मुकैः ।
रिपोः प्रमथ्नाति रणाजिरे चमूं
द्विपः समूलां सरसीव पद्मिनीम् ॥ २० ॥

गतोऽनुकूलैरिति । अनुकूलैर्ग्रहभाग्निमारुतैः शुभफलप्रदैः खेटनक्षत्रवन्हिवायुभिरनुकूलैर्मनोऽब्दविद्युत्स्वनवृष्टिकार्मुकैः सुयोग्यैः । चित्तचपलारववर्षणेन्द्रधनुर्भिर्गतो गमनं रणाजिरे संग्रामांगणे रिपोः शत्रोश्चमूं सेनां प्रमथ्नाति प्रकर्षेण मथ्नाति । सरसि सरोवरे समूलां सकन्दलिकां पद्मिनीं कमलिनीं द्विप इव गज इवेति ॥ २० ॥

अथ दिष्टराहित्ये परिणतिमाह ।

दैवेन हीनः परभीषणार्थं
यातोऽतिकृच्छ्रेण नयत्यहानि ।
स्वशक्त्यतीतो नृपवेश्मनीव
कृत्वा प्रतिज्ञां प्रतिवादिभीतः ॥ २१ ॥

दैवेनेति । दैवेन प्रारब्धेन हीनो रहितः परभीषणार्थं शत्रुभीषणायातिकृच्छ्रेणातिकष्टेन यातो गतः सन् स्वशक्त्यतीत-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत्मबलातीतस्त्यक्तो नृपवेश्मनि राजगृहे प्रतिवादिभीतः विवादिभीतः प्रतिज्ञां वाढं कृत्वाऽह्वानि नयतीव भवतीति ॥२१॥

अथ दिष्टादिसम्पन्नस्य परिणामसुक्तमाह ।

दैवान्वितः साधुजनोपकारी
प्रभावमन्त्रोद्यमशक्तियुक्तः ।
भुङ्क्ते महीं सम्यगवाप्य यात्रां
ससह्यविन्ध्याचलपारियात्राम् ॥ २२ ॥

दैवान्वित इति । यो गन्ता दैवान्वितः सुप्रारब्धयुक्तः साधुजनोपकारी सुलोकोपकारी प्रभावमन्त्रोद्यमशक्तियुक्तः प्रभावश्च मन्त्रश्चोद्यमश्चेति तथा तेषां शक्तियुक्त इति तथा तत्र प्रभावशक्तिः कोशदण्डजन्तेजो मन्त्रशक्तिः सन्धिविग्रहादीनां मंत्रेण विचारेण यथावत्स्थापनम् । उद्यमशक्तिः विक्रमादिनोन्नति उद्यमशक्तिरेतैर्युक्तो यात्रामवाप्य कृत्वाससह्यविन्ध्याचलपारियात्रामेतत्प्रसिद्धकुलाद्रिसहितां महीं पृथ्वीं सम्यग्भुङ्क्ते सम्यगकण्टकं भोगं कुरुत इति ॥ २२ ॥

अथाष्टवर्गशुभदेऽपि गोचरदुष्टे चन्द्रे परिणतिमाह ।

गोचरेण शुभदः शशी न चे-
दष्टवर्गपरिशोधितोऽपि वा ।
पूर्ववायुरिव पुष्पकालजो
यायिनां फलविनाशकृद्भवेत् ॥ २३ ॥

गोचरेणेति । गोचरेण गोचरप्रकारेण शशी चन्द्रः शुभदः शोभनफलदो न चेदष्टवर्गपरिशोधितोऽपि वा जातकोक्तशुभाशुभ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विचारेणाधिकशुभदोऽपि यायिनां गमनशीलानां फलविनाशकृद्भवेत् । पुष्पकालजो वसन्तर्त्तुभवः पूर्ववायुरिव । यथा पूर्ववायुर्वसन्तर्त्तौ सकलसस्यसम्पन्नाशको भवति इति ॥ २३ ॥

अथ चन्द्रस्यैव बलाबलमाश्रित्य ग्रहाः शुभाशुभफलानि ददतीत्याह सदृष्टान्तकम् ।

आश्रित्य चन्द्रस्य बलाबलानि
ग्रहाः प्रयच्छन्ति शुभाशुभानि ।
मनः समेतानि यथेन्द्रियाणि
कर्मार्हतां यान्ति न केवलानि ॥ २४ ॥

आश्रित्य चन्द्रस्येति ॥ चन्द्रस्य बलाबलानि आश्रित्याश्रयणं कृत्वा ग्रहाः सर्वे खेटाः शुभाशुभानि फलानि प्रयच्छन्ति । अर्थाद्यदि चन्द्रो बलशाली तदा ग्रहाः शुभान्येव फलानि प्रयच्छन्ति । यदाऽबलश्चन्द्रस्तदा ग्रहा अशुभानि प्रयच्छन्ति । यथेन्द्रियाणि वागादीनि मनःसमेतानि मनःसंयुक्तानि कर्मार्हतां कर्म्मकरणक्षमतां यान्ति । केवलानीन्द्रियाणि मनःसंयोगरहितानि न कर्मार्हतां यान्ति कर्मकरणतां न प्राप्नुवन्तीति स्पष्टम् ॥ २४ ॥

अथ शकुने विशेषमाह ।

सर्वतः क्षुतमशोभनमुक्तं
गोः क्षुतं मरणमेव करोति ।
केचिदाहुरफलं बलाच्च य-
द्वृद्धपीनसिनबालकृतं च ॥ २५ ॥

सर्वतः क्षुतमिति ॥ सर्वतः सर्वजीवानां क्षुतं छिक्काऽशोभनमशुभमुक्तम् । गोः क्षुतं मरणमेव करोति । अत्र गोः शब्देन प-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुमात्रं गृह्यते । केचिदाहुरिति । बलाच्च हठात्तमालपत्रचूर्णादिना यत्क्षुतं वृद्धपीनसिनबालकृतं च । वृद्धोऽतिवयस्कः । पीनसिनो श्लेष्मान्वितो बालो बालकः एतेषां कृतं क्षुत केचिदाचार्या अफलं शुभाशुभफलशून्यमाहुरिति ॥ २५ ॥

अथ सुशकुनादिलाभे प्रस्थानपदकथनं कुशकुनादावनिष्टंचाह

शकुनतिथिभलाभे छत्रशय्यासनाद्यं
पदमपि विजिगीषुश्चालयेच्छ्रद्दधानः ।
यदि शकुननिमित्तस्वप्नचेतोविशुद्धि-
र्न भवति तदनिष्टं सर्वकार्येषु यानम् ॥ २६ ॥

शकुनतिथिभलाभ इति ॥ शकुनतिथिभलाभे सुशकुनतिथिनक्षत्रप्राप्ते छत्रशय्यासनाद्यमातपत्रखट्वासनचामराद्यम् । आदिपदेनान्यत्प्रियं सर्वं पदमपि पदप्रक्षेपमात्रमपि श्रद्दधानो श्रद्धावान्राजा विजगीषुर्विजेतुमिच्छुश्चालयेत् । यदि शकुननिमित्तस्वप्नचेतोविशुद्धिर्न भवति । अर्थात्सुशकुनाङ्गस्फुरणस्वप्नमनः सुशुद्धिर्न भवति तदा सर्वकार्येषु सकलकामेषु तद्यानं गमनमनिष्टं ज्ञेयमिति ॥ २६ ॥

अथातो रव्यादिग्रहाणां दिवसाद्यंशवशेन फलविशेषमाहकुलकेन ।

दिनकृद्दिवसे तथांशके
यात्रालग्नगते ऽथवा रवौ ।
सन्तापयति स्मरातुरा
वेश्येवार्थविवर्जितं नरम् ॥ २७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिनकृद्दिवस इति ॥ दिनकृद्दिवसे सूर्यवासरे तथांशके सूर्यस्यांशेऽथवा रवौ यात्रालग्नगते गमनोदयप्राप्ते सन्तापयतीति । स्मरातुरं कामाकुलं अर्थविवर्जितं धनरहितं मानवं वेश्येव गणिकेव । सन्तापयति सम्यक् तापयति ज्वरयतीति गन्तारमिति शेषः ॥ २७ ॥

उदये शशिनोंऽशकेऽह्नि वा
भवति गतो न चिरेण दुर्मनाः ।
प्रमदामिव जातयौवनां
रत्यर्थं समवाप्य कर्कशः ॥ २८ ॥

उदये शशिनोंऽशक इति ॥ शशिनि चन्द्रे उदये लग्ने । शशिनश्चन्द्रस्यांऽशके नवांशे अह्नि वा तद्दिने चन्द्रदिने । यदि गतो गमनं भवति तदा नचिरेण लघुकालेन दुर्मना असौ गन्ता भवति । जातयौवनां प्राप्ततरुणावस्थां प्रमदां कामिनीं रत्यर्थं मिथुनार्थं कर्कशः शठनायकः समवाप्य संप्राप्येव ॥ २८ ॥

भौमोदयेंऽशेऽह्नि वास यात्रा
करोति बन्धं बधमर्थनाशम् ।
संसेविताऽपापपराङ्मुखेन
मनोभवान्धेन पराङ्गनेव ॥ २९ ॥

भौमोदयेंशेऽह्नीति ॥ भौमोदये । भौमो यदि उदये लग्नेंऽशे तदंशे वास्य भौमस्याहनि दिने यात्रा बन्धं बन्धनं बधं घातमर्थनाशं धननाशं च करोति । अपापपराङ्मुखेन पुण्यव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हिर्मुखेन पापतत्परेण, मनोभवान्धेन कामान्धेन पुरुषेण संसेवि-ता सम्यक् सेविता पराङ्गनेव कुलटेवानर्थं करोतीति ॥ २९ ॥

बुधस्य लग्नांशकवासरेषु
यात्रा नरं प्रीणयति प्रकामम् ।
भावानुरक्ता प्रवराङ्गनेव
विदग्धचेष्टा मदनाभितप्तम् ॥ ३० ॥

बुधस्य लग्नांशकवासरेष्विति ॥ बुधस्य लग्नांशकवासरेषु बुधो यदि यात्रालग्ने बुधस्यैवांऽशे बुधस्यैव वासरे, यात्रा गमो-नरं गन्तारं प्रकामं यथा तथा प्रीणयति प्रसन्नं करोति । भावा-नुरक्ता रत्यादिभावतत्परा प्रवराङ्गना सुसुन्दरी विदग्धचेष्टा चतुरस्वभावा मदनाभितप्तं कामाभिज्वरितं नायकमिवेति ३०॥

गुरोर्विलग्नांशदिनेश यात्रा
शुभानुबन्धेप्सितकामदा च ।
जायेव भर्त्तुर्मनसोऽनुकूला
कुलाभिवृद्ध्यै रतिदा हिता च ॥ ३१ ॥

गुरोर्विलग्नांशदिनेष्विति ॥ गुरोर्बृहस्पतेर्विग्नांशदिनेषु यात्रा शुभा भवति । अनुबन्धेप्सितकामदा च । सम्बन्धा-काङ्क्षितकामदा भवति । भर्त्तुः स्वामिनो मनसोऽनुकूला चेतो-ऽभिलाषिणी कुलाभिवृद्ध्यै सन्तानाभिसिद्ध्यै रतिदा रतिप्रिया-हिता च जायेवेति ॥ ३१ ॥

यात्रा भृगोरंशदिनोदयेषु
प्रीणाति कामैर्विविधैर्यियासुम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विलासिनी कामवशोपयातं
भावैरनेकैर्मदनातुरेव ॥ ३२ ॥

यात्राभृगोरंशदिनोदयेष्विति ॥ भृगोः शुक्रस्यांशदिनोदयेषु यात्रा विविधैरनेकैः कामैरभिलाषैर्यियासुं जिगमिषुं प्रीणाति प्रसन्नं करोति । विलासिनी विलासवती मदनातुरा कामाकुला कान्ता कामवशोपयातं नरं मदनासक्तनिकटप्राप्तमनेकैर्विविधैर्भावैः स्थायिभावैरिवेति ॥ ३२ ॥

द्युलग्नभागेषु शनेश्च यात्रा
प्राणच्छिदादीन् प्रचिनोति दोषान् ।
अन्यप्रशक्ता बनितेव मोहात्
संसेविता मन्मथमोहितेन ॥ ३३ ॥

द्युलग्नभागेष्विति ॥ शनेः शनैश्चरस्य द्युलग्नभागेषु दिनलग्नांशेषु च यात्रा गमः प्राणच्छिदादीन् दोषान् प्रचिनोति सञ्चयं करोति । मन्मथमोहितेन कामवशगेन पुंसा मोहात्संसेवितान्यप्रसक्ता परपुरुषरता बनितेव नारीव । अर्थात् सा यथा विविधदोषानुत्पादयतीति ॥ ३३ ॥

अथ सुलग्नप्रशंसां दृष्टान्तेनाह ।

लग्नेन हीनाऽन्यगुणान्विताऽपि
प्रीतिं न यात्रा मनसः करोति ।
स्वलङ्कृता रूपसमन्विताऽपि
प्रभ्रष्टशीला बनितेव पुंसाम् ॥ ३४ ॥

लग्नेन हीनाऽन्यगुणान्वितेति ॥ लग्नेन लग्नगुणेन हीना

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रहिताऽन्यगुणान्विताऽपि सुतिथिकरणभयोगादियुताऽपि । अत्र गन्तुर्यात्रा मनसश्चित्तस्य प्रीतिं प्रसादं न करोति । यथा स्वलङ्कृता शोभनालङ्कारमुद्राङ्किता रूपसमन्विता सुरूपयुक्तापि । प्रभ्रष्टशीला प्रकर्षेण भ्रष्टः शीलश्चरितो यस्याः सा प्रभ्रष्टशीला वनितेव कान्तेव यथा सा पुंसां वैपरीत्येन मनोदुःखमेव जनयतीति तथैव लग्नगुणहीना यात्रोत्पादयतीति ॥ ३५ ॥

अथ लग्नगुणसूचकशकुनं दृष्टान्तद्वारेणाह ।

लग्नस्य शुद्धिः शकुनैर्निमित्तै-
र्विज्ञायतेऽन्तः करणेन सम्यक् ।
अनन्यभावाश्रयसंप्रवृत्तैः
कौलीव पुंसश्चरितैर्विदेशे ॥ ३५ ॥

लग्नस्य शुद्धिरिति ॥ शकुनैर्वक्ष्यमाणैः सुशकुनैर्निमित्तैरंगस्फुरणैरन्तष्करणेनान्तर्भावेन लग्नस्य सम्यक् शुद्धिर्विज्ञायते । अनन्यभावाश्रयसंप्रवृत्तैः । नान्यस्मिन् भावः स्वभाव इत्यनन्यभावः । तत्र आश्रये आधारे सम्प्रवृत्तामिति तथा तैः पुंसो नायकस्य चरितैः शीलैर्विदेशे परदेशे प्रोषितभर्त्तरि कौलीव साध्वी कुलांगनेव ॥ ३५ ॥

अथाधुना मनुष्यपश्वादिजीवेषु लक्षणविदा प्रभा वेद्या भवतीति दृष्टान्तेनाह ।

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान्बहिरपि प्रविकाशयन्ती

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दीपप्रभा स्फटिकरत्नघटस्थितेव ॥ ३६ ॥

छाया शुभाशुभफलानीति ॥ शुभाशुभफलानि निवेदयन्ती छाया स्वदीप्तिर्मनुष्यपशुपक्षिषु लक्षणैर्लक्ष्या लक्षितुं योग्या भवति । तेजोगुणान् बहिरपि प्रविकाशयन्ती स्फटिकरत्नघटस्थिता दीपप्रभेव ॥ ३६ ॥

अथातः पञ्चमहाभूतभवप्रभाकथनपूर्वकतत्फलानि चतुर्भिराह ।

स्निग्धद्विजत्वग्नखरोमकेशा
छाया सुगन्धा च महीसमुत्था ।
तुष्ट्यर्थलाभाभ्युदयान् करोति
धर्मस्य चाहन्यहनि प्रवृद्धिम् ॥ ३७ ॥

स्निग्धद्विजत्वग्नखरोमकेशेति ॥ महीसमुत्था भूसमुत्पन्ना छाया दीप्तिः स्निग्धद्विजत्वग्नखरोमकेशा भवति । सुगन्धा च सा तुष्ट्यर्थलाभाभ्युदयान् करोति । धर्मस्य पुण्यस्य चाहन्यहनि प्रवृद्धिं करोति ॥ ३७ ॥

स्निग्धा सिता च हरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाप्या
छायाफलं तनुभृतां शुभमादधाति ॥ ३८ ॥

स्निग्धा सिताचेति ॥ आप्या छाया जलोत्था प्रभा स्निग्धा सान्द्रा भवति । सिता च शुक्लवर्णा च भवति । हरिता नयनाभिरामा नेत्रसुखा भवति । सौभाग्यमार्दवसुखाभ्युदया-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्करोति । सुभाग्यकोमलत्वपुण्यानामभ्युदयान् करोति । सर्वार्थसिद्धिजननी जननीव मातेव भवति । तनुभृतां शरीरिणां शुभं फलमादधातीति ॥ ३८ ॥

चण्डा धृष्या पद्महेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥ ३९ ॥

चण्डा धृष्येति ॥ आग्नेयी तेजोमयी छाया चण्डाऽतिकोपना स्यात् । धृष्या धार्ष्ट्या भवति । पद्महेमाग्निवर्णा भवति कमलसुवर्णवह्निवद्देदीप्यमाना सप्रतापैस्तेजो विक्रमैर्युक्ता सा प्राणिनां जीवानां जयाय जयार्थं स्यात् । वाञ्छितार्थस्याभिमतार्थस्य क्षिप्रं शीघ्रं सिद्धिं धत्ते ददाति ॥ ३९ ॥

मलिनपरुषकृष्णा पापगन्धाऽनिलोत्था
जनयति वधबन्धव्याध्यनर्थार्थनाशान् ।
स्फटिकसदृशरूपा भाग्ययुक्ताऽत्युदारा
निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥४०॥

इति श्रीवराहमिहिराचार्य्यकृतायां योगयात्रायां
मिश्रकाध्यायः पञ्चमः ॥ ५ ॥

मलिनपरुषकृष्णेति ॥ अनिलोत्था वायुजनिता छाया प्रभा मलिनपरुषकृष्णा मलीमसकठोरश्यामा भवति । पापगन्धा कुगन्धा भवति । सा छाया बधबन्धव्याध्यनर्थार्थनाशान् जनयति उत्पादयति । गगनोत्थाऽऽकाशोत्पन्ना छाया स्फटिकसदृशरूपास्व-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

च्छवर्णा भवति। भाग्ययुक्ताऽत्युदारा भवति। श्रेयसां मंगलानां साधनाय निधिरिव भवति ॥ ४० ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां मिश्रकाध्यायः पञ्चमः ॥ ५ ॥

अथ बल्युपहाराध्यायो व्याख्यायते तत्रादौ दिशां पतीनाह

पुरुहूतहुताशयमा निर्ऋति-
वरुणानिलयक्षशिवाश्च दिशाम् ।
पुनरर्कसितारतमोरविजाः
शशिसौम्यबृहस्पतयः पतयः ॥१॥

पुरुहूतहुताशयमाः। निर्ऋतिवरुणानिलयक्षशिवाश्चेति। इन्द्राग्निपितृपतयो रक्षोम्भःपतिवायुकुबेरमहेश्वराश्च। दिशां पूर्वादीनां पतयः स्वामिनो भवन्ति। पुनर्भूयोऽर्क सितारतमोरविजाः। शशिसौम्यबृहस्पतयः सूर्यशुक्रमंगलराहुशनिचन्द्रबुधगुरवो दिशां पतयः स्वामिनः क्रमेण भवन्ति इति ॥१॥

अथ द्वाभ्यां पूर्वदिग्गन्तू राज्ञ इन्द्रप्रतिमापूजनादिविधिमाह ।

शच्या सहैरावणगः सवज्रो
हैमोऽथवा दारुमयो महेन्द्रः ।
विचित्रमाल्यध्वजरक्तचन्दनैः
सौम्योपहारेण च पूजनीयः ॥२॥

शच्या सहैरावणग इति। शच्या इन्द्राण्या सह सहितो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

महेन्द्र ऐरावणग ऐरावतप्राप्तः (ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा इत्यमरः । सवज्रः कुलिशसहितो हैमो हेम्नः सुवर्णस्यायं हैमोऽथवा दारुमयः काष्ठमयः। विचित्रमाल्यध्वजरक्तचन्दनैः सौम्योपहारेण च पूजनीयः शुभोपवलिना पूज्य इति ॥ २ ॥

अथ मन्त्रमभीषुणः सखीना-
मिति जप्त्वा पुरतः पुरन्दरस्य ।
पुरुहूतदिशं नृपोऽभियुञ्ज्यात्
पुरुहूतं हृदये निवेश्य सम्यक् ॥३॥

अथ मन्त्रमभीषुणः सखीनामिति। अथेन्द्रपूजनानन्तरमभीषुणः सखीनामिति मन्त्रं पुरतोऽग्रतः पुरन्दरस्येन्द्रस्य जप्त्वा जपं कृत्वा पुरुहूतमिद्रं सम्यक् हृदये निवेश्य पुरुहूतदिशं प्राचीं नृपो राजाऽभियुञ्ज्यात् कलहाह्वानं कुर्यादिति ॥ ३ ॥

अथ तद्दिग्गन्तू राज्ञः सूर्यप्रतिमापूजादिविधिमाह द्वाभ्याम् ।

ताम्रजा प्रतिकृतिः सहस्रगो
रक्तचन्दनकृतानुलेपना ।
रक्तवस्त्रकुसुमध्वजार्चिता
सूर्यकान्तमणिभिर्विभूषिता ॥४॥

ताम्रजा प्रतिकृतिरिति। सहस्रगोः सूर्यस्य ताम्रजा ताम्रभवा प्रतिकृतिः प्रतिमा कार्या । किं विशिष्टा रक्तचन्दनकृतानुलेपना। रक्तचन्दनेन कृतोऽनुलेपोऽनुलेपनं यस्या इति । तथा पुना रक्त वस्त्रकुसुमध्वजार्चिता । रक्तांशुकपुष्पपताकपूजिता । सूर्यकान्त मणिभिर्विभूषिता कार्या ॥ ४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आकृष्णपूर्वं यदि वाऽप्युदुत्यं
मन्त्रं समावर्त्य रवेः पुरस्तात् ।
क्षीरौदनेन प्रतिपूज्य यायात्
प्राचीं पुरस्कृत्य दिनेशशक्रौ ॥ ५ ॥

आकृष्णपूर्वमिति । रवेः सूर्यस्य पुरस्तादग्रे आकृष्णपूर्वं आकृष्णेन रजसेति मन्त्रं यदि वाऽप्युदुत्यं मन्त्रं समावर्त्य पुनः पुनः प्रपठ्य । क्षीरौदनेन दुग्धौदनेन प्रतिपूज्य दिनेशशक्रौ सूर्येन्द्रौ पुरस्कृत्याग्रे निधाय प्राचीं प्राग्दिशं यायाद्गच्छेत् ॥ ५ ॥

अथाग्नेयादिग्गन्तू राज्ञोऽग्निशुक्रप्रतिमापूजादिविधिमाह द्वाभ्याम् ।

अग्नेस्तनुः कनकेनैव कार्या
रक्तो ध्वजः कुसुमं चन्दनं च ।
आज्यं बलिर्हुतभुग्विजगीषो-
र्मन्त्रो घृतं घृतयोनं पिबेति ॥६॥

अग्नेर्वह्नेस्तनुर्मूर्त्तिः कनकेन सुवर्णेन कार्या रक्तोध्वजो रक्तपताका कुसुमं पुष्पम् रक्तमिति च पदेन रक्तं चन्दनम् । आज्यं घृतम् । बलिः । हुतभुजि अग्नौ विजगीषोर्जयनशीलस्य घृतं घृतयोनं पिबेति मन्त्रो जाप्यः ॥ ६ ॥

कार्यश्चित्रो दितिसुतगुरुर्वामयोषार्द्धकायो
नानाकाराः कुसुमबलयस्तत्र चित्रो ध्वजश्च ।
शुक्रज्योतिः प्रभृति च जपेन्मन्त्रमस्याग्रतस्तौ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृत्वा यायाद्भृगुजदहनौ जेतुमिच्छुस्तदाशाम् ७

कार्यइति । दितिसुरगुरुः शुक्रः चित्र आकारः कार्यः । तत्र नानाकारा विविधाकाराः कुसुमबलयो देयास्तत्र चित्रध्वजश्चानेकवर्णध्वजो देयः । अस्य शुक्रस्य अग्रतः शुक्रज्योतिप्रभृति मन्त्रं जपेत् । ततस्तौ भृगुजदहनावग्रतः कृत्वा तदाशामग्निदिशं जेतुमिच्छुर्यायाद्गच्छेत् ॥ ७ ॥

अथ दक्षिणाशागन्तू राज्ञो यमांगारकप्रतिमापूजादिविधिमाह द्वाभ्याम् ।

अयोमयं प्रोद्यतदण्डहस्तं
यमं सकृष्णध्वजपुष्पगन्धम् ।
तिलौदनैरर्च्य समांसमद्यै-
र्यमेन दत्तं च जपोऽस्य कार्यः ॥ ८ ॥

अयोमयं लोहमयं प्रोद्यतदण्डहस्तं यमं पितृपतिं कृत्वा सकृष्णध्वजपुष्पगन्धं कार्यम् । तिलौदनैस्तिलभक्तैः समांसमद्यैरर्च्य सम्पूज्य यमेन दत्तं चास्य मन्त्रस्य जपः कार्यः ॥ ८ ॥

मूर्तिः स्याद्रुधिराख्यसंज्ञमणिना भौमस्य रक्ताःस्रजो
रक्तानि ध्वजचन्दनानि कुसुमैः पक्वान्नमांसैर्बलिः ।
अग्निर्मूर्द्धपदैः स्तुतिः क्षितिसुतस्यैवं यमाङ्गारकौ
दिङ्नाथौ गमनेऽग्रतो नरपतिः कृत्वा व्रजेद्दक्षिणाम् ९॥

रुधिराख्यसंज्ञमणिना मूर्तिः स्यात् आरक्तसंज्ञकमणिना भौमस्य मूर्तिः कार्या । रक्ताः स्रजो माला देयाः । रक्तानि ध्वजचन्दनानि देयानि । रक्तैः कुसुमैः पुष्पैः पूजा कार्या । पक्वान्न-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ वायव्यदिग्गन्तूराज्ञो वायुचन्द्रप्रतिमापूजादि-
विधिमाह द्वाभ्याम् ।

वायोर्मूर्त्तिः श्वेतमृद्भिर्विधेया
पूज्या श्वेतैः पुष्पगन्धध्वजाद्यैः ।
मन्त्रो वातो वामनो वेति जाप्यो
वायव्याशा प्रस्थितस्येश्वरस्य ॥ १४ ॥

वायोर्मूर्त्तिरिति ॥ वायोर्मरुतो मूर्त्तिः प्रतिमा श्वेतमृद्भिः शुक्लमृत्तिकाभिर्विधेया । श्वेतैः पुष्पवस्त्रध्वजाद्यैः पूज्या । वातो वामनो वेति मन्त्रो जाप्यः । वायव्याशाप्रस्थितस्येश्वरस्य वायुकोणगन्तू राज्ञो विधिः ॥ १४ ॥

मन्त्रः सोमस्याप्यायस्वे-
त्यन्यच्छ्वेतं स्रग्वस्त्राद्यम् ।
वायुं सोमं चाग्रे कृत्वा
यायाद्राजा वायोः काष्ठाम् ॥ १५ ॥

मन्त्रः सोमस्याप्यायस्वेति ॥ सोमस्य चन्द्रस्य मन्त्रः आप्यायस्वेति अन्यच्छ्वेतं स्रग्वस्त्राद्यं शुक्लं मालांशुकाद्यम् । वायुं सोमं चाग्रे कृत्वा राजा गन्ता वायोर्मरुतः काष्ठां दिशं यायाद्गच्छेत् ॥ १५ ॥

अथोत्तरदिग्गन्तुः कुबेरबुधप्रतिमापूजादि-
विधिमाह द्वाभ्याम् ।

हाटकमूर्त्तिं कुर्याद्धनदस्य
विभूषितां रत्नैः सगदां च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूजितां स्रग्वस्त्राद्यैर्विचित्रै
रक्षसां भागोसीत्येषमन्त्रः ॥ १६ ॥

हाटकमूर्त्तिमिति ॥ धनदस्य कुवेरस्य हाटकमूर्त्तिं सुवर्णप्रतिमां कुर्यात् । किंविशिष्टां रत्नैर्मणिभिर्विभूषितां सगदां गदाख्यशस्त्रसाहितां च कुर्यात् । विचित्रैर्विविधैः स्रग्वस्त्राद्यैः पूजितां कुर्यात् । रक्षसां भागोसीत्येष मन्त्रो जाप्यः ॥ १६ ॥

सौवर्णं रजतासने नृमिथुनं चन्द्रात्मजस्येष्यते
हारिद्रौदनमिष्टगन्धकुसुमैर्गेयैश्च सम्पूजितम् ।
उद्बुध्यस्व जपश्च तस्य कथितः स्याद्ब्रह्मयज्ञेति वा
गच्छेदुत्तरतो धनेश्वरबुधौ ध्यायन् पुरस्कृत्य च ।१७॥

सौवर्णमिति ॥ रजतासने सौवर्णं सुवर्णनिर्मितं नृमिथुनं स्त्रीपुमांसौ चन्द्रात्मजस्य बुधस्य रूपमिष्यते । हारिद्रौदनं हरिद्रायुक्तमोदनं भक्तमिष्टगन्धकुसुमैः सुगन्धपुष्पैर्गेयैर्गायकैश्च सम्पूजितं कार्यम् । उद्बुध्यस्व जपश्च तस्य बुधस्य कथितः स्यात् । ब्रह्मयज्ञेति वा जपो धनेश्वरबुधौ कुवेरसौम्यौ पुरस्कृत्याग्रे कृत्वा तौ ध्यायन् उत्तरतो गच्छेत् ॥ १७ ॥

अथैशानदिग्गन्तुः शिवस्य बृहस्पतेश्च
प्रतिमापूजादिविधिमाह ।

गोत्वग्जाप्यतिभैरवा प्रतिकृतिर्भस्मोल्काटा शूलिनो दध्ना चोदनसंयुतेन च बलिर्मन्त्रो नमः शम्भवे । मूर्त्तिः स्यान्मणितो गुरोर्विमलिका पीतं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मांसैर्बलिर्देया । अग्निर्मूर्द्धपदैः स्तुतिः कार्या । क्षितिसुतस्य मङ्गलस्यैवं नरपती राजा यमाङ्गारकौ पितृपतिमङ्गलौ दिग्नाथौ दक्षिणस्वामिनौ । अग्रतः कृत्वा निधाय दक्षिणं दक्षिणदिशं व्रजेद् गच्छेत् ॥ ९ ॥

अथ निर्ऋतिदिग्गन्तूराज्ञो रक्षोराहुप्रतिमापूजादिविधिमाह द्वाभ्याम् ।

भैरवा प्रतिकृतिः पटे कृता
सर्वगन्धफलपुष्पपूजिता ।
एष ते निर्ऋति मन्त्रचोदना
कृष्णरक्तकुसुमध्वजाम्बरा ॥ १० ॥

भैरवा प्रतिकृतिरिति ॥ पटे वस्त्रे भैरवाप्रतिकृतिः भयङ्कराकृतिः प्रतिमा कृता । किं विशिष्टा सर्वगन्धफलपुष्पपूजिता । एष ते निर्ऋतिमन्त्रचोदना एषते निर्ऋति इतिमन्त्रचोदना प्रेरणा कार्या । कृष्णरक्तकुसुमध्वजाम्बरा प्रतिमा कार्या ॥ १० ॥

सुरदारुमयः शशाङ्कशत्रुः
कुसुमाद्यैरसितैः कृतोपहारः ।
निर्ऋतिसहितः स्वदिक्प्रयाणे
स्तुतिमन्त्रोऽस्य च कीर्त्तितः कयानः ॥ ११ ॥

सुरदारुमय इति ॥ सुरदारुमयो देवदारुमयस्तद्रचितः शशाङ्कशत्रू राहुर्विधेयः किं विशिष्टः । असितैः कृष्णवर्णैः कुसुमाद्यैः पुष्पवस्त्रान्नैः कृतोपहारः कृतबलिः । पूजा वा यस्येति । निर्ऋतिसहितः पूज्यः । स्वदिक्प्रयाणे निर्ऋतिदिग्गमने

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्य स्तुतिमन्त्रः कयान इति कयानश्चित्र इत्यादि कीर्त्तितः कथितः ॥ ११ ॥

अथ पश्चिमदिग्गन्तू राज्ञो वरुणशनिप्रतिमापूजादि-
विधिमाह द्वाभ्याम् ।

पश्चाद्व्रजेद्रजतमयं जलेश्वरं
पाशान्वितं सह गदयाब्जपूजितम् ।
कृत्वौदनैर्बलिमपि यावकान्वितं
येते शतं वरुण इति स्तुयाद्द्विजः ॥ १२ ॥

पश्चाद्व्रजेदिति ॥ रजतमयं रौप्यरचितमेव जलेश्वरं वरुणं कृत्वा । किंविशिष्टं पाशान्वितं पाशाख्यास्त्रसहितं गदया सह युतमब्जपूजितं कमलभूषितम् । ओदनैर्भक्तैर्यावकान्वितमारक्तयुतं बलिं दत्वा येते शतं वरुण इति मन्त्रेण द्विजः स्तुयात्स्तुतिं कुर्यादिति ॥ १२ ॥

सौरेरर्चा नीलकाचाकुशाङ्गी
पूज्या कृष्णैर्वस्त्रमाल्योपहारैः ।
शन्नोदेवीत्येष मन्त्रोऽपराशां
जेतुं यायात्तौ पुरस्कृत्य देवौ ॥ १३ ॥

सौरेरिति ॥ सौरेः शनैश्चरस्य नीलकाचाकुशाङ्गी तनुः कार्या । नीलेन मणिना काचेन चाकुशांगी अति खिन्नांगी मूर्त्तिः कृत्वार्चा पूजा कार्या । ततः कृष्णैः श्यामवर्णैर्वस्त्रमाल्योपहारैः पूज्या पूजितुं योग्या । शन्नोदेवीत्येष मन्त्रो जाप्यः । ततः पराशां पश्चिमां दिशं जेतुं जयार्थं तौ देवौ वरुणशनी पुरस्कृत्याग्रे कृत्वा यायाद्गच्छेत् ॥ १३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशेषमाह ।

कुसुमशरशरीरस्पर्द्धिनः कामरूपा
विविधसुरभिवस्त्राः स्रग्विनोऽसह्यवीर्याः ।
पवनसदृशवेगा मानिनो नित्यहृष्टा-
स्तरुणदिनकरत्विट्स्पर्द्धितेजोदधानाः ॥ २२ ॥

कुसुमशरशरीरस्पर्द्धिनः कन्दर्पतनुस्पर्द्धाकारिणःकामरूपा अभिलाषस्वरूपा अणिमाद्यष्टसिद्धिमन्तो विविधसुरभिवस्त्रा नानासुगन्धवस्त्रास्तद्धारिणः । स्रग्विनो मालावन्तो । असह्यवीर्या असहनबलाः । पवनसदृशवेगा वायुसमानगतयः । मानिनो मानशालिनः नित्यहृष्टाः सदाहर्षितास्तरुणदिनकरत्विट्स्पर्द्धितेजोदधानाः मध्याह्नार्ककिरणरुचिप्रभाधृतवन्तो ये गणाः सन्तीति तेभ्यो नमोऽस्तु ॥ २२ ॥

पुनर्विशेषमाह ।

लम्बक्रोडा ह्रस्वादीर्घा
खञ्जैकाक्षाः शुष्काः स्थूलाः ।
नानापक्षिव्यालोष्ट्रास्या
वक्रैर्हीनाः क्रोडास्याश्च ॥ २३ ॥

लम्बक्रोडा दीर्घोरसो ह्रस्वा वामनाः । दीर्घाः लम्बकायस्काः । खञ्जैकाक्षाः खञ्जा गतिविकला एकाक्षा एकनेत्राः । शुष्का मांसहीनाः । स्थूला अतिपुष्टाः । नानापक्षिव्यालोष्ट्रास्या विविधविहगसर्पक्रमेलकाननाः । वक्रैर्मुखैर्हीना रहिताः । क्रोडास्याश्च उरोमुखाश्च ये गणाः सन्तीति तेभ्यो नमोऽस्तु ॥ २३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशेषमाह ।

बहुवक्त्रशिरोभुजपाददृशः
कृकलासभुजङ्गकृताभरणाः ।
विकटासुकुटोत्कटरत्नभृत-
स्तरुणार्कतडिद्धुतभुक्कपिलाः ॥ २४ ॥

बहुवक्त्रशिरोभुजपाददृशो बहूनि मुखानि शिरांसि हस्ताऽश्चरणा नेत्राणि येषामिति तथा कृकलासभुजङ्गकृताभरणाः । सरटसर्परचितभूषणाः । विकटासुकुटोत्कटरत्नभृत अतिभयानकशिरोभूषणोत्कृष्टमणिधारिणस्तरुणार्कतडिद्धुतभुक्कपिलाः मध्यदिनदिनमणिविद्युदग्निवत्कपिलाः पिंगलाः । अर्थादसहिष्णुतेजोवन्तो ये गणाः सन्ति तेभ्यो नमोऽस्तु बलिं गृह्णन्तु ते ॥ २४ ॥

पुनर्विशेषमाह ।

भ्रमरतमालद्विपगवलाभाः
क्षितिधरमेघप्रतिमशरीराः ।
अशनिनिपातस्वनसनिनादा
द्रुतगमने च स्वसनमनोगाः ॥ २५ ॥

भ्रमरतमालद्विपगवलाभाः । भ्रमरः षट्पदः । तमालस्तमालवृक्षः । द्विपो हस्ती । गवलं माहिषं शृंगं (गवलं माहिषं शृंगमित्यमरः) तद्वत्सैः समा भाश्छवयो येषां ते तथा क्षितिधरमेघप्रतिमशरीराः पर्वतजलधरसदृशदेहाः । अशनिनिपातस्वनसनिनादाः स्वरुपतनशब्दवन्निनादेन शब्देन सहिता इति । द्रुतगमने च शीघ्रधावनेच स्वसनमनोगा वायुमानसवद्गच्छन्तीति तथा ये गणाः सन्ति तेभ्यो नमः बलिं गृह्णन्तु ते ॥ २५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तु वस्त्रादिकं मन्त्रश्चास्य बृहस्पतेरिति तयोर्याया-
द्दिशं पूज्य तौ ॥ १८ ॥

गोत्वग्जापीति ॥ गोत्वग्जाऽपि गोत्वचा जायमानाऽप्यति-
भैरवाऽतिभयङ्करा प्रतिकृतिः प्रतिमा भस्मोत्कटा भस्मना भूत्यो-
त्कटा ओदनसंयुतेन भक्तसंयुतेन दध्ना बलिर्देयः । नमः
शम्भवेति मन्त्रः । गुरोर्बृहस्पतेर्मणितो मणेर्विमलिका विमलामू-
र्त्तिः प्रतिमा कार्या । पीतं पीतवर्णं वस्त्रादिकं वस्त्रपुष्पादिकम् ।
मन्त्रश्चास्य बृहस्पतेरिति जप्यः । तौ शिवगुरू पूज्य सम्पूज्य तयो-
र्दिशमीशानविदिशं यायाद्गच्छेत् ॥ १८ ॥

अथान्यदाह ।

दिग्नाथं कुलदेवतां स्वनगरे येषां कृताश्चाल-
यास्तान्सम्पूज्य यथानुरूपबलिभिर्दद्याद्बलिं भौति-
कीम् । कृत्वा पायसमद्यमांसपललैर्भक्ष्यैश्च ना-
नाविधैर्बालक्रीडनकैः सुगन्धकुसुमैर्मूलैः फलैः
स्वादुभिः ॥ १९ ॥

दिग्नाथं कुलदेवतामिति ॥ दिग्नाथं दिक्स्वामिनं ग्रह-
देवं कुलदेवतामात्मकुलदेवतां स्वनगर आत्मपुरे च येषां देवीदेवा-
नामालया गृहाः कृताः सन्ति तान् सर्वान् यथानुरूपबलि-
भिर्यथास्वरूपपूजासामग्रीभिः सम्पूज्य पायसमद्यमांसपललैः पा-
यसान्नसुरामांसमांसविशेषैश्च नानाविधैर्विविधैर्भक्ष्यैश्च बाल-
क्रीडनकैः सुगन्धकुसुमैः शोभनगन्धकुसुमैः पुष्पैः स्वादुभि-
र्मूलैः कन्दैः फलैश्च भौतिकीं भूतसम्बन्धिनीं बलिं कृत्वा
दद्यादिति ॥ १९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथान्यद्विशेषमाह ।

रथ्यापुरद्वारनदीतटेषु
चतुष्पथाट्टालकनिष्कुटेषु ।
गुहैकवृक्षाद्रिषु ये बसन्ति
ते पूजनीयाः प्रमथा यथावत् ॥ २० ॥

रथ्यापुरद्वारनदीतटेष्विति ॥ रथ्यापुरद्वारनदीतटेषु । वीथिकागोपुरनदीकूलेषु । चतुष्पथाट्टालकनिष्कुटेषु । चतुर्वर्त्महर्म्यपृष्ठगृहारामेषु । गुहैकवृक्षाद्रिषु । कन्दरप्रधानवृक्षपर्वतेषु । ये प्रमथाः पारिषदा देवसदस्याः (प्रमथाः स्युः पारिषदा इत्यमरः) बसन्ति तिष्ठन्ति ते सर्वे यथावत् यथायोग्यं पूजनीया इति ॥ २० ॥

अथात इन्द्राद्यखिलदेवप्रमथगणानां नमस्कारपूर्वकबलिसमर्पणानन्तरं स्वाभिमतं प्रार्थयेदित्याह ।

नमोऽस्तु वः शक्रहुताशदण्डभृ-
त्क्षपाचराम्भःपतिमातरिश्वनाः ।
कुवेररुद्राहिसुपर्णशक्तिभृत्
पिशाचदैत्यानुचराश्च ये गणाः ॥ २१ ॥

नमोऽस्तु व इति ॥ शक्रहुताशदण्डभृत्क्षपाचराम्भःपतिमातरिश्वनाःकुवेररुद्राहिसुपर्णशक्तिभृत्पिशाचदैत्यानुचराश्च ये गणा इन्द्राग्नियमनिर्ऋतिवरुणवायुधनदशिवसर्पगरुडकार्त्तिकेयपिशाचराक्षसानुगामिनो ये कोटयो वस्तेभ्यो नमोऽस्तु नमस्कारस्तेष्विति २१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशेषमाह ।

असिमुशलगदाश्मशक्तिशूल-
द्रुमसशरासनबाणचक्रहस्ताः ।
कणयपरिघकुन्तमुष्टिमाया
लगुडकुठारशतघ्निधारिणश्च ॥ २६ ॥

असिमुशलगदाश्मशक्तिशूलद्रुमसशरासनबाणचक्रहस्ताः । लोहमौशलगदाप्रस्तरच्छूरिकात्रिशूलवृक्षसधनुःशरारिपाणयः । अपि च कणयपरिघकुन्तमुष्टिमायालगुडकुठारशतघ्निधारिणश्चेति ये सन्ति तेभ्यो नमोऽस्तु बलिं गृह्णन्तु ते ॥ २६ ॥

पुनर्विशेषमाह ।

गृह्णन्तु प्रमथगणा बलिं सभूता
भूभर्त्रा विजिगीषुणा निवेदितं वः ।
जित्वारीन्द्विगुणमतो बलिं विचित्रं
दास्यामः स्वविषयमेत्य वः प्रसादात् ॥ २७ ॥

सभूता देवयोनिसहिता हेप्रमथगणाः पारिषदा भूभर्त्रा पृथ्वीस्वामिना विजिगीषुणा जयेच्छुना वो युष्मभ्यं निवेदितं दत्तं बलिं गृह्णन्तु । अरीन् शत्रून् जित्वा वो युष्माकं प्रसादात्प्रसन्नतातः स्वविषयमात्मदेशमेत्यागत्यातो दत्तबलेर्द्विगुणं पूर्वबलिद्विगुणितं विचित्रं विविधवस्तुजातं बलिमुपहारं दास्याम इति ॥ २७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशेषमाह ।

राजा वः शरणमुपागतः सभृत्यः
सामात्यःससुतकलत्रमित्रबन्धुः ।
रक्षार्थं मनुजपतेः सहायकृत्यं
कुर्वीध्वं रिपुबलसंक्षयाय चास्य ॥ २८ ॥

सभृत्यः सहितसेवकः । सामात्यः समन्त्रिकः । ससुतकलत्रमित्रबन्धू राजा वो युष्माकं शरणं रक्षितारमुपागतः । किमर्थं रक्षार्थं रक्षाहेतवे । मनुजपतेर्नरस्वामिनः सहायकृत्यं साहित्यकार्यं कुर्वीध्वम् । रिपुबलसंक्षयाय चास्य शत्रुसैन्यसम्यग्नाशाय राज्ञः सहायकृत्यं कुर्वीध्वम् ॥ २८ ॥

अथाध्यायोऽपसंहारे सचमत्कृतिमाह ।

स्वप्ने निमित्तमथवा मनुजेश्वरस्य
यच्छब्दमेकतममस्य जयाजयाय ।
एवं भवत्युपकृतं सुमहद्भवद्भिः
कार्यं करिष्यति यथा भवतां प्रसादात् ॥ २९ ॥

इति श्रीवराहमिहिराचार्य्यकृतायां योगयात्रायां
बल्युपहाराध्यायः षष्ठः ॥ ६ ॥

हे देवा मनुजेश्वरस्य राज्ञः स्वप्ने निमित्तं शुभाशुभसूचकशकुनमथवा यच्छब्दमेकतमं प्रधानतममस्य बल्युपहारकर्त्तुर्जयाजयाय विजयपराजयाय यथा भवति तथा भवन्तः कुर्वन्तु एवमनयां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रीत्या शुभाशुभे ज्ञाते भवति भवद्भिर्दैवैः सुमहदत्याधिकमुपकृतमुपकारो भविष्यति। यथा भवतां प्रसादात्प्रसन्नतातो राजा बल्युपहारकर्त्ता कार्यं करिष्यतीति शिवम् ॥ २९ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां
बल्युपहाराध्यायः षष्ठः ॥ ६ ॥

अथ नक्षत्रविजयस्नानप्राशनाध्यायो व्याख्यायते ॥
नक्षत्रेण विजयार्थं स्नानं प्राशनं चेति नक्षत्रविज-
यस्नानप्राशने तयोरध्याय इति तथा ॥
तत्रादावश्विनीभरण्योराह ।

मदयन्तिकाऽश्वगन्धामदनफलवचामधूनि शस्यन्ते। प्रथमर्क्षे भरणीषु च सिद्धार्थकभद्रदारुवचा ॥ १ ॥

मदयन्तिकाश्वगन्धेति ॥ प्रथमर्क्षेऽश्विन्यां मदयन्तिकाऽश्वगन्धामदनफलवचामधूनि शस्यन्ते। मदयन्तिका (लोके जूहीति)। अश्वगन्धा (असगन्धोल) मदनफलं (मेनडर इति)। वचा (वच)। मधु क्षौद्रम्। भरणीषु च सिद्धार्थकभद्रदारुवचाः शस्यन्ते सर्षपदेवदारुवचाः प्रशस्यन्ते ॥ १ ॥

अथ कृत्तिकारोहिण्योराह ।

न्यग्रोधशिरीषाश्वत्थपत्रगन्धाश्च कृत्तिकास्नाने। बहुबीजशस्ततोयैर्जयार्थिनो रोहिणीस्नानम् ॥२॥

न्यग्रोधशिरीषाश्वत्थपत्रगन्धाश्चेति ॥ कृत्तिकास्नाने न्यग्रोधशिरीषाश्वत्थपत्रगन्धाश्चेति शस्यन्ते। न्यग्रोधो बटः। शिरीषः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(सिरस)। अश्वत्थपत्रं पिप्पलदलम् । गन्धाऽश्वगन्धा । एताः कृत्तिकानक्षत्रस्नाने शस्ताः । बहुवीजशस्ततोयैर्जयार्थिनो राज्ञः । रोहिणीस्नानं शस्तम् । बहुबीजो (विजोरो) शस्ततोयं पुण्यजलम् ॥ २ ॥

अथ मृगार्द्रयोराह ।

मुक्ताकाञ्चनमणिशङ्खयोजितेनाम्भसा मृगाङ्कर्क्षे ।
रौद्रे वचाऽश्वगन्धाप्रियङ्गुमिश्रैर्जलैः कथितम् ३॥

मुक्ताकाञ्चनमणिशङ्खयोजितेनेति ॥ मृगाङ्कर्क्षे मृगशीर्षे मुक्ताकाञ्चनमणिशङ्खयोजितेनाम्भसा जलेन स्नानं कथितम् । रौद्रे आर्द्रायां वचाश्वगन्धाप्रियङ्गुमिश्रैर्जलैः पानीयैः स्नानं कथितमाचार्येणेति ॥ ३ ॥

अथ पुनर्वसुपुष्ययोराह ।

आदित्ये गोमयगोष्ठमृद्भिरथ गौरशालिभिः पुष्ये ।
सिद्धार्थसहस्रद्वयप्रियङ्गुमदयन्तिकाभिश्च ॥ ४ ॥

आदित्य इति ॥ आदित्ये पुनर्वसौ गोमयगोष्ठमृद्भिः स्नानं कथितम् । अथ पुष्ये गौरशालिभिः स्वच्छतण्डुलैः । सिद्धार्थसहस्रद्वयप्रियङ्गुमदयन्तिकाभिश्च स्नानं कथितम् ॥ ४ ॥

अथाश्लेषामघापूर्वफल्गुनीष्वाह ।

वल्मीकशतान्मृद्भिर्नागे पित्र्येतु देवनिर्माल्यैः ।
पूर्वासु फाल्गुनीषु च सलवणघृतशाद्वलैः प्रोक्तम् ॥

वल्मीकशतादिति ॥ नागे आश्लेषाभे वल्मीकशतान्मृद्भिः स्नानं कथितम् । पित्र्येतु मघासुच देवनिर्माल्यैः शिवनिर्माल्यैः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कथितम् । पूर्वाफाल्गुनीषु च सलवणघृतशाद्वलैः ससिन्धूत्थाज्य-हरिततृणैः स्नानं प्रोक्तम् ॥ ५ ॥

अथोत्तरफल्गुनीहस्ताचित्रास्वाह ।

शतपुष्पया प्रियङ्ग्वा मुस्ताभिश्चोत्तरासु कुर्वीत ।
हस्ते सरोगिरिमृदा चित्रायां देवनिर्माल्यैः ॥ ६ ॥

शतपुष्पयेति ॥ उत्तरासु फाल्गुनीसु शतपुष्पया प्रियङ्गु-मुस्ताभिश्च । अत्र शतपुष्पप्रियङ्गू प्रसिद्धौ । मुस्ता (मोथा) स्नानं कुर्वीत । हस्ते सरोगिरिमृदा तडागपर्वतमृत्तिकया स्नानं चित्रायां देवनिर्माल्यैः शिवार्चितबिल्वपत्रादिभिः स्नानं कथितम् ६ ॥

अथ स्वात्यादिचतुर्ष्वाह ।

स्वातौ जलरुहकुसुमैरैन्द्राग्न्ये मुस्तपद्मकक्षौद्रैः ।
मैत्रे सरिदुभयमृदा हरितालमृदा च माहेन्द्रे ॥७॥

स्वाताविति ॥ स्वातौ स्वातिभे जलरुहकुसुमैः कलमपुष्पैः स्नानं कथितम् । ऐन्द्राग्न्ये विशाखाभे मुस्तपद्मकक्षौद्रैः मुस्ताकमल मधुभिर्गदितम् । मैत्रेऽनुराधाभे सरिदुभयमृदा गङ्गायमुनयोर्मृत्तिकया कथितम् । माहेन्द्रे ज्येष्ठाभे हरितालमृदा हरितालमिश्रित-मृत्तिकयेति कथितम् ॥ ७ ॥

अथ मूलपूर्वाषाढास्वाह ।

भद्रासने समीमयपत्रसहस्रद्वयाम्बुभिर्मूले ।
समधूकपद्मतस्यैः स्नानमषाढासु पूर्वासु ॥ ८ ॥

भद्रासन इति ॥ मूले नक्षत्रे भद्रासने सिंहासने समीमयपत्र-सहस्रद्वयाम्बुभिः । समीपत्रसहस्रद्वयमिश्रजलैः स्नानं कथितम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वासु आषाढासु समधूकपद्ममत्स्यैः स्नानं कथितम् । अत्र मधूको (लोके महुआ) ॥ ८ ॥

अथोत्तराश्रवणयोराह ।

कुर्यादुशीरचन्दनपद्मकमिश्रेण वारिणा विश्वे ।
नद्युभयकूलसङ्गमसृत्स्नकैः कीर्त्यते श्रवणे ॥९॥

कुर्यादिति ॥ विश्वे उत्तराषाढे उसीरचन्दनपद्मकमिश्रेण वारिणा जलेन स्नानं गदितम् । श्रवणे नक्षत्रे नद्युभयकूलसङ्गम मृत्स्नकैः । नदीद्वयतटतत्सङ्गममृत्तिकाधत्तूराख्यैः स्नानम् कथितम् ॥ ९ ॥

अथ धनिष्ठाशतभिषास्वाह ।

घृतभद्रदारुमधुभिश्च वासवे वारुणे घृतक्षौद्रैः ।
समदनफलैः सहदेवाम्बुशूकमदयन्तिकामिश्रैः १०

घृतभद्रदारुमधुभिश्चेति । वासवे धनिष्ठाभे घृतभद्रदारुमधुभिश्च । आज्यदेवदारुक्षौद्रैश्च स्नानं कथितम् । वारुणे शतभिषजि घृतक्षौद्रैः समदनफलैः सहदेवाम्बुशूकमदयन्तिकामिश्रैः । मदनफलं (मैनफल) सहदेवः (सहदेवी) अम्बु जलम् । शूकः (साठी) मदयन्तिका (जूही) एतैः स्नानं कथितम् ॥ १० ॥

अथ पूर्वोत्तरभाद्रपदेष्वाह ।

श्रीवासकः प्रियंगुश्चाजे स्यादुत्तरास्वगुरुगन्धाः ।
शस्ताः सपद्मकोसीरचन्दना मानवेन्द्राणाम् ११ ॥

श्रीवासक इति । अजे पूर्वभाद्रपदे श्रीवासकः (लोके सिरवारी) प्रियङ्गुः प्रसिद्धः । उत्तरासु भाद्रेषु । अगुरुगन्धा अगर-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पाटीराः। सपङ्कोसीरचन्दनाः। उसीरः (खसइति) मानवे न्द्राणां राज्ञां स्नाने शस्ताः शुभा इति ॥ ११ ॥

अथ रेवत्यामाह।

रेवत्यां वृषभद्विपविषाणकोशैश्च सर्पिमधुपूर्णैः।
गोरोचनाञ्जनयुतैः सलिलैश्च यियासतः पुंसः १२॥

रेवत्यामिति। रेवत्यां रेवतीनक्षत्रे वृषभद्विपविषाणकोशैश्च। सर्पिमधुपूर्णैः। गोरोचनाञ्जनयुतैः। गोगजदन्तक्षौमैश्च। घृतक्षौद्रपूर्णैः गोरोचनाञ्जनयुतैः सलिलैर्जलैः। यियासतो गमनशीलस्य पुंसः स्नानं कथितम्॥ १२॥

अथ नक्षत्रस्नानकथनान्तनन्तरमङ्गशोधनाय मृद्विशेषाण्याह।

गिरिवल्मीकनदीमुखकूलद्वयशक्रपादमृद्भिरतः।
द्विपवृषविषाणपार्थिवगणिकाद्वाराहताभिश्च १३॥

गिरिवल्मीकनदीमुखकूलद्वयशक्रपादमृद्भिरिति। गिरिवल्मीकनदीमुखकूलद्वयशक्रपादमृद्भिः पर्वतनाकुनदीसंगमतटद्वयेन्द्रवृक्षमृत्तिकाभिः। (इन्द्रद्रुः ककुभोऽर्जुन इत्यमरः) अतोऽनन्तरं द्विप वृषविषाणपार्थिवगणिकाद्वाराहताभिश्च। गजदन्तगोशृङ्गहतमृत्तिकाभिः। राजवेश्याद्वारमृत्तिकाभिश्च। क्रमेण मस्तकाद्यंगानि शोधयेदिति शेषः॥ १३॥

अथ कया मृदा किमंगं शोधयेदित्याह युग्मेन।

गिरिशिखरान्मूर्द्धानं वल्मीकमृदा च शोधयेत्कर्णौ।
नद्युभयकूलसङ्गममृद्भिः प्रक्षालयेत्पार्श्वे॥ १४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गिरिशिखरादिति ॥ गिरिशिखरात्पर्वताग्रतो मृत्तिकाभिर्मूर्द्धानं मस्तकं शोधयेत् । वल्मीकमृदा च कर्णौ कर्णद्वयं शोधयेत् । नद्युभयकूलसङ्गममृद्भिः पार्श्वे प्रक्षालयेत् ॥ १४ ॥

इन्द्रस्थानाद्ग्रीवां बाहू करिवृषभयोर्विषाणात् ।
हृदयं च नृपद्वारात्कटिमपि वेश्यागृहद्वारात् ॥१५॥

इन्द्रस्थानाद्ग्रीवामिति ॥ इन्द्रस्थानादर्जुनवृक्षतलमृत्तिकायाः ग्रीवां कन्धरां करिवृषयोर्विषाणात् पूर्वप्रतिपादितात् बाहू भुजौ शोधयेत् । नृपद्वारात् हृदयं शोधयेत् वेश्यागृहद्वारात् कटिं मध्यभागं शोधयेत् ॥ १५ ॥

अथातो गमने नक्षत्रवशेनाशनमाह ।

तत्रादावश्विन्यादिपञ्चानाम्

अक्षतमाषाःस्विन्नास्तिलसहितास्तण्डुला दधि च गव्यम् । पृषतपिशितं मृगस्य च पञ्चानामश्विनादीनाम् ॥ १६ ॥

अक्षतमाषा इति ॥ अश्विनादीनामश्विन्यादीनां पञ्चर्क्षाणामक्षतमाषाः सम्पूर्णमाषाः । स्विन्ना आर्द्राः तिलसहितास्तण्डुलाः दधि च गव्यम् । पृषतपिशितं मृगविशेषस्य मांसम् मृगस्य च मांसं क्रमेण भक्षयेत् ॥ १६ ॥

अथार्द्रादिसप्तानामाह ।

रुधिरविलायनपायसविहगमांसानि शाङ्करादीनाम् ।
पित्र्ये तिलौदनं षष्ठिकान्नमृक्षद्वये परतः ॥१७॥

रुधिरविलायनपायसविहङ्गमांसानीति ॥ शाङ्करादीनामार्द्रादीनां रुधिरविलायनपायसविहङ्गमांसानि अद्यात् । अत्र विलायनं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नवनीतम् । अन्यत्स्पष्टम् । पित्र्ये मघाभे तिलौदनं तिलभक्तम् । परत ऋक्षद्वये षष्टिकान्नं षाष्टिक्यभक्तं भक्षयेत् ॥ १७ ॥

अथ हस्तादिनवानाह ।

प्राश्याः प्रियङ्गुचित्राण्डजफलं यावकं कुलत्थाश्च ।
मधुसर्पिषी च हस्तान्मूलान्यापः शक्तवो मूलात् १८

प्राश्या इति ॥ हस्तात् हस्तमारभ्य प्रियङ्गुफलम् । चित्राण्डजं फलम् यावकम् कुलत्थाश्च । मधुसर्प्पिषी च प्राश्याः । मूलात् नक्षत्रात् मूलानि कन्दानि । आपो जलानि । शक्तवः लोके (सातु) भक्ष्याः ॥ १८ ॥

अथ श्रवणाद्यवशिष्टानामाह ।

श्रवणादीनामद्यात्शालिशाकं च विडालमांसं च ।
आज्यं यथेष्टमांसं च शक्तवो माषसम्पृक्ताः ॥१६॥

श्रवणादीनामिति ॥ श्रवणादीनां नक्षत्राणां शालिशाकं च विडालमांसं च आज्यं अजमांसं च यथेष्ठमांसं च शक्तवो माषसम्पृक्ता माषमिश्रिता एतानि क्रमेण अद्यात् भक्षयेत् ॥१६॥

अथ पूर्वादिदिग्गमने वाहनंदानदवेश्चाह ।

प्राचीं गजेन यायाद्रथेन याम्यां हयेन वारुण्याम् ।
नरयानेनोदीचीं सर्व्वं दत्त्वा दिगीशाय ॥ २० ॥

प्राचीं गजेनेति ॥ प्राचीं पूर्वदिशं गजेन हस्तिना यायात् गच्छेत् । रथेन रथयानेन याम्यां दक्षिणं यायात् । वारुण्यां पश्चिमायां हयेनाश्वेन यायात् । उदीचीमुत्तरादिशं नरयानेन यायात् । दिगीशाय दिक्स्वामिने सर्वं पूर्वकथितं बल्युपहारं दत्त्वा गच्छेदिति ॥ २० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गमने दिग्वशेनाशनमाह ।

प्राच्यादि घृतं तिलौदनं मत्स्याः क्षीरमिति प्रदक्षिणम् ।
अद्यान्नृपतिर्यथादिशं नक्षत्राभिहितं च सिद्धये ॥२१॥

प्राच्यादिघृतमिति ॥ प्राच्यादिप्रदक्षिणं यथातथा घृतमाज्यम् तिलौदनं तिलभक्तम् । मत्स्याः । क्षीरमिति अद्याद्भक्षयेत् । नक्षत्राभिहितं पूर्वोक्तं नक्षत्रसम्बन्धिभक्ष्यं च सिद्धये सिद्ध्यर्थं नृपती राजाऽद्याद्भक्षयेदिति ॥ २१ ॥

अथ यात्रासमये भक्ष्याम्नवशेन शुभाशुभफलान्याह ।

अस्वादु च्युतमक्षिकानुविद्धं दुर्गन्धिक्षयकृद्भूरि यच्च दग्धम् । सुस्विन्नं शुचि रुचिरं मनोऽनुकूलं स्वाद्वन्नं बहु विजयाय यानकाले ॥ २२ ॥

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायां नक्षत्रविजयस्नानप्राशनाध्यायः सप्तमः ॥ ७ ॥

अस्वादु च्युतमक्षिकानुविद्धमिति ॥ अथ यात्रासमये यदन्नमस्वादु स्वादुरहितं च्युतमक्षिकानुविद्धं पतितमक्षिकावेधितं तथा दुर्गन्धि सुगन्धिरहितं अभूर्यर्थ्यं यच्च दग्धमन्नं तथा यदन्नं तत्क्षयकृद्यात्राफलनाशकृद्भवति सुस्विन्नं स्वाद्वि शुचि पवित्रं रुचिरं मनोज्ञं मनोऽनुकूलं चेतःपूतं स्वाद्वन्नं स्वादुयुक्तमन्नं बहु भूरि यानकाले यात्रासमये विजयाय सुजयार्थं भवेदिति ॥२२॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां नक्षत्रविजयस्नानप्राशनाध्यायः सप्तमः ॥ ७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथाग्निनिमित्ताध्यायो व्याख्यायते ॥ अग्निना निमित्तं शुभाशुभसूचकं चिन्हमिति तथा तस्याध्याय इति ॥

तत्रादौ शुल्वादिसूत्रेणाधिकन्यूनवेदीफलमाह ।

वेदी शुभा शुल्वविधानदृष्टा
दिक्स्थानमानाभ्यधिका न हीना ।
भ्रष्टप्रमाणा प्रकरोति भङ्गं
दिग्वक्रसंस्था च न सिद्धिदा स्यात् ॥ १ ॥

वेदी शुभेति ॥ शुल्वविधानदृष्टा शुभावेदी॥बौधायनशुल्वसूत्रविधिना रचिता वेदी यजमानस्याना परिष्कृतभूमिः । दिक्स्थानमानाभ्यधिका न कथितदिक्प्रमाणाधिका न हीना न्यूना न कार्या । भ्रष्टप्रमाणा वेदी भंगं कार्यभङ्गं प्रकरोति दिग्वक्रसंस्था च न सिद्धिदा स्यात् ॥ १ ॥

अथ प्रागादिदिक्षु मानहीनफलमाह ।

प्राग्भागहीना नगरस्य नेष्टा
पुरोधसां दक्षिणभागवक्रा ।
नरेन्द्रजायाऽशुभदा परस्या-
मुदग्बलेशस्य नृपस्य मध्ये ॥ २ ॥

प्राग्भागहीनेति ॥ प्राक्पूर्वभागहीना वेदी नगरस्य पुरस्य नेष्टाऽनिष्टफला स्यात् । दक्षिणभागवक्रा दक्षिणदिशि कुटिला पुरोधसां पुरोहितानां नेष्टा स्यात् । अपरस्यां पश्चिमायां वक्रा नरेन्द्रजायाऽशुभदा राजस्त्रियोऽनिष्टफलदा । उदगुत्तरभागहीना बलेशस्य सैन्याधिपतेरशुभा स्यात् । मध्ये हीना नृपस्य राज्ञोऽनिष्टफला स्यात् ॥ २ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ विजयदं हविर्हवनमाह ।

सत्त्वैरलीढं न पिपीलमक्षिका-
मलाविलं वा विजयप्रदं हविः ।
द्रव्याण्यनूनानि पटुः पुरोहितो
जुहोति सम्यग्विजयाय भूभृताम् ॥ ३ ॥

सत्त्वैरलीढमिति ॥ सत्त्वैः प्राणिभिःपिपीलकादिभिरलीढ-मनास्वादितं हविर्होमोपकरणं द्रव्यं पिपीलमक्षिकामलाविलं न कीटादिमलदूषितं न विजयप्रदं विशेषेण जयप्रदं भवति । एवमनूनानि द्रव्याणि न ऊनानि हीनानि होमीयवस्तूनि यदि पटुः पण्डितः कर्मनिपुणः पुरोहितः सम्यग्विजयाय सम्यग्विजयार्थं जुहोति भूभृतां राज्ञामिति ॥ ३ ॥

अथ हवनोपकरणेनाशुभसूचकशकुनमाह ।

गन्धमाल्यचरुकुम्भभाजन-
स्रुक्कुशव्यजनसर्पिषां यदा ।
भङ्गविस्मृतिनिपातहीनता
पार्थिवस्य न भवेत्तदा शुभम् ॥ ४ ॥

गन्धमाल्यचरुकुम्भभाजनस्रुक्कुशव्यजनसर्पिषामिति ॥ यदा गन्धमाल्यचरुकुम्भभाजनस्रुक्कुशव्यजनसर्पिषां यदि चन्दनस्रग्हवन-चरुपात्रस्रुचदर्भशूर्पघृतानां भङ्गविस्मृतिनिपातहीनता प्रमाणखण्डत-विस्मरणपतनन्यूनता भवेत्तदा पार्थिवस्य राज्ञो न शुभं भवेदिति ४॥

अथाहुतिसमये सुशकुनविजयमाह ।

शान्तायां दिशि यदि शङ्खतूर्यशब्दाः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सप्तीनां प्लुतमिभबृंहितानि वा स्युः ।
पुंसां वा प्रमुदितचेष्टितप्रलापाः
श्रूयन्ते यदि च जयोऽस्ति होमकाले ॥ ५ ॥

शान्तायां दिशीति ॥ यदि होमकाले हवनसमये शान्तायां दिशि शङ्खतूर्यशब्दा भवेयुः शान्तादिशं स्वयमेव वक्ष्यति । सप्तीनामश्वानां प्लुतमुद्भावनम् । इभबृंहितानि गजशब्दविशिष्टानि वा स्यु र्भवन्ति । वा पुंसां पुरुषाणां प्रमुदितचेष्टितप्रलापाः श्रूयन्ते । तर्हि जयोऽस्ति विजयो भवतीति ॥ ५ ॥

अथ यात्रासामयिकऋग्यजुःसामाथर्ववेदमन्त्रैरेतै-
राहुतिस्तुतिमाह त्रिभिः

अप्रतिरथः समस्तो यात्रालिङ्गस्तथाऽभयश्च गणः ।
स्वस्त्ययनशर्म्मवर्म्माऽपराजिताःपुष्पसंज्ञाश्च ॥६॥
इन्द्रश्चन्द्रश्चेति गणो यत्तेचन्द्रश्च भूतभूतेति ।
सूक्तं महाव्याहृतयो मन्त्राशीवैश्नवा मन्त्राः ७॥
प्राजापत्याश्चोक्ता होमे निर्गच्छतोऽनुगमने च ।
अग्निपुरोहितसंस्थान्यतो निमित्तानि वक्ष्यामि ८

अप्रतिरथ इति ॥ समस्तः सम्पूर्णोऽप्रतिरथः किंविशिष्टो यात्रालिंगो यात्राया लिंगं चिह्नं यस्मिन्नप्रातिरथे सः यतोऽप्रतिरथो वहवः सन्त्यतो यात्रालिंगात्मकोऽप्रतिरथो यथोक्तः सामवेदे वेयगाने षष्ठप्रपाठके (मं० २७ । २८ । २९) ऊहगाने च अप्रतिरथान्तराणि त्रीणि आमन्द्रैरा १ आमन्द्रैरिन्द्रा२ आमन्द्रैरिन्द्राहरिभिरिति ३ अनेन वर्गेणोक्तः प्रयोगःसामविधानब्राह्मणे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वितीयाध्याये तृतीयखण्डे आमन्द्रैरिन्द्रारिति वर्गं गीत्वा ऽनपेक्षमाणो व्रजेत्स्वस्त्यर्थचरितः पुनरेति नाध्वनि च प्रमीयते तथाऽभयश्चगणोऽरण्यगाने द्वितीयप्रपाठकादौ दिग्मन्त्राः । आभायिमाहे १ आभिप्रामांहीत्यादः अनेनाप्युक्तः प्रयोगः सामविधाने यजुर्वेदे (अ० १७) अप्रतिरथ आशुःशिशानइत्यारभ्य १२ मन्त्रः अभयगण ऋचंवाचमित्यारभ्य तच्चक्षुरित्यन्त अभयसूक्तमथर्वणे अभयंनः करोत्यन्तरिक्षमित्यादिः स्वस्त्ययनशर्मवर्मापराजिताः । स्वस्त्ययनमन्त्राः स्वस्तिन इन्द्र इत्यादयः सर्ववेदप्रसिद्धाः शर्ममन्त्राः सामन्यरण्यगाने षष्ठप्रपाठके द्वितीयाध्याये वाङ्मनः प्राणःप्राण इत्यादयः सप्तदश वर्मन्त्रः मर्माणिते वर्मणाच्छादयामीति उत्तरार्चिके यजुषि च अथापराजिता मन्त्राः सोमं राजानं १ योराजाचर्षिणीनामित्यादिश्चत्वारः अस्य प्रयोगः प्रशेलानीवर्गेण युद्धः सन्नद्धः सन् जयति न पराजीयते यद्वा वेयगाने उत्वामन्दन्तुसोम इत्यनेन जयति न पराजीयते एतेषां प्रयोगः सामविधाने तृतीयाध्याये चतुर्थखण्डे पञ्चमखण्डे च द्रष्टव्यः पुष्पसंज्ञाश्च पुष्पसंज्ञाङ्कितमन्त्राः । यजु० १२ अ० ओषधीः प्रतिमोदध्वमिति ॥ ६ ॥ इन्द्रश्चन्द्रश्चेति इन्द्रश्चगणो वेयगाने ऐन्द्रपर्वणि छन्दस्यार्चिके च तद्वोगाया सुते सचेत्यादय एकपञ्चाशदधिकशतत्रयमन्त्राः ऋग्वेदे च अ० २ वर्ग ७ येजात एवेत्यादि १५ चन्द्रश्चेतिगणश्चन्द्रगणः वेयगाने एकादशे प्रपाठके चन्द्रमाअउवा इत्यादयश्चत्वारो मन्त्राः । तथारण्यगाने ३ प्रपाठके चन्द्रसाम अष्टममन्त्रः पञ्चमप्रपाठके चत्वारो मन्त्राः यत्तेचन्द्रश्च यत्तेसोम इति यजुर्वेदमन्त्रः भूतभूतेति भूतमन्त्रः अरण्यगाने ६ प्र० पा० २३ मन्त्रः हाउ हाउ हाउ भूताओवा । सूक्तं प्रसिद्धं श्रीसूक्तादि ऋग्वेदीयं महाव्याहृतयः सप्तप्रसिद्धाः । मन्त्राशीराशीर्वादमन्त्रः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आग्नहाग्निरित्यादि यजुर्वेदीयः वैष्णवा विष्णोरिमे वैष्णवा मन्त्राः वेयगाने इदं विष्णुः प्रक्षस्य विष्णो प्रकाविष्याम् तत्रेद्ध सहस्र शीर्षा त्रिपादूर्ध्वमित्यादयः ॥ ७ ॥ प्राजापत्याश्च प्रजापतेरिमे प्राजापत्या मन्त्रा निर्गच्छतो गन्तू राज्ञो यात्रायां हवनकर्मणि चोक्ताः कथिता अनुगमने यात्रानिवृत्तौ च एते पूर्वोक्ता मन्त्राः कथिता अत एभ्यः प्रयोगेभ्योऽग्निपुरोहितसंस्थान्यग्निपुरोहिताभ्यां सम्यक् स्थीयन्ते यानि तानि निमित्तानि शुभाशुभसूचकशकुनानि वक्ष्यामि कथयिष्याम्यहमत्र ॥ ८ ॥

अथातो हवनाग्निनाऽशुभसूचकशकुनान्याह ।

कृतेऽपि यत्नेऽपि कृशः कृशानु-
र्यातव्यकाष्ठाविमुखो नतार्चिः ।
वामीकृतावर्तशिखोऽति धूम्रो
विच्छिन्नसाकम्पविलीनमूर्त्तिः ॥ ९ ॥

कृतेऽपि यत्नेऽपि कृश इति ॥ कृतेऽपि यत्ने समुद्योगे सति । अतिकृशोऽधिकरिक्तः कृशानुरग्निश्चेत् । अपिच यातव्यकाष्ठाविमुखो गन्तव्यदिक्प्रतिकूलः । अपिच नतार्चिः नतानम्रीभूताऽर्चिः शिखा यस्येति तथा । अथच वामीकृतावर्तशिखः । वामावर्त्तज्वालः । अतिधूम्रोऽधिधूम्रो विच्छिन्नसाकं विच्छिन्नसहितं प्रविलीनमूर्त्तिः प्रविलीनमूर्त्तिरितिपाठेऽयमर्थः विच्छिन्नसाकम्पविलीनमूर्त्तिरिति पाठे । विच्छिन्ने खण्डिते साकम्पे विलीना र्त्तिर्यस्येति तथा ॥ ९ ॥

अथ विशेषमाह ।

सिमिसिमायति यस्य हविर्हुतं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुरधनुः सदृशः कपिशोऽथ वा ।
रुधिरपीतकबभ्रुहरिच्छविः
परुषमूर्त्तिरनिष्टकरोऽनलः ॥ १० ॥

सिमिसिमायतीति ॥ यस्य राज्ञो हविर्होमीयं द्रव्यं हुतं सत् सिमिसिमायति सिमसिममिवाचरति । अथवा सुरधनुःसदृश-इन्द्रायुधसमः कपिशो रुधिरारुणवर्णः । अपिच रुधिर-पीतकबभ्रुहरिच्छविः । शोणितपिङ्गलनकुलहरितकान्तिः । प-रुषमूर्त्तिः कठोरतनुः । एषोऽनलोऽग्निरनिष्टकरो भवतीति गन्तू-राज्ञ इतिशेषः ॥ १० ॥

पुनर्विशेषमाह ।

श्वखरक्रभवानरानुरूपो
निगडविभीषणशस्त्ररूपभृद्वा ।
शवरुधिरवसास्थिवस्तगन्धो
हुतभुगनिष्टफलः स्फुलिङ्गकृच्च ॥ ११ ॥

श्वखरकरभवानरानुरूप इति ॥ यदि श्वखरकरभवानरानु-रूपोऽनलोऽग्निर्भवति । वा निगडविभीषणशस्त्ररूगभृदग्निर्भवति । च शब्दात् । शवरुधिरवसास्थिवस्तगन्धोऽनलो भवति । स्फुलिङ्ग-कृदग्निकणकृत् । एषोग्निरनिष्टफलः स्यादिति ॥ ११ ॥

पुनर्विशेषमाह ।

चर्मविपाटनतुल्यनिनादो
जर्जरमन्दविरूक्षरवो वा ।
आकुलयंश्च पुरोहितसभ्यान्
धूमचयैरशिवाय हुताशः ॥ १२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चर्मविपाटनतुल्यनिनाद इति ॥ चर्मविपाटनतुल्यनिनादश्चर्मोत्पाटनसदृशशब्दो जर्जरमन्दविरूक्षरवो वा पुरोहितसभ्यानाकुलयंश्च धूमचयैर्धूमसमुदायैरशुभायाशुभफलदाय हुताशोऽग्निर्भवतीति राज्ञामिति शेषः ॥ १२ ॥

अथातो हवनाग्निना शुभसूचकशकुनान्याह ।

स्वाहावसानसमये स्वयमुज्ज्वलार्चिः
स्निग्धप्रदक्षिणशिखो हुतभुङ्नृपस्य ।
गङ्गादिवाकरसुताजलचारुहारां
धात्रीं समुद्ररसनां वशगां करोति ॥ १३ ॥

स्वाहावसानसमय इति ॥ स्वाहावसानसमये पूर्णाहुतिकाले स्वयमात्मनैवोज्ज्वलार्चिरुद्धतशिखो हुतभुगग्निर्भवति । अपिच स्निग्धप्रदक्षिणशिखो हुतभुग्भवति । तदा नृपस्य राज्ञो गङ्गादिवाकरसुताजलचारुहारां भागीरथीयमुनापानीयरुचिरमालां समुद्ररसनां रत्नाकरक्षुद्रघण्टिकां धात्रीं पृथ्वीं वशगां करोति तदायत्तां कारयतीति ॥ १३ ॥

अथ विशेषमाह ।

हारकुन्दकुसुमेन्दुसन्निभः
संहतोऽङ्गसुखदो महोदयः ।
अंकुशाब्जजलवारणच्छवि-
र्हूयतेऽल्पतपसां न हव्यभुक् ॥ १४ ॥

हारकुन्दकुसुमेन्दुसन्निभ इति ॥ हारकुन्दकुसुमेन्दुसन्निभः मुक्ताहारमाघ्यपुष्पचन्द्रसदृशः । संहतः समुदायोऽङ्गसुखदः शरीरसुखकारकोभवति । महोदयो महानुदयो भवति । अपिच अंकुशाब्जज-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुरधनुः सदृशः कपिशोऽथ वा ।
रुधिरपीतकबभ्रुहरिच्छविः
परुषमूर्त्तिरनिष्टकरोऽनलः ॥ १० ॥

सिमिसिमायतीति ॥ यस्य राज्ञो हविर्होमीयं द्रव्यं हुतं सत् सिमिसिमायति सिमसिममिवाचरति । अथवा सुरधनुःसदृश-इन्द्रायुधसमः कपिशो रुधिरारुणवर्णः । अपिच रुधिर-पीतकबभ्रुहरिच्छविः । शोणितपिङ्गलनकुलहरितकान्तिः । प-रुषमूर्त्तिः कठोरतनुः । एषोऽनलोऽग्निरनिष्टकरो भवतीति गन्तू-राज्ञ इतिशेषः ॥ १० ॥

पुनर्विशेषमाह ।

श्वखरकरभवानरानुरूपो
निगडविभीषणशस्त्ररूपभृद्वा ।
शवरुधिरवसास्थिवस्तगन्धो
हुतभुगनिष्टफलः स्फुलिङ्गकृच्च ॥ ११ ॥

श्वखरकरभवानरानुरूप इति ॥ यदि श्वखरकरभवानरानु-रूपोऽनलोऽग्निर्भवति । वा निगडविभीषणशस्त्ररूगभृदग्निर्भवति । च शब्दात् । शवरुधिरवसास्थिवस्तगन्धोऽनलो भवति । स्फुलिङ्ग-कृदग्निकणकृत् । एषोग्निरनिष्टफलः स्यादिति ॥ ११ ॥

पुनर्विशेषमाह ।

चर्मविपाटनतुल्यनिनादो
जर्जरमन्दविरूक्षरवो वा ।
आकुलयंश्च पुरोहितसभ्यान्
धूमचयैरशिवाय हुताशः ॥ १२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चर्मविपाटनतुल्यनिनाद इति ॥ चर्मविपाटनतुल्यनिनादश्चर्मोत्पाटनसदृशशब्दो जर्जरमन्दविरूक्षरवो वा पुरोहितसभ्यानाकुलयंश्च धूमचयैर्धूमसमुदायैरशुभायाशुभफलदाय हुताशोऽग्निर्भवतीति राज्ञामिति शेषः ॥ १२ ॥

अथातो हवनाग्निना शुभसूचकशकुनान्याह ।

स्वाहावसानसमये स्वयमुज्ज्वलार्चिः
स्निग्धप्रदक्षिणशिखो हुतभुग्नृपस्य ।
गङ्गादिवाकरसुताजलचारुहारां
धात्रीं समुद्ररसनां वशगां करोति ॥ १३ ॥

स्वाहावसानसमय इति ॥ स्वाहावसानसमये पूर्णाहुतिकाले स्वयमात्मनैवोज्ज्वलार्चिरुद्धतशिखो हुतभुगाग्निर्भवति । अपिच स्निग्धप्रदक्षिणशिखो हुतभुग्भवति । तदा नृपस्य राज्ञो गङ्गादिवाकरसुताजलचारुहारां भागीरथीयमुनापानीयरुचिरमालां समुद्ररसनां रत्नाकरक्षुद्रघण्टिकां धात्रीं पृथ्वीं वशगां करोति तदायत्तां कारयतीति ॥ १३ ॥

अथ विशेषमाह ।

हारकुन्दकुसुमेन्दुसन्निभः
संहतोऽङ्गसुखदो महोदयः ।
अंकुशाब्जजलवारणच्छवि-
र्हूयतेऽल्पतपसां न हव्यभुक् ॥ १४ ॥

हारकुन्दकुसुमेन्दुसन्निभ इति ॥ हारकुन्दकुसुमेन्दुसन्निभः मुक्ताहारमाघ्यपुष्पचन्द्रसदृशः । संहतः समुदायोऽङ्गसुखदः शरीरसुखकारकोभवति । महोदयो महानुदयो भवति । अपिच अंकुशाब्जज-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लवारणच्छविः । शस्त्रविशेषकमलवारि गजवच्छविर्हव्यभुगग्निरल्प-तपसामकृतपुण्यवतां राज्ञां मध्ये न हूयते । अर्थादेतादृशोऽग्निः पुण्यवतामेवगृहे हूयते ॥ १४ ॥

पुनर्विशेषमाह ।

चामीकराशोककिरीटरत्न-
वैदूर्यनीलोत्पलसन्निभेऽग्नौ ।
न ध्वान्तमन्तर्भवनेऽवकाशं
करोति रत्नांशुहृतं नृपस्य ॥ १५ ॥

यस्य नृपस्य राज्ञश्चामीकराशोककिरीटरत्नवैदूर्यनीलोत्पलसन्निभेऽग्नौ हूयमाने सति सुवर्णवञ्जुलमुकुटरत्नवैदूर्यनीलकमलसदृशे वह्नौ हवने क्रियमाणे भवति । तस्य राज्ञो रत्नांशुहृतं रत्नप्रभाहृतं ध्वान्तमन्धकारोऽन्तर्भवने गृहमध्येऽवकाशं स्वस्थानं न करोति । एतेन राज्ञो निधिचयाधिकत्वाद्भाग्याधिकताद्योत्यत इति ॥१५॥

पुनर्विशेषमाह ।

येषां रथौघार्णवमेघदन्तिनां
समः स्वनोऽग्निर्यदि वाऽपि दुन्दुभेः ।
तेषां मदान्धेभघटावघट्टिता
भवन्ति याने तिमिराविला दिशः ॥ १६ ॥

येषां राज्ञामग्निर्हवनाग्नी रथौघार्णवमेघदन्तिनां स्यन्दननिवहसमुद्रवारिवाहगजानां समस्वनस्तत्तुल्यशब्दो यदिवा दुन्दुभेर्भेर्याः सदृशशब्दो भवेत् । तेषां याने यात्रायां मदान्धेभघटावघट्टिता दिशो मदयुक्तगजसमूहमर्दिताः काष्ठास्तिमिराविला तिमिरमलिना भवन्तीति ॥ १६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशेषमाह ।

ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम् ।
उदयास्तधराधराधरा हिमवद्विन्ध्यपयोधरा धरा॥१७॥

ध्वजकुम्भहयेभभूभृतां वैजयन्तीघटाश्वगजपर्वतानामनुरूपे सदृशे हूयमानेऽग्नौ भूभृतां राज्ञामुदयास्तधराधराधरा उदयास्ताचलौष्ठपुटा हिमवद्विन्ध्यपयोधरा हिमालयविन्ध्याचलस्तना धरा पृथिवी वशमधीनतामेति प्राप्नोति ॥ १७ ॥

पुनर्विशेषमाह ।

द्विरदमदमहीसरोजलाजै-
र्घृतमधुना च हुताशने सगन्धे ।
प्रणतनृपशिरोमणिप्रभाभि-
र्भवति पुरश्छुरिता नृपस्य दीप्तिः ॥ १८ ॥

द्विरदमदमहीसरोजलाजैः। गजमदपृथ्वीसरोरुहलाजैः। घृतमधुना च। आज्यक्षौद्रेण च। सगन्धे तुल्यगन्धे। हुताशनेऽग्नौ हूयमाने सति नृपस्य राज्ञो दीप्तिः कान्तिः। प्रणतनृपशिरोमणिप्रभाभिः। प्रणतानां प्रणामं कुर्वतां नृपाणां सामन्तराजसङ्घानां शिरोमणिप्रभाभिः किरीटरत्नकान्तिभिः पुरश्छुरिता अग्रे स्फुरिता अधिकाधिका भवति। चतुर्दिग्गता नृपास्तस्य करदीकृता भवन्तीत्यर्थः ॥ १८ ॥

अथाध्यायोपसंहारे कस्मिन्कर्मण्यैवं विचार्यमित्याह ।

अग्न्याश्रितं यत्फलमुक्तमस्मि-
न्नृजातकर्मादिषु पौष्टिकेषु ।
यज्ञेषु सर्वेषु च वह्निकार्ये-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ष्वेवं वदेद्यस्य यथानुरूपम् ॥ १९ ॥

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायामग्नि-
निमित्ताध्यायोऽष्टमः ॥ ८ ॥

अग्न्याश्रितमिति ॥ अस्मिन्ग्रन्थे अग्न्याश्रितं हुताग्निनिमित्तं यत्फलं परिणाम उक्तं कथितम् । एवं नृजातकर्मादिषु जातकर्मादिषु । संस्कारेषु । पौष्टिकेषु तदारव्यकर्मसु । यज्ञेषु यागेषु । सर्वेषु वह्निकार्येषु । सकलहवनकर्मसु । यस्य यादृशः कर्मणो यथानुरूपं पूर्वोक्तफलानुसारं तत्तत्फलं वदेत् सुधीरिति शेषः ॥ १९ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायाम-
ग्निनिमित्ताध्यायोऽष्टमः ॥ ८ ॥

अथ नक्षत्रकेन्दुभाध्यायो व्याख्यायते तत्रादितो
जन्मर्क्षमारभ्य संज्ञाविशेषमाह ।

जन्मर्क्षमाद्यं दशमं तु कर्म
साङ्घातिकं षोडशमृक्षमाद्यात् ।
अष्टादशं स्यात् समुदायसंज्ञं
वैनाशिकं विंशतिभात्तृतीयम् ॥ १ ॥

जन्मर्क्षं जनिनक्षत्रमाद्यम् । तु पुनः दशमं कर्म ज्ञेयम् । आद्याज्जन्मर्क्षात्षोडशमृक्षं भं साङ्घातिकं स्यात् । अष्टादशं समुदायसंज्ञं स्यात् । विंशतिभात्तृतीयमाद्यात्त्रयोविंशतिकं वैनाशिकं स्यात् ॥ १ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विशेषमाह ।

यत्पञ्चविंशं खलु मानसं तत्
षड्क्ष एवं पुरुषस्तु सर्वः ।
राज्ञो नवर्क्षाणि वदन्ति जाति-
देशाभिषेकैः सहितानि तानि ॥ २ ॥

यत्पञ्चविंशमिति ॥ पञ्चविंशं यत्तत्खलु मानसं स्यादेवमनेन सर्वः पुरुषस्तु सकललोकस्तु षड्क्षः स्यात् । राज्ञो नरेन्द्रस्य जातिदेशाभिषेकैः सहितानि तानि षड्ऋक्षाणि नवर्क्षाणि वदन्त्याचार्याः ॥ २ ॥

पुनर्विशेषमाह ।

राज्ञोऽभिषेकर्क्षमुशन्त्यमिश्रं
साधारणे द्वे सहषड्भिराद्यैः ।
किन्त्वत्र दोषाश्च गुणाश्च सर्वे
प्रधानमेकं पुरुषं भजन्ते ॥ ३ ॥

राज्ञोऽभिषेकर्क्षमिति ॥ राज्ञोऽभिषेकर्क्षमभिषेकनक्षत्रममिश्रं न केनापि सहितमुशन्ति । आद्यैः पूर्वोक्तैः षड्भिः सह द्वे जातिदेशाख्ये साधारणे भवतः । किन्त्वत्र नक्षत्रकैन्दुभाध्याये दोषाश्च गुणाश्च सन्ति । सर्वे दोषा गुणाश्च एकं केवलं प्रधानं राजानं पुरुषं भजन्ते सेवन्त इति ॥ ३ ॥

पुनर्विशेषमाह ।

कूर्मोपदिष्टानि हि देश भानि
राज्ञोऽभिषेकाहानि चाभिषेकम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

या जातयो भस्य भवन्त्यतस्ता
वर्गांश्च वक्ष्यामि यथाक्रमेण ॥ ४ ॥

कूर्मोपदिष्टानि कूर्मचक्रकथितानि देशभानि देशनक्षत्राणि ज्ञेयानि। राज्ञो नरेन्द्रस्याभिषेकाहानि चाभिषेकदिने चाभिषेकमभिषेकनक्षत्रं ज्ञेयम्। भस्य नक्षत्रस्य या जातयो भवन्ति तास्तान् वर्गांश्च यथाक्रमेण वक्ष्यामीति ॥ ४ ॥

अथातो जातिकर्मभेदेन नक्षत्राण्याह।

पूर्वात्रयं सानलमग्रजानां
राज्ञां तु पुष्येण सहोत्तराणि।
सपौष्णमैत्रं पितृदैवतं च
प्रजापतेर्भं च कृषीवलानाम् ॥ ५ ॥

पूर्वात्रयमिति॥ सानलं कृत्तिकासहितं पूर्वात्रयं पूर्वफल्गुनीपूर्वाषाढपूर्वभाद्रपदमग्रजानां ब्राह्मणानां नक्षत्रं ज्ञेयम्। पुष्येण पुष्यनक्षत्रेण सहोत्तराणि उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रनक्षत्राणि राज्ञां तु कथितानि। सपौष्णमैत्रं रेवत्यनुराधासहितं पितृदैवतं च मघानक्षत्रं च प्रजापतेर्ब्रह्मणो भं च रोहिणीनक्षत्रं च कृषीवलानां क्षेत्रवृत्तीनां कर्षकाणां ज्ञेयम् ॥ ५ ॥

पुनर्विशेषमाह।

आदित्यहस्ताभिजिदाश्विनानि
वणिग्जनानां प्रवदन्ति भानि।
मूलत्रिनेत्रानिलवारुणानि
भान्युग्रजातेः प्रभविष्णुतायाः ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आदित्यहस्ताभिजिदाश्विनानि पुनर्वसुकराविधिदस्रनक्षत्राणि वणिग्जनानां भानि नक्षत्राणि प्रवदन्त्याचार्याः । मूलत्रिनेत्रानिलवारुणानि भानि उग्रजातेः प्रभाविष्णुतायाः प्रभवनशीलस्य ज्ञेयानीति ॥ ६ ॥

पुनर्विशेषमाह ।

सौम्येन्द्रचित्रावसुदैवतानि
सेवाजनस्वाम्यमुपागतानि ।
सार्पं विशाखा श्रवणं भरण्य-
श्चाण्डालजाते रभिनिर्दिशन्ति ॥ ७ ॥

सौम्येन्द्रचित्रावसुदैवतानि नक्षत्राणि सेवाजनस्वाम्यमुपागतानि अर्थादेतानि नक्षत्राणि सेवाजनस्य शूद्रजनस्याधिपतयो भवन्तीति । सार्पमश्लेषा । विशाखा श्रवणं भरण्यश्चण्डालजातेरभिनिर्दिशन्ति चाण्डालस्य नक्षत्रं वदन्तीति ॥ ७ ॥

अथैभ्यः कथितनक्षत्रेभ्यः फलार्थमाह ।

रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितम् ।
ग्रहणगतमथोल्कया हतं नियतमुखाकरपीडितं च यत् ८

रविरविसुतभोगमागतं सूर्यशनिभोगप्राप्तं नक्षत्रम् । क्षितिसुतभेदनवक्रदूषितं मङ्गलयुद्धानृजुगतिदूषितं नक्षत्रम् । ग्रहणगतं रविचन्द्रग्रहणप्राप्तं नक्षत्रम् । अथोल्कया हतमुल्कापातदूषितम् नियतमुखाकरपीडितं नियमेन चन्द्राकिरणपीडितं यन्नक्षत्रम् ८॥

तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययजातमेव वा ।
निगदितपरवर्गदूषितं कथितविपर्ययगं समृद्धये ९॥

तदुपहतमिति ॥ तदुपहतमितिप्रचक्षते प्रकृतिविपर्ययजा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तमेव वा प्रचक्षते । निगदितपरवर्गदूषितम् । उक्तलद्वर्गगतमस-मृद्धये भवति । कथितविपर्ययगं समृद्धये भवति ॥ ९ ॥

अथ संज्ञाभेदेभ्यः पृथक् फलान्याह ।

रोगाभ्यागमवित्तनाशकलहा सम्पीडिते जन्मभे
सिद्धिं कर्म न याति कर्मणि हते भेदस्तु साङ्घातिके।
द्रव्यस्योपचितस्य सामुदयिके सम्पीडिते संक्षयो
वैनाशे च भवन्ति कायविपदश्चित्तासुखं मानसे१०

जन्मभे पूर्वोक्ते आद्यनक्षत्रे सम्पीडिते सम्यक् पीडिते सति रोगाभ्यागमवित्तनाशकलहा भवन्तीति । कर्मणि कर्माख्ये हते कर्म व्यापारः । सिद्धिं फलनिष्पत्तिम् । न याति न प्राप्नोति । साङ्घातिके तदाख्ये हते भेदो बन्धुजनविग्रहो भवेत् । सामुदायिके तदाख्ये सम्पीडिते उपाचितस्य द्रव्यस्य सञ्चितधनस्य सङ्क्षयः सम्यग्नाशो भवेत् । वैनाशे च सम्पीडिते कायविपदः शरीरा-पदो भवन्ति । मानसे तदाख्ये भे पीडिते चित्ताऽसुखं मनस्य-सुखं भवतीति ॥ १० ॥

अथ षड्भिस्त्रिभिर्वा निरुपद्रुतैः फलान्याह ।

निरुपद्रुतभो निरामयः सुखभाक् पुष्टतनुर्धनान्वितः।
षडुपद्रुतभो विनश्यति त्रिभिरन्यैश्च सहावनीश्वरः११

निरुपद्रुतभो निरुपद्रुतानि भानि यस्येति तथा स निरामयो रोगरहितो भवतीति । सुखभाग्भवति । पुष्टतनुः सुदेहो भवति धनान्वितो धनसहितो भवति । षडुपद्रुतभो षडुपद्रुतानि भानि यस्येति तथा स विनश्यति विशेषेण नश्यति । त्रिभिश्चोपद्रुतभै-श्चावनीश्वरो राजाऽन्यै राजभिः सह सहितो भवतीति ॥११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ विशेषमाह ।

न भवति शरीरपीडा यस्य विना शान्तिभिर्भपीडायाम्।
तस्य शरीरविपत्तिं पाकान्ते देवलः प्राह ॥ १२ ॥

यस्य राज्ञो भपीडायां नक्षत्रपीड़ायां सत्यां शान्तिभिर्विना ग्रहभविनायकादिशान्तिभी कृते शरीरपीडा देहबाधा न भवति तस्य निरुपद्रुतस्य राज्ञः पाकान्ते दशान्ते परिणामान्ते शरीरविपत्तिं देहापदं देवलो देवलनामाचार्यः प्राह कथयतिस्म ॥१२॥

अथ सर्वेषां वर्णानां नक्षत्रपीडायां शान्त्युपायमाह ।

सर्वेषां पीडायां दिनमेकमुपोषितोऽनलं जुहुयात्।
सावित्र्या चीरतरोः समिद्भिरमरद्विजानुरतः॥१३॥

सर्वेषां जनानां पीडायां विद्यमानायामेकदिनमुपोषितः कृतैकदिनोपवासोऽमरद्विजानुरतो देवविप्रसक्तः सावित्र्या सवितृदेवमन्त्रेण क्षीरतरोर्दुग्धवृक्षस्य समिद्भिः काष्ठैरनलमग्निं जुहुयादिति ॥ १३ ॥

अथातो नक्षत्रसञ्ज्ञाभेदेन शान्तिभेदानाह पञ्चभिः पद्यैरिति

गोक्षीरसितवृषभशकृन्मूत्रैः पत्रैश्च पूर्णकोशायाः ।
स्नानं जन्मनि दुष्टे स्वाचारवतां हरति पापम् ॥१४॥

जन्मनि जन्मनक्षत्रे दुष्टे सति गोक्षीरसितवृषभशकृन्मूत्रैश्च गोदुग्धशुक्लोक्षगोमयमूत्रैश्च पूर्णकोशायाः पत्रैश्च स्नानं गदितमेवं स्वाचारवतां शोभनाचारशालिनां पापमघं हरति नाशयतीति१४

कर्मणि मधुघृतहोमो दशाहमक्षारमद्यमांसादः ।
दूर्वाप्रियङ्गुसर्षपशतपुष्पशतावरीस्नानम् ॥१५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कर्मणि दुष्टे तदाख्ये भे पीडिते सति दशाहं दशाहोरात्रावधिमक्षारमद्यमांसादः सन् अलवणसुरापलभुक् सन् मधुघृतहोमः चौद्राज्याहुतिर्विधेया दूर्वाप्रियङ्गुसर्षपशतपुष्पशतावरीस्नानं विधेयमिति । अत्र दूर्वा प्रसिद्धैव । प्रियङ्गुः फलिनी । सर्षपोऽपि प्रसिद्ध एव । शतपुष्पं (लोके सोंफ इति) शतावरी प्रसिद्धा । एताभिः स्नानं कथितमिति ॥ १५ ॥

साङ्घातिकेऽभितप्ते मांसमधुक्रौर्यमन्मथाँस्त्यक्त्वा।
स्नातो दूर्वां जुहुयाद्दानं दद्याद्यथाशक्ति ॥ १६ ॥

साङ्घातिके १६ तदाख्ये भे नक्षत्रेऽभितप्ते पीडिते मांसमधुक्रौर्यमन्मथाँस्त्यक्त्वा । मांसः प्रसिद्ध एव । मधु क्षौद्रं मद्यं वा क्रौर्यं क्रूरता । मन्मथः कामो मिथुनम् । एतान् वर्जयित्वा स्नातः कृतस्नानो दूर्वां जुहुयात् हवनं कुर्यात् । यथाशक्ति शक्त्यानुसारं दानं च दद्यात् ॥ १६ ॥

सामुदायिकेऽपि दद्यात्काञ्चनरजतान्युपहते धिष्ण्ये।
वैनाशिकेऽन्नपानं वसुधां च गुणान्विते दद्यात् १७॥

सामुदायिकेऽपि १८ तदाख्येऽपि धिष्ण्ये नक्षत्रे उपहतेऽभितप्ते काञ्चनरजतानि दद्यात् । वैनाशिके २३ तदाख्ये भे तप्ते ऽन्नपानं भक्ष्यं पेयं वसुधां च पृथ्वीं च गुणान्विते गुणशालिने वेदविदे द्विजाय दद्यात् ॥ १७ ॥

मानसतापे होमः सरोरुहैः पायसैर्द्विजाः पूज्याः ।
गजमदशिरीषचन्दनबलातिबलावारिणा स्नानम्१८

इति श्रीवराहमिहिराचार्यविरचितायां योगयात्रायां
नक्षत्रकेन्द्रुभाध्यायो नवमः ॥ ९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मानसताप २५ तदाख्ये तत्र सरोरुहैः कमलैः पायसैः परमान्नैर्होमो विधेयो द्विजा विप्राः पूज्या वन्दनीयाः । गजमदशिरीषचन्दनचलातिबलावारिणा स्नानं विधेयम् ॥ १८ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां नक्षत्रकैन्दुभाध्यायो नवमः ॥९॥

अथ हस्तिलक्षणाध्यायो व्याख्यायते तत्रादौ स्वस्वादरमिच्छुना हस्त्याधीनं शुभाशुभं ज्ञेयमिति सहेतुकमाह ।

आरिराधयिषुणा नराधिपं वारणाश्रितमिदं शुभाशुभम् । ज्ञेयमादरवता विपश्चिता वारणेषु नृपतेर्जयस्थितिः ॥ १ ॥

अरिराधयिषुणेति ॥ नराधिपं राजानमारिराधयिषुणा सेवितुमिच्छुनाऽऽदरवता विपश्चिता पण्डितेन वारणाश्रितं हस्त्याश्रयीभूतमिदं शुभाशुभं ज्ञेयम् । यतो वारणेषु गजेषु नृपतेर्जयस्थितिर्जयलक्ष्म्याः स्थितिर्भवतीति ॥ १ ॥

अथ गजशालादैर्घ्यादिकमाह ।

सार्द्धं हस्तशतं दैर्घ्या सविंशं विपुलाशतम् ।
चतुरस्राऽथ वा वृत्ता वारी वारणवृद्धिदा ॥ २ ॥

सार्द्धं हस्तशतमिति ॥ सार्द्धं हस्तशतं १५० दैर्घ्या दीर्घता । सविंशं विंशतिसहितं शतं विपुला विस्तृता । चतुरस्रा चतुःकोणाकृतिरथवा वृत्ता वर्त्तुलाकारा । वारी गजबन्धनी गजशाला (वारी तु गजबन्धनीत्यमरः) वारणवृद्धिदा गजवृद्धिदा भवतीति ॥ २ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ वर्त्तुलवार्या विशेषमाह ।

दशावगाहेन करा विस्तीर्णा दश चोपरि ।
अधः खातस्य पदवी हस्तमात्रा प्रकीर्तिता ॥ ३ ॥

दशावगाहेनेति । अवगाहेन दैर्घ्येण दश करा दश हस्ता विस्तीर्णा दश चोपरि उच्छ्रायः । अधो हस्तमात्रा खातस्य पदवी मर्यादा एवं वृत्ता वर्त्तुलाकारा वा वारी भवति । अर्थाद् दश-हस्तव्यासेनाधः परिधिर्दशहस्तोच्छ्रित एतादृशी समतलमस्तक-परिधिरूपा । एकहस्ताधः खाता वा वारी भवतीत्यर्थः ॥ ३ ॥

अथ गजशालाद्वारमाह ।

कर्त्तव्यं पूर्वतो द्वारमुत्तरं वा शुभावहम् ।
दक्षिणं पश्चिमं वाऽपि न कर्त्तव्यं कथञ्चन ॥ ४ ॥

कर्त्तव्यमिति ॥ पूर्वतः पूर्वदिशि द्वारं कर्त्तव्यं करणीयम् । वोत्तरं तच्छुभावहं शुभदायकं भवति । दक्षिणं वाऽपि पश्चिमं द्वारं कथञ्चन न कर्त्तव्यं न करणीयमिति ॥ ४ ॥

अथ गजगेहे विशेषमाह पञ्चभिः ।

मेढ़कस्तम्भमातृणां वृक्षाग्रं नावनौ क्षिपेत् ।
पूर्वाग्राच्चोत्तराग्राश्च संयोज्या नित्यमर्गला ॥ ५ ॥

मेढ़कस्तम्भमातृणामिति ॥ मेढ़कस्तम्भमातृणां वृक्षाग्रमवनौ पृथिव्यान्न क्षिपेत् किन्तु तन्मूलमेव पृथिव्यां यथास्पृशेत्तथा खात-मध्ये कारुणा स्थापयेत् अत्र वृक्षाग्रपदं शाखादिव्यावर्तकम्बोध्यम् अर्गला सारदारुमयो लौहमयो वा कपाटस्यावष्टम्भकदण्डः नित्यं सदा पूर्वाग्रात् दक्षिणावर्त्तक्रमेण च पुनरुत्तराग्रात् वा-मावर्त्तक्रमेण संयोज्या सम्यग्योज्येति ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दश विस्तारतो द्वारं पार्श्वयोस्तस्य मातृकाः ।
चतुर्दशकरोत्सेधा निःखात्य चतुरःकरान् ॥६॥

दशेति विस्तारत इत्यत्र सार्वविभक्तिकस्तसिरतो दशहस्तविस्तारं द्वारं कार्यमतस्य द्वारस्य पार्श्वयो श्चतुरःकरान निःखात्य निःखननं कृत्वा चतुर्दशकरोत्सेधाश्चतुर्दशहस्तांच्छ्राया मातृकाः कार्याः ६

षट्षण्मेढ़ान्तरस्थाश्च मेढ़काःपञ्च पञ्च च ।
चतुर्हस्तनिखातास्ते समुच्छ्रायान्वदाम्यतः ॥७॥

षडिति ॥ मेढ़ान्तरस्था षट् षट् मेढ़का ऊर्ध्वाधोरूपकाष्ठविशेषाः कार्याः च पुनः पञ्च पञ्च मेढ़काः कार्याः । अर्थान्मेढ़कान्तरवर्त्तिनः षट् षट् मेढ़का वा पञ्च पञ्च मेढ़का विधेयाः । ते मेढ़काश्चतुर्हस्तनिखाताः कार्या अतः परं समुच्छ्रायानुच्छ्रितमानानि वदामि कथयाम्यग्र इति ॥ ७ ॥

षट्सप्ताष्टनवोत्सेधा दशचेति यथाक्रमम् ।
नव वा दश वा वेधा मातृका याःषडंगुलाः ॥ ८ ॥

षडिति ॥ तेषां मेढ़कानां यथाक्रमं षट् सप्ताष्ट नव दश चेत्युत्सेधा उच्छ्रायाः कार्या वा नव वा दश वेधाः छिद्रयाणि अर्थात्प्रत्येकमेढकामध्ये नव २ वा दश २ वेधाः छिद्राणि विधेयानि याः पूर्वोक्ता मातृकास्तास्तु षडंगुलाः कार्या इति ॥ ८ ॥

वेधहान्यावशेषाःस्युर्मातृकाःक्रमशोऽपराः ।
इति द्वारसमासोऽयं वार्य्यास्संपरिकीर्तितः ॥९॥

इति वारीलक्षणम् ॥

अपरा मातृकाःक्रमशो यथाक्रमंवेधहान्यावशेषास्स्युः इतीत्थं वार्य्या गजबन्धनशालाया अयं द्वारसमासः परिकीर्तितउक्तः ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ वर्त्तुलवार्या विशेषमाह ।

दशावगाहेन करा विस्तीर्णा दश चोपरि।
अधः खातस्य पदवी हस्तमात्रा प्रकीर्तिता ॥ ३ ॥

दशावगाहेनेति । अवगाहेन दैर्घ्येण दश करा दश हस्ता विस्तीर्णा दश चोपरि उच्छ्रायः । अधो हस्तमात्रा खातस्य पदवी मर्यादा एवं वृत्ता वर्त्तुलाकारा वा वारी भवति । अर्थाद् दशहस्तव्यासेनाधः परिधिर्दशहस्तोच्छ्रित एतादृशी समतलमस्तकपरिधिरूपा । एकहस्ताधः खाता वा वारी भवतीत्यर्थः ॥३॥

अथ गजशालाद्वारमाह ।

कर्त्तव्यं पूर्वतो द्वारमुत्तरं वा शुभावहम् ।
दक्षिणं पश्चिमं वाऽपि न कर्त्तव्यं कथञ्चन ॥४॥

कर्त्तव्यमिति ॥ पूर्वतः पूर्वदिशि द्वारं कर्त्तव्यं करणीयम् । वोत्तरं तच्छुभावहं शुभदायकं भवति । दक्षिणं वाऽपि पश्चिमं द्वारं कथञ्चन न कर्त्तव्यं न करणीयमिति ॥ ४ ॥

अथ गजगेहे विशेषमाह पञ्चभिः ।

मेढकस्तम्भमातॄणां वृक्षाग्रं नावनौ क्षिपेत् ।
पूर्वाग्राच्चोत्तराग्राश्च संयोज्या नित्यमर्गला ॥५॥

मेढकस्तम्भमातृणामिति ॥ मेढकस्तम्भमातृणां वृक्षाग्रमवनौ पृथिव्यान्न क्षिपेत् किन्तु तन्मूलमेव पृथिव्यां यथास्पृशेत्तथा खातमध्ये कारुणा स्थापयेत् अत्र वृक्षाग्रपदं शाखादिव्यावर्तकम्बोध्यम् अर्गला सारदारुमयो लौहमयो वा कपाटस्यावष्टम्भकदण्डः नित्यं सदा पूर्वाग्रात् दक्षिणावर्त्तक्रमेण च पुनरुत्तराग्रात् वामावर्त्तक्रमेण संयोज्या सम्यग्योज्येति ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दश विस्तारतो द्वारं पार्श्वयोस्तस्य मातृकाः ।
चतुर्दशकरोत्सेधा निःखात्य चतुरःकरान् ॥६॥

दशेति विस्तारत इत्यत्र सार्वविभक्तिकस्तसिरतो दशहस्तविस्तारं द्वारं कार्यमतस्य द्वारस्य पार्श्वयो श्चतुरःकरान् निःखात्य निःखननं कृत्वा चतुर्दशकरोत्सेधाश्चतुर्दशहस्तोच्छ्राया मातृकाः कार्याः ६

षट्षरमेढ़ान्तरस्थाश्च मेढ़काःपञ्च पञ्च च ।
चतुर्हस्तनिखातास्ते समुच्छ्रायान्वदाम्यतः ॥७॥

षड़िति ॥ मेढ़ान्तरस्था षट् षट् मेढ़का ऊर्ध्वाधोरूपकाष्ठविशेषाः कार्याः च पुनः पञ्च पञ्च मेढ़काः कार्याः । अर्थान्मेढ़कान्तरवर्त्तिनः षट् षट् मेढ़का वा पञ्च पञ्च मेढ़का विधेयाः । ते मेढ़काश्चतुर्हस्तनिखाताः कार्या अतः परं समुच्छ्रायानुच्छ्रितमानानि वदामि कथयाम्यग्र इति ॥ ७ ॥

षट्सप्ताष्टनवोत्सेधा दशचेति यथाक्रमम् ।
नव वा दश वा वेधा मातृका याःषडंगुलाः ॥ ८ ॥

षड़िति ॥ तेषां मेढ़कानां यथाक्रमं षट् सप्ताष्ट नव दश चेत्युत्सेधा उच्छ्रायाः कार्या वा नव वा दश वेधाः छिद्र्याणि अर्थात्प्रत्येकमेढकामध्ये नव २ वा दश २ वेधाः छिद्राणि विधेयानि याः पूर्वोक्ता मातृकास्तास्तु षडंगुलाः कार्या इति ॥ ८ ॥

वेधहान्यावशेषाःस्युर्मातृकाःक्रमशोऽपगः ।
इति द्वारसमासोऽयं वार्य्यास्संपरिकीर्तितः ॥९॥

इति वारीलक्षणम् ॥

अपरा मातृकाःक्रमशो यथाक्रमंवेधहान्यावशेषास्स्युः इतीत्थं वार्य्यां गजबन्धनशालाया अयं द्वारसमासः परिकीर्तितउक्तः ॥९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ चतुर्जातिकहस्तिलक्षणमाह तत्रादौ भद्रलक्षणम् ।

मध्वाभदन्ताः सुविभक्तदेहा
न चोपदिग्धा न कृशाः क्षमाश्च ।
गात्रैः समैश्चापसमानवंशा
वाराहतुल्यैर्जघनैश्च भद्राः ॥ १० ॥

मध्वाभदन्ता इति ॥ मध्वाभदन्ता मधुनिभरदाः । सुविभक्तदेहाः शोभनविभज्यमानशरीराः । नचोपदिग्धा नातिस्थूला न कृशा न खिन्ना क्षमाश्च कार्य्यक्षमाश्च । समैर्नविषमैर्गात्रैः शरीरैश्चापसमानवंशा धनुःसदृशपृष्ठाः । वाराहतुल्यैः शूकरसमैर्जघनैश्च । भद्रा भद्रसंज्ञका गजा भवन्तीति ॥ १० ॥

अथ मन्दगजलक्षणम् ।

वक्षोऽथ कक्षा वलयः श्लथश्च
लम्बोदरस्त्वग्बृहती गलश्च ।
स्थूला च कुक्षिः सहमेचकेन
सैंही च दृग्मन्दमतङ्गजस्य ॥ ११ ॥

वक्ष इति ॥ मन्दमतङ्गजस्य मन्दगमनशीलहस्तिनो वक्षो वक्षस्थानमथ कक्षावलयः कक्षामण्डलः श्लथः शिथिलो भवति । लम्बोदरो दीर्घजठरस्त्वग्बृहती गलश्च कण्ठश्च बृहद्विपुलः । स्थूला च कुक्षिर्विपुलः कुक्षिभागो मेचकेन सह श्यामलचिन्हविशिष्टेन सह भवति सैंहीदृक् सिंहसदृशनेत्रो भवतीति ॥ ११ ॥

अथ मृगसङ्कीर्णगजयोर्लक्षणमाह ।

मृगास्तु ह्रस्वाधरवालमेढ्रा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्तब्धाङ्घ्रिकण्ठद्विजहस्तकर्णाः ।
स्थूलेक्षणाश्चेति यथोक्तचिन्हैः
सङ्कीर्णनागा व्यतिमिश्रचिन्हाः ॥ १२ ॥

मृगास्त्विति ॥ ह्रस्वाधरबालमेढ्राः खर्वोष्ठपुच्छशिश्नास्तब्ध-ङ्घ्रिकण्ठद्विजहस्तकर्णाः लघुचरणगलदन्तशुण्डश्रवसः । स्थूलेक्षणाश्चेति विशालनेत्राश्चेति यथोक्तचिन्हैर्मृगा मृगसञ्ज्ञका गजा भवन्ति । व्यतिमिश्रचिन्हा विशेषेणातिमिश्रलक्षणविशिष्टाः पूर्वकथितगजत्रयचिन्हिताः सङ्कीर्णनागाः सङ्कीर्णसञ्ज्ञका हस्तिनो भवन्तीति ॥ १२ ॥

अथ मृगादिगजानामुच्चादिकमाह ।

पञ्चोन्नतिः सप्तमृगस्य दैर्घ्य-
मष्टौ च हस्ताः परिणाहमानम् ।
एकद्विवृद्धावथ मन्दभद्रौ
सङ्कीर्णनागोऽनियतप्रमाणः ॥ १३ ॥

पञ्चोन्नतिरिति ॥ मृगस्य मृगसञ्ज्ञकगजस्य पञ्चोन्नतिः पञ्चहस्तोच्छ्रितिः सप्तदैर्घ्यं सप्तहस्तदैर्घ्यम् अर्थात्पुच्छमूलान्मस्तकावधिः । अष्टौ हस्ताः परिणाहमानमर्थान्मध्यभागस्य परिधिमानं भवति । अथ एकद्विवृद्धौ एकद्विहस्तवृद्धौ मन्दभद्रौ मन्दभद्रसञ्ज्ञकगजौ । एकवृद्धो मन्दगजो द्विवृद्धो भद्रगजो भवति । अर्थान्मन्दगजस्य षडुच्छ्रितिः । अष्टदैर्घ्यम् । नवहस्तपरिधिमानम् । भद्रस्य सप्तोच्छ्रितिः । नवदैर्घ्यम् । दशमध्यभागस्थूलता भवति । अनियतप्रमाणः पूर्वकथितप्रमाणभिन्नः सङ्कीर्णनागो भवतीति ॥ १३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ भद्रादिगजानां मदवर्णमाह ।

भद्रस्य वर्णो हरितो मदस्य
मन्दस्य हारिद्रकसन्निकाशः ।
कृष्णो मदश्चाभिहितो मृगस्य
सङ्कीर्णनागस्य मदो विमिश्रः ॥ १४ ॥

भद्रस्य वर्ण इति ॥ भद्रस्य भद्राख्यगजस्य मदस्य दानस्य वर्णो हरितो हरिद्भवति । मन्दस्य मन्दाख्यगजस्य मदश्च हारिद्रकसन्निकाशो हरिद्रारससदृशो भवति । मृगस्य मृगाख्यगजस्य मदश्च कृष्णः श्यामवर्णोऽभिहितः कथितः । संकीर्णनागस्य मदो विमिश्रो भवतीति ॥ १४ ॥

अथ कारू राजगृहदक्षिणभागे भूगुणमवलोक्य गजशालां विदध्यादित्याह ।

स्थपतिरतः प्रयतो गजशालां
नरपतिमन्दिरदक्षिणभागे ।
अवनिगुणानवलोक्य विदध्यात्
कृतबलिहोमसुरार्चनशान्तिः ॥ १५ ॥

स्थपतिरत इति ॥ अतोऽनन्तरं प्रयतः सावधानः सन् स्थपतिः कारुः (स्थपतिः कारुभेदेऽपीत्यमरः) नरपतिमन्दिर दक्षिणभागे राजगृहयाम्यदिशि अवनिगुणान् भूमिगुणानवलोक्य दृष्ट्वा कृतबलिहोमसुरार्चनशान्तिः सन् गजशालां हस्तिगृहं विदध्यादिति ॥ १५ ॥

अथ निषिद्धभुवमाह ।

यातुधानदितिसर्पसंकुला-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ ज्येष्ठादिगजशालानां स्थूलनिषङ्गमानान्याह ।

ज्येष्ठोऽङ्गुलानि बहुलो दश षड्युतानि
मध्यस्तु पञ्चदश कन्यसकोऽङ्गुलोनः ।
स्तम्भप्रमाणविपुलाः क्रमशो निषङ्गाः
प्रोक्ताङ्गुलार्द्धसदृशं बहुलत्वमेषाम् ॥ २१ ॥

ज्येष्ठोङ्गुलानीति ॥ षड्युतानि दश षोडशाङ्गुलानि ज्येष्ठो ज्येष्ठाख्योगजगेहो बहुलः स्थूलो भवति। मध्यस्तु समगेहस्तु पञ्चदशाङ्गुलानि बहुलो भवति कन्यसकोऽधमो गेहो ऽङ्गुलोनश्चतुर्दशाङ्गुलो बहुलो भवति । स्तम्भप्रमाणविपुलास्तम्भमानसमस्थूलाः क्रमशो ज्येष्ठादिगृहे निषङ्गाः कार्याः । निषङ्गपदेन स्तम्भोपरि तिर्यक्काष्ठमुच्यते । एषां निषङ्गानां प्रोक्ताङ्गुलार्धसदृशं कथिताङ्गुलानां षोडशपञ्चदशचतुर्दशानामर्धसमं बहुलत्वं स्थूलत्वं ज्ञेयमिति ॥ २१ ॥

अथ ज्येष्ठादिगजगृहे कण्टकाद्याह ।

सर्वासु शालासु च कण्ठकस्य
हस्तोऽर्धयुक्तः परिणाह उक्तः ।
कण्टप्रमाणेन समुन्नतश्च
तलप्रबन्धो दृढदारुबन्धः ॥ २२ ॥

सर्वास्विति ॥ सर्वासु शालासु ज्येष्ठादिगजगृहेषु कण्टकस्य (लोके खूटा इति ख्यातस्य) हस्तद्वियुक्तः परिणाहः परिधिरुक्तः कण्टप्रमाणेन समुन्नतश्चोच्छ्रितश्च कार्य्यस्तलप्रबन्धो हस्तिबन्धनार्थश्च दृढदारुबन्धो निष्ठुरकाष्ठबन्धो विधेय इति ॥२२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गजगृहे चित्रप्रदेशानाह ।

अलिन्दभित्तौ तु गवाक्षकेषु
कुर्य्याद्गुणद्वारकजालकांश्च ।
निर्व्यूहयुक्तासु च वेदिकासु
कार्या विभूषा परितो मयोक्ता ॥२३॥

अलिन्दभित्ताविति ॥ अलिन्दाभित्तौ तु वहिर्द्वारप्रकोष्ठके तु (प्रघाणप्रघणालिन्दा वहिर्द्वारप्रकोष्ठक इत्यमरः) गवाक्षकेषु वातायनेषु (वातायनं गवाक्ष इत्यमरः) गुणद्वारकजालकांश्च सूत्रप्रवेशकजालनिभाश्च कुर्यात् । निर्व्यूहयुक्तासु च चित्रान्वितासु च वेदिकासु परिष्कृतभूमिषु परितः समन्ततो मयोक्ता मद्वक्ष्यमाणा विभूषाऽलङ्कृतिः कार्या ॥२३॥

अथातो द्वाभ्यां चित्रपदान्याह ।

कमलोत्पलहंसयुगप्रमथैः
प्रमदायुगपत्रविहङ्गघटैः ।
विविधैस्तरुभिः सशुकभ्रमरैः
फलपल्लवपुष्पभरावनतैः ॥२४॥

कमलोत्पलहंसयुगप्रमथैरिति ॥ कमलोत्पलहंसयुगप्रमथैः सहस्रपत्रकुमदकादम्बयुगलपारिषदैः । प्रमदायुगपत्रविहङ्गघटैः कान्तालतापक्षिसमूहैः । विविधैर्नानाप्रकारकैः सशुकभ्रमरैः सहित शुकद्विरेफैस्तरुभिर्वृक्षैः किम्विशिष्टैः फलपल्लवपुष्पभरावनतैः फलपल्लवपुष्पभारेणानम्रैरिति ॥ २४ ॥

व्यालककुञ्जरमत्स्यमृगेन्द्रैः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सन्निकृष्टविबुधद्विजालया ।
शर्करास्थिचयभस्मदूषिता
पार्थिवद्विरददोषदा मही ॥ १६ ॥

यातुधानादितिसर्पसङ्कुलेति ॥ या मही पृथ्वी यातुधानादितिसर्प-सङ्कुला पुण्यजनदैत्याद्याक्रान्ता । सन्निकृष्टविबुधद्विजालया निकृष्टामराविप्रगृहा । शर्करास्थिचयभस्मदूषिता । अत्र शर्करा शर्कारिलः (स्त्री शर्करा शर्करिल इत्यमरः) अस्थिचयः कीकससमूहः । (कीकसं कुल्यमस्थि चेत्यमरः) भस्म प्रसिद्धम् । एतैर्दूषिता पार्थिवद्विरददोषदा राजगजविनाशका भवतीति ॥१६॥

अथ युग्मेन प्रशस्तभूमिमाह ।

किञ्चिदभ्युन्नता भूः प्रशस्तद्रुमा
गोभिरध्यासिता साधु मध्ये समा ।
भूरितोयाऽघना हृद्दृगाह्लादिनी
शल्यदोषैर्विना सानुनादस्वना ॥ १७ ॥

किञ्चिदभ्युन्नतेति ॥ किञ्चिदल्पमभ्युन्नता भूः प्रसस्तद्रुमा शुभवृक्षान्विता गोभिरध्यासिताऽध्युषिता । मध्ये मध्यदेशे साधु समीचीनम् । समा नतोन्नतरहिता । भूरितोया बहुजलाऽघना न घना न च कठिना । हृद्दृगाह्लादिनी मनोनयनाह्लादजनिका । शल्यदोषैरस्थिदोषैर्विना रहिता सानुनादस्वनाऽनुनादस्वरसहिता सा भूमिर्नागवाजिनां हिता कल्याणकारिणी भवतीत्यग्रे सम्बन्धः ॥ १७ ॥

स्निग्धपल्लवद्रुमा प्रदक्षिणाम्बुवाहिनी ।
स्वरास्ट्रवृद्धिदामही हिताथ नागवाजिनाम् ॥१८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्निग्धपल्लवद्रुमेति ॥ या भूः स्निग्धपल्लवद्रुमा श्लक्ष्णकिसलयवृक्षा । प्रदक्षिणाम्बुवाहिनी दक्षिणप्लवा । सा मही भूमिः स्वराष्ट्रवृद्धिदाऽऽत्मदेशवर्द्धनकारिणी । अथ नागवाजिनां गजाश्वानां हिता हितकारिणी भवतीति ॥१८॥

अथ गजभेदेन भूमीराह ।

भद्रमन्दमृगमिश्रदन्तिनां
श्वेतरक्तकनकोपमासिताः ।
भूमयो द्विरदपुष्टिवृद्धिदा
भूभृतामपियशः सुखावहाः ॥१९॥

भद्रमन्दमृगमिश्रदन्तिनामिति ॥ भद्रमन्दमृगमिश्रदन्तिनां पूर्वोक्तानां श्वेतरक्तकनकोपमासिताः शुक्ललोहितपीतनीला इति भूमयो द्विरदपुष्टिवृद्धिदा भवन्ति । भूभृतां राज्ञामपि यशःसुखावहाः कीर्त्तिसुखजनिका भवन्तीति ॥ १९ ॥

अथोत्तममध्याधमगजशालामाह ।

ज्येष्ठा चतुर्विंशतिरेव हस्ता
द्विद्व्यूनिते मध्यजघन्यशाले ।
विस्तारतस्तद्द्विगुणाश्च दीर्घा-
स्तम्भाश्च विस्तारसमुच्छ्रिताः स्युः ॥२०॥

ज्येष्ठेति ॥ चतुर्विंशतिरेव दीर्घा हस्ता ज्येष्ठा श्रेष्ठा गजशाला भवति द्विद्व्यूनिते द्वाविंशतिः विंशतिश्च मध्यजघन्यशाले समाधमगृहे भवतः । विस्तारो विस्तृतिप्रमाणतस्तद्द्विगुणा दीर्घा काया । अर्थाद्दीर्घार्द्धं विस्तारमानमिति विस्तारसमुच्छ्रिता विस्तारमानतुल्योच्छ्रायाः स्तम्भा गजगृहस्तम्भाः स्युरिति ॥ २० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मेते द्रुमाः पुष्टिकरा द्विपानाम् ।
स्तम्भार्थमन्येऽपि हि सारवन्तः
कार्याः प्रशस्ता गुणसम्प्रयुक्ताः ॥ २९ ॥

शीताः शिवाश्चेति ॥ शीताः शीतलाख्याः शिवाश्च कल्याणकारिणो द्रुमा एते द्विपबन्धनार्थं गजबन्धनाय प्रशस्ता भवन्ति पुनःद्विपानां हस्तिनां पुष्टिकरा भवन्ति । अन्येऽपि एतदतिरिक्ताः सारवन्तोऽन्तः साराः गुणसम्प्रयुक्ताः सुगुणान्विताः स्तम्भार्थं कार्याः ॥२९॥

अथ पूर्वाभिमुखगजबन्धनफलमाह ।

पूर्वाभिमुखो निबध्यते
यः क्षिप्रं स करोति विक्रमम् ।
राज्ञस्समरेष्वनिर्जितो
दीर्घं चायुरवाप्नुयाद्गजः ॥ ३० ॥

पूर्वाभिमुख इति ॥ यो गजो हस्ती पूर्वाभिमुखो निबध्यते स राज्ञो नरेन्द्रस्य क्षिप्रं शीघ्रं विक्रमं करोति । अपिच समरेषु सङ्ग्रामेष्वनिर्जितोऽजितःसन् दीर्घं चायुरवाप्नुयात्प्राप्नुयादिति ३०

अथ दक्षिणाभिमुखगजबन्धनफलमाह ।

दक्षिणदिग्वदनस्य च बन्धो
जीवितनाशकरो द्विरदस्य ।
धान्यधनक्षयमाशु च कुर्या-
न्मन्त्रिजनस्य नराधिपतेश्च ॥ ३१ ॥

दक्षिणदिग्वदनस्येति ॥ दक्षिणदिग्वदनस्य च दक्षिणा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

।भमुखस्य च बन्धा बन्धनं द्विरदस्य हस्तिनो जीवितनाशकरो भवति । आपिच मन्त्रिजनस्य सचिवस्य नराधिपते राज्ञो धान्य धनक्षयं शाल्यादिवसुनाशमाशु शीघ्रं कुर्यादिति ॥ ३१॥

अथ पश्चिमाभिमुखबन्धनफलम् ।

पश्चान्मुखं बन्धमवाप्य नागो
नित्यं भवेद्रोगनिपीडिताङ्गः ।
नाशं च वित्तस्य करोति राज्ञ-
स्तस्मात्स याम्यापरदिग्विवर्ज्यः ॥ ३२ ॥

पश्चान्मुखमिति ॥ पश्चान्मुखं पश्चिमाभिमुखं बन्धनमवाप्य प्राप्य नागो गजो नित्यं सदा रोगनिपीडितांगो भवेदिति रोग-ग्रस्तदेहः स्यात् । आपिच स नागो राज्ञो वित्तस्य धनस्य नाशं करोति तस्मात्कारणाद्याम्यापरदिग्विवर्ज्यस्त्याज्यो बन्धन इति ३२

अथोदङ्मुखफलम् ।

उदङ्मुखं बन्धमुपैति नागो
योऽर्थस्य वृद्धिं स करोति भर्त्तुः ।
प्राप्नोति पुष्टिं चिरजीवितां च
सङ्ग्रामकालेष्वपराजयं च ॥ ३३ ॥

उदङ्मुखमिति ॥ यो नागो गज उदङ्मुखमुत्तराभिमुखं बन्धं बन्धनमुपैति प्राप्नोति । स भर्त्तुरधिपतेरर्थस्य धनस्य वृद्धिमुपचयं करोति । पुष्टिमात्मदेहपुष्टिं चिरजीवितां च दीर्घजीवित्वं च प्राप्नोति । सङ्ग्रामकालेषु रणाङ्गणेष्वपराजयं न पराजय-मिति प्राप्नोति ॥ ३३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कन्दमृणाललताङ्कुरशोभैः ।
वारिचरैश्च चिताम्कराद्यैः
शिक्षितशिल्पिविनिर्मितरूपा ॥ २५ ॥

व्यालककुञ्जरमत्स्यमृगेन्द्रैरिति ॥ व्यालककुञ्जरमत्स्यमृगेन्द्रैराहिगजमीनसिंहैः । कन्दमृणाललताङ्कुरशोभैः शालूकाविसवल्लिनूतनप्ररोहशोभनैः । मकराद्यैर्ग्राहाद्यैर्वारिचरैर्जलजीवैश्च चिता वेष्टिता शिक्षितशिल्पिविनिर्मितरूपा विभूषा विधेयेति २५

अथ गजगृहे द्वारोच्छ्रायविस्तारमानं श्रेष्ठमुखं चाह ।

द्वारोच्छ्रायाः कुञ्जराणामतुल्या
विस्तारोऽस्य त्र्यंशहीनः स एव ।
हीनो भूयश्चात्मषष्ठांशकेन
शालाद्वारं प्रागुदक्च प्रशस्तम् ॥२६॥

द्वारोच्छ्राया इति ॥ कुञ्जराणां गजानां द्वारोच्छ्राया अतुल्या विधेया अस्य द्वारस्य विस्तारः त्र्यंशहीनः । स एवोच्छ्रायो विधेयः भूयश्च पुनश्चात्मषष्ठांशकेनोच्छ्रायषष्ठभागेन हीनो रहित उच्छ्रायो विस्तारो विधेयः । सच मध्यमः पुनश्चद्वादशांशेन हीनः कनिष्ठो ज्ञेयः शालाद्वारं गजगृहद्वारं प्रागुदक्च प्रशस्तं पूर्वोत्तरमुखं श्रेष्ठं भवति ॥ २६ ॥

अथ प्रवेशनिर्गमनद्वारलक्षणमाह ।

विचित्रनिर्व्यूहमृगेन्द्रपञ्जरं
कपाटभेदार्गलसुप्रयोजितम् ।
सुवेदिकालङ्कृतमीक्षणप्रियं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रवेशनं निर्गमनाय चापरम् ॥ २७ ॥

विचित्रनिर्व्यूहमृगेन्द्रपञ्जरमिति ॥ विचित्रनिर्व्यूहमृगेन्द्रपञ्जरमाश्चर्यजनकनागदन्दसिंहपञ्जरमथवाकुञ्जरमिति पाठे रमणीयद्वारदेशसिंहहस्तिकम् पुनर्विशिनष्टि कपाटमेढार्गल सुप्रयोजितम् कपाटः प्रसिद्धो मेढा हस्त्यवरोधनार्थलघु स्तम्भोऽर्गलं कपाटस्यावष्टम्भक मुशलमेतैः सुप्रयोजितम् । सुष्ठु योजितम् प्रवेशनं प्रवेशनद्वारं पुनः सुवेदिकालङ्कृतं शोभनपरिष्कृतभूमिभूषितमीक्षणप्रियं दर्शनसुन्दरं प्रवेशनं द्वारमपरं चान्यन्निर्गमनाय निष्कासनाय प्रशस्तं भवतीति ॥ २७ ॥

अथ द्वाभ्यां गजबन्धनकाष्ठान्याह ।

चन्दनार्ज्जुनशिरीषमधूका
देवदारुसरलाञ्जनशालाः ।
रोहिणीखदिरचम्पकशाकाः
स्यन्दनश्च सकदम्बविशोकाः ॥ २८ ॥

चन्दनार्ज्जुनशिरीषमधूका इति ॥ चन्दनार्जुनशिरीषमधूकाश्चन्दनश्चन्दनवृक्षोऽर्जुन इन्द्रन्द्रुशिरीषो भण्डिलः (लोके शिरस) मधूको (लो० महु) देवदारु सरलाञ्जनशालाः । देवदारुः प्रसिद्धः सरलात्रिवृता (लो० तण्डू) इति अञ्जनस्तदाख्य वृक्षः । शालो वृक्षविशेषः । रोहिणीखदिरचम्पकशाकाः रोहिणी (लो० करुभैनी) खदिरः (लो० खैर) चम्पकस्तदाख्य वृक्षः शाकः शाकवृक्षः स्यन्दनश्च (लो० सौंदन) सकदम्बविशोकाः कदम्बः प्रसिद्धो विशोक अशोक इति ॥ २८ ॥

शीताः शिवाश्च द्विपबन्धनार्थ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथातो गजबन्धनस्तम्भे निषिद्धकाष्ठान्याह त्रिभिः ।

सुषिरोर्ध्वशुष्ककोटरकोलाक्षग्रन्थिबहुलशूलाग्राः ।
मधुनिलयमूलहीनाग्रकुब्जवल्लीव्रणानुगताः ३४॥

सुषिरोर्ध्वशुष्ककोटरकोलाक्षग्रन्थिबहुलशूलाग्रा इति ॥ सुषिरोर्ध्वशुष्ककोटरकोलाक्षग्रन्थिबहुलशूलाग्राः । मधुनिलयमूलहीनाग्रकुब्जवल्लीव्रणानुगता एतेऽशुभप्रदा भवन्ति बन्धने ॥३४॥

वामावर्त्तः शृङ्गी कुणिलोऽवनतोऽनुजातविद्धश्च ।
पितृवनजः स्थूलाग्रस्त्रिकुब्जको द्रोणिकाबहुलः ३५

वामावर्त्त इति ॥ वामावर्तो वामावर्त्तयुक्तः । शृङ्गी शृङ्गवान् कुणिलो नन्दिवृक्षजो दारु इति (कुणिः कच्छः कान्तलको नन्दिवृक्ष इत्यमरः) अवनतो नम्रीभूतोऽनुजातविद्धश्च । पितृवनजो श्मशानभूमिजो वृक्षः स्थूलाग्रो विपुलाग्रभागस्त्रिकुब्जकास्त्रिवक्रो द्रोणिकाबहुलो बहुच्छिद्र इति अशुभप्रदा भवन्तीति ॥ ३५ ॥

स्थूलग्रन्थिर्वज्रेण चूर्णितश्चाशुभप्रदाः ।
सर्व्वे बन्धार्थे नागानामतः फलानि प्रवक्ष्यामि ३६

स्थूलग्रन्थिरिति ॥ स्थूलग्रन्थिर्विपुलग्रन्थिः । वज्रेण कुलिशेन चूर्णितश्चेति । पूर्वोक्ताः सर्वे तरवो नागानां गजानां बन्धार्थे बन्धानाय । अशुभप्रदा अशुभफलदायिनो भवन्तीति । अतोऽनन्तरं । पृथक् फलानि प्रवक्ष्यामि ॥३६॥

अथातः पूर्व्वकथितानां काष्ठानां पृथक् फलान्याहाष्टाभिः ।

मासान्षड्र्ध्वसुखिरे स्तम्भे च बन्धमासाद्य ।
मरणमुपयाति नागो निपीडितो वातरोगेण ॥३७॥

मासान्षडूर्ध्वसुखिर इति ॥ ऊर्ध्वसुखिरे चोर्ध्वच्छिद्रे स्तम्भे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

षड्मासात् षड्मासावधीन् बन्धमासाद्य वातरोगेण निपीडितो नागो मरणं प्राणवियोगमुपयाति प्राप्नोतीति ॥३७॥

मृयते कोटरविद्धे कोलाक्षेऽन्धत्वमाप्नुयान्नागः ।
क्षुत्पीडां ग्रन्थिचिते मृत्युं शूलेन शूलाग्रे ॥३८॥

मृयत इति ॥ कोटरविद्धे कोटराख्यरन्ध्रविशिष्टे स्तम्भे बन्धमासाद्य नागो मृयते । कोलाक्षे बहुच्छिद्रेऽन्धत्वं नाग आप्नुयात् । ग्रन्थिचिते ग्रन्थियुते स्तम्भे क्षुत्पीडामासाद्य मृयते । शूलाग्रे स्तम्भे शूलेन मृयते ॥ ३८ ॥

मूलाग्रकुब्जहीनेषु मरणमब्दात्सहैव हस्तिन्या ।
शृङ्गिनि मृत्युर्मधुदूषिते च मरणं कृमिगदेन ॥३९॥

मूलाग्रकुब्जहीनेष्विति ॥ मूलाग्रकुब्जहीनेषु स्तम्भेषु हस्तिन्या सहैवाब्दात् वर्षान्मरणमेति । शृङ्गिनि शृङ्गविशिष्टे स्तम्भे मृत्युः स्यात् गजस्येति । मधुदूषिते क्षौद्रदुष्टे स्तम्भे कृमिगदेन पिपीलिकारोगेण मृत्युर्भवतीति ॥ ३९ ॥

गात्रस्य भवति भङ्गो वल्लीदुष्टे व्रणावकीर्णे च ।
वामावर्ते नृपतेर्विनश्यते वाहनं सर्वम् ॥४०॥

गात्रस्येति ॥ वल्लिदुष्टे लतादुष्टे स्तम्भे गात्रस्य शरीरस्य भङ्गो नाशो भवति । व्रणावकीर्णे च घुणादिव्याप्तौ चशब्देन गात्रस्य भङ्गो भवति । वामावर्ते स्तम्भे नृपतेर्नृपस्य सर्वं वाहनं गजाश्वादिकं विनश्यते विशेषेण नश्यते ॥ ४० ॥

मृद्गर्भे कुणिलाख्ये नृपतेः समहाजनस्य मरणाय ।
नागस्य तु त्रिकुब्जे भवति वधो युध्यतस्तम्भे ४१॥

मृद्गर्भ इति ॥ कुणिलाख्ये नन्दिवृक्षजे मृद्गर्भे मृन्मध्ये

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्तम्भे समहाजनस्य सहितशिष्टजनस्य नृपतेर्नृपस्य मरणाय भवति। त्रिकुब्जे त्रिवक्रे स्तम्भे नागस्य युध्यतो वधो नाशो भवति ॥४१॥

अनुजातविद्धबद्धः सुकुमारो वारणो मरणमेति ।
वर्षद्वयेन मृत्युः पितृवनजाते निबद्धस्य ॥४२॥

अनुजातविद्धबद्ध इति ॥ अनुजातविद्धबद्धो वृक्षयमलजात-भिन्नबद्धो गजः सुकुमारोऽर्भको वारणो मरणमेति । पितृवनजाते श्मशानभूम्युत्पन्ने स्तम्भे निबद्धस्य गजस्य वर्षद्वयेन मृत्युर्भवतीति ॥ ४२ ॥

स्थूलाग्रानतयोर्मरणमेति मासेऽष्टमे महामात्रः ।
द्विरदस्य क्षुत्पीडा बद्धस्य द्रोणिकाबहुले ॥४३॥

स्थुलाग्रानतयोरिति॥ स्थूलाग्रानतयोर्विपुलाग्रनम्रयोर्बद्धस्य गजस्य मासेऽष्टमे (बन्धनादितिशेषः) महामात्रो मरणमेति (महाथु वा महावत इति लोके) द्रोणिकाबहुले बहुच्छिद्रान्विते स्तम्भे बद्धस्य द्विरदस्य गजस्य क्षुत्पीडा स्यादिति ॥४३॥

स्थूलग्रन्थिर्विस्फोटमृत्युकृद्दन्तिनो द्वितीयेऽब्दे ।
अशनिहते विज्ञेयः षण्मासाद्दन्तिनां मृत्युः ॥४४॥

स्थूलग्रन्थिरिति ॥ स्थूलग्रन्थिः स्तम्भो द्वितीयेऽब्दे दन्तिनो गजस्य विस्फोटमृत्युकृद्भवतीति विस्फोटकेन मरणं करोति । अशनिहते वज्रचूर्णिते स्तम्भे षण्मासाद्दन्तिनो हस्तिनो मृत्युर्मरणं विज्ञेय इति ॥ ४४ ॥

अथ स्तम्भे प्रशस्तगुणकथनपूर्वकतत्फलमाह ।

प्रदक्षिणावर्त्तमनोज्ञवृत्तसुस्निग्धऋजवव्रणसारवन्तः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दोषैर्विहीना विजयाय शुद्धाः स्तम्भा द्विपानां बलपुष्टिदाः स्युः ॥ ४५ ॥

प्रदक्षिणावर्त्तमनोज्ञवृत्तसुस्निग्धऋज्वव्रणसारवन्त इति ॥ प्रदक्षिणावर्त्तमनोज्ञवृत्तसुस्निग्धऋज्वव्रणसारवन्तःसुसव्यावर्त्तरुचिरवर्त्तुलसुश्लक्ष्णसरलरहितघुणाद्यन्तः सारवन्तः स्तम्भाः दोषैः पूर्वोक्तैर्विहीनाः शुद्धा विहितवृक्षभवा राज्ञां विजयाय भवन्ति । अपिच द्विपानां हस्तिनाम् बलपुष्टिदाः स्युर्भवन्तीति ॥ ४५ ॥

अथ गजबन्धनस्तम्भरोपणमीशानदिशि क्व कार्य्य तत्फलं च वक्ति ।

यः सम्पातः कर्णसूत्रद्वयस्य तस्माद्धस्तं सार्द्धमुत्सृज्य कार्यः । दिश्यैशान्यां बन्धनार्थं द्विपानां स्तम्भो राज्ञः श्रेयसे दन्तिनश्च ॥ ४६ ॥

यः सम्पात इति ॥ कर्णसूत्रद्वयस्य चतुःकोणगजशालाद्वयनिःसृतकर्णसूत्रद्वयस्य यत्र सम्पातो योगो भवति तस्माद्विन्दोः सार्द्धं हस्तमुत्सृज्य त्यक्त्वा । ऐशान्यां दिशि ईशानकोणे द्विपानां बन्धनार्थं स्तम्भो विधेयोऽसौ राज्ञः श्रेयसे कल्याणाय भवति दन्तिनश्च हस्तिनश्च श्रेयसे भवतीति ॥ ४६ ॥

अथाग्नेयादिविदिग्बन्धनफलं वक्ति ।

आग्नेयां द्विपमरणं नृपार्थहानिर्नैर्ऋत्यां समरपराभवार्थनाशौ । मारुत्यां भवति मतङ्गजस्य रोगः स्तम्भोऽतः शिवदिशि रोपितः शिवाय ॥ ४७ ॥

आग्नेयामिति ॥ आग्नेयामग्निकोणे स्तम्भश्चेद्द्विपमरणं भवति नृपार्थहानी राजधनह्रासो भवति । नैर्ऋत्यां कोणे समर-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पराभवार्थनाशौ भवतः । मारुत्यां वायुकोणे मतंगजस्य गजस्य रोगो भवति । अतः शिवदिश्यैशानभागे रोपितः स्थापितः स्तम्भः शिवाय कल्याणाय भवतीति ॥ ४७ ॥

अथ स्तम्भोत्तममध्यमादि वक्ति ।

ज्येष्ठो दशोच्चो नवमध्यमश्च स्तम्भोऽष्टहस्तः कथितः कनीयान् । सर्वे निखाताश्चतुरश्च हस्तान्मानाधिकोनाश्च शिवाय न स्युः ॥ ४८ ॥

ज्येष्ठो दशोच्च इति ॥ दशोच्चो दशहस्तोच्छ्रितः स्तम्भो ज्येष्ठः श्रेष्ठो भवति । नव मध्यमश्च भवति । अष्टहस्तः स्तम्भः कनीयान् कनिष्ठः कथितः । सर्वे निखाताश्चतुरश्च हस्तान् ज्ञेयाः मानाधिकोनाश्च कथितमानेभ्योऽधिका ऊना न्यूनाश्च शिवाय मंगलाय न स्युर्न भवन्तीति ॥ ४८ ॥

स्याद्विंशतिर्द्वित्रिचतुर्विहीना मूलेंऽगुलानां पृथुता क्रमेण । द्व्यूनानि तान्येव हि मस्तके स्युः पर्यन्तवेष्टा त्रिगुणानि तानि ॥ ४९ ॥

स्याद्विंशतिरिति ॥ द्वित्रिचतुर्विहीना विंशतिः (१८ । १७ । १६) मूले तलभागेंऽगुलानां क्रमेण ज्येष्ठमध्यमकनिष्ठवशेन पृथुता स्थूलता स्यादिति । द्व्यूनानि तान्येव (१६ । १५ । १४) मस्तके स्थूलानि बिपुलानि स्युः । तानि त्रिगुणानि (५४।५१। ४८) पर्यन्तवेष्टा भवन्तीति ॥ ४९ ॥

इतिशालाविवृतिः ॥

अथ श्रेष्ठगजलक्षणमाह त्रिभिः श्लोकैः ।

ताम्रौष्ठतालुवदनाः कलविङ्कनेत्राः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशा-
स्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥ ५० ॥

ताम्रौष्ठतालुवदना इति ॥ ये गजास्ताम्रौष्ठतालुवदनास्ता-म्रवर्णवदौष्ठतालुमुखाः कलविङ्कनेत्राः चटकसदृशदृशः । (चटकः कलविङ्कः स्यादित्यमरः) स्निग्धोन्नताग्रदशनाः श्लक्ष्णोच्छ्रितो-र्ध्वरदाः पृथुलायतास्याः स्थूलदीर्घमुखाः । चापोन्नतायतनिगूढ-निमग्नवंशा धनुर्वदुन्नताविस्तृतानिमग्ननिगूढपृष्ठाः । तन्वेकरोम-चितकूर्मसमानकुम्भाः कृशैकवर्णलोमचितकमठसदृशमस्तका इति धन्या गजा भवन्तीति ॥ ५० ॥

विस्तीर्णकर्णहनुनाभिललाटगुह्याः
कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुबालाः
धन्याः सुगन्धिमदपुष्करमारुताश्च ॥ ५१ ॥

विस्तीर्णकर्णहनुनाभिललाटगुह्या इति ॥ विस्तीर्णकर्णहनु-नाभिललाटगुह्याः ये गजाः । कूर्म्मोन्नतैः कच्छपवदुन्नतैः । द्विन-वविंशतिभिर्नखैश्चाष्टदशकृतिभिर्नखरैश्च । रेखात्रयोपचितवृत्तकरा रेखात्रितययुतवर्तुलशुण्डाः सुवालाः सुपुच्छाः । सुगन्धिमदपु-ष्करमारुताश्च शोभनगन्धशालिमदशुण्डवायवश्चेति गजा धन्या भवन्तीति ॥ ५१ ॥

दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनाद-बृंहिणः । बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्म-तङ्गजाः ॥ ५२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दीर्घांगुलिरक्तपुष्करा इति ॥ ये मतंगजा गजाः । दीर्घांगुलिरक्तपुष्कराः । दीर्घांगुलिशालिलोहितशुण्डाग्रभागाः (पुष्करं करिहस्ताग्र इत्यमरः) हस्तीनां शुण्डः करस्तदग्रेऽङ्गुलिर्भवतीति सजलाम्भोदनिनादबृंहिणः सजलजलधरवत्कातिकाराः । बृहतायतवृत्तकन्धरा विस्तृतदीर्घवर्तुलग्रीवाः । ते भूमिपतेर्धरास्वामिनो धन्याः शुभदायका भवन्तीति ॥ ५२ ॥

अथ त्याज्यगजानाह युग्मेन ।

निर्मदाभ्यधिकहीननखाङ्गान्कुब्जवामनकमेषविषाणान् । दृश्यकोशफलपुष्करदीनान्श्यावनीलशवलासिततालून् ॥ ५३ ॥

निर्मदाभ्यधिकहीननखाङ्गानिति ॥ निर्मदाभ्यधिकहीननखाङ्गान् मदरहितकथिताधिकहीननखरशरीरान् । कुब्जवामनकमेषविषाणान् वक्रह्रस्वाविशृंगसमदन्तान् । दृश्यकोशफलपुष्करदीनान् दृश्यमानाण्डकोशशुण्डह्रस्वान् । श्यावनीलशवलासिततालून् कपिशधूम्रचित्रकृष्णकाकुदान् । तालुतुकाकुदमित्यमरः ॥ ५३ ॥

स्वल्पवक्त्ररुहमत्कुणषण्ढान् हस्तिनीं च गजलक्षणयुक्ताम् । गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते ॥ ५४ ॥

स्वल्पवक्त्ररुहमत्कुणषण्ढानिति ॥ स्वल्पवक्त्ररुहमत्कुणषण्ढान् लघुदन्तदन्तरहितचलनसमयपरस्परचरणलग्नान् गजलक्षणयुक्तां हस्तिनीं च गर्भिणीं च गर्भयुक्तां च नृपती राजा परदेशमन्यदेशं प्रापयेत्प्रेषयेदिति । एतेऽतिविरूपफला अत्यशुभफलदा भवन्ति नृपतेरिति ॥ यस्य गजस्योरः जघने सङ्कुचितं तथा पृष्ठभाग

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उन्नतो भवति प्रमाणहीनो भवति यस्य नाभी उच्चा भवति स एव कुब्ज गजः कथ्यते यस्य गजस्य दीर्घविस्तृती प्रमाणसहिते परन्तूच्चताऽतिन्यूना भवति स एव वामनः कथ्यते। यस्यसर्वलक्षणं सम्यग्भवति परन्तु दन्तो न भवति स मत्कुणः कथ्यते। (लोके मकुना इति) यस्य चलनसमये परस्परासक्तचरणो भवति स षण्ढः कथ्यते ॥ ५४ ॥

अथ दन्तिदन्तच्छेदनविधिं तद्वशेन फलानि चाह ।

दन्तमूलपरिणाहदीर्घतां द्विः प्रमुच्य परतोऽस्य कल्पयेत् । श्यावपूतिमलरक्तदर्शनं पापसत्त्वसदृशं च पापदम् ॥ ५५ ॥

दन्तमूलपरिणाहदीर्घतामिति ॥ दन्तमूलपरिणाहदीर्घतां रदादिप्रदेशाद्विशालायामतां द्विः प्रमुच्य द्विभागं त्यक्त्वाऽस्य परतः कल्पयेत् छेदयेदिति । श्यावपूतिमलरक्तदर्शनम् । श्यावः कपिशः । धूसरारुणवर्णः । पूतिर्गन्धिः । मलं मलिनः । रक्तो लोहित इति दर्शनं चेत् पापदमशुभफलदं भवति । पापसत्त्वसदृशं दर्शनं चेत् पापजीवसदृशं सर्पवृश्चिकाद्याकृतिदर्शनं च पापदं भवतीति ॥ ५५ ॥

अथ छेदितदन्ते छत्रचामरादिचिह्नेन फलमाह ।

पार्थिवोपकरणाकृतिं यदा चिह्नमुद्वहति कल्पिते रदे । श्रीजयार्थबलवृद्धयस्तदा स्निग्धशुक्लरुचिराश्च शोभनाः ॥ ५६ ॥

पार्थिवोपकरणाकृतिमिति ॥ पार्थिवोपकरणाकृतिं पार्थिवस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

राज उपकरणाकृतिं छत्रचामरसिंहासनाद्याकृतिं चिह्नं यदा कल्पिते रदे छेदिते दन्ते उद्वहति प्राप्नोति । तदा श्रीजयार्थबलवृद्धयो भवन्ति । स्निग्धशुक्लरुचिराश्च श्लक्ष्णशुभ्ररम्याश्च शोभनाः शुभफलदा भवन्तीति ॥ ५६ ॥

अथ रदच्छेदे सव्यापसव्यचिह्नवशेन फलम् ।

दक्षिणे शुभमतीव शोभनं पापमप्यति विरूपमन्यतः । जाप्यता भवति तद्विपर्यये विस्तरोऽन्यमुनिभिः प्रकीर्त्तितः ॥ ५७ ॥

दक्षिणे शुभमतीव शोभनमिति ॥ दक्षिणे दक्षिणभागरदे शुभं शोभनं चिन्हं चेदतीव शोभनं भवति। अन्यतो वामभागतः पापमशुभं चिह्नं चेदतिविरूपमत्यशुभं फलं भवति। तद्विपर्यये तयोर्विपरीतेऽर्थाद्दक्षिणेऽशुभचिन्हं वामभागे शुभचिन्हं चेज्जाप्यता स्वल्पफला भवति । विस्तर इति। अन्यमुनिभिः पराशरगर्गादिभिर्विस्तरः प्रकीर्त्तितः कथित इति ॥ ५७ ॥

अथ गजदन्ते मूलमध्याग्रदेशे देवदैत्यमनुजस्थितिं तत्फलञ्चाह ।

मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्ततः । स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवम् ॥ ५८ ॥

मूलमध्यदशनाग्रसंस्थिता इति ॥ क्रमान्मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः सन्ति । ततस्तस्मात्कारणात्स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवं भवति । अर्थतो गजदन्तमूलाच्छीघ्रकालभवं स्फीतं शुभ्रं फलं भवति । गजदन्तमध्य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भागान्मध्यकालभवं मध्यफलं भवति । गजदन्ताग्रभागाच्चिरकालसम्भवं परिपेलवं न्यूनं फलं भवतीति ॥ ५८ ॥

अथ स्वभावतो दन्तभङ्गफलमाह ।

दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम् ।
वामतः सुतपुरोहिते भयं हन्ति भृत्यजनदारनायकान् ॥ ५९ ॥

दन्तभङ्गफलमत्रेति ॥ अत्र संहितायां दक्षिणे गजदक्षिणभागे दन्तभङ्गफलं क्रमेण मूलमध्यान्ते भूपदेशबलविद्रवप्रदं राजराष्ट्रसैन्यानां विद्रवप्रदं पलायनप्रदं भवतीति । (मद्रावोद्रावसन्द्रावा विद्रवोद्रव इत्यमरः) वामतो वामभागे क्रमेण मूलमध्याग्रवशेन सुतपुरोहिते भयङ्करोति । भृत्यजनदारनायकान् हन्ति सेवकस्त्रीप्रधानजनान् नाशयतीति ॥ ५९ ॥

अथ स्वभावत उभयदन्तभङ्गफलमाह ।

आदिशेदुभयभङ्गदर्शनात्पार्थिवस्य सकलं कुलक्षयम् । सौम्यलग्नतिथिभादिभिः शुभं वर्द्धते शुभमतोऽन्यथापरम् ॥ ६० ॥

आदिशेदिति ॥ उभयभङ्गदर्शनाद्दन्तद्वयनाशावलोकनात् पार्थिवस्य राज्ञः सकलं समस्तं कुलक्षयं गोत्रनाशमादिशेत्संकथयेत् । तत्र सौम्यलग्नतिथिभादिभिः शुभं फलं वर्द्धतेऽतोऽन्यथाऽपरमशुभं फलं वर्द्धते ॥ ६० ॥

अथ दुग्धमिष्टफलवृक्षादिना दन्तभंगफलमाह ।

क्षीरमिष्टफलपुष्पपादपैश्चापगातटविघट्टनेन वा ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाममध्यरदभङ्गखण्डनं शत्रुनाशकृदतोऽन्यथा-
परम् ॥ ६१ ॥

क्षीरमिष्ठफलपुष्पपादपैरिति ॥ क्षीरमिष्टफलपुष्पपादपैश्च सदुग्धमाधुर्यफलपुष्पवृक्षैश्च वाममध्यरदभंगखण्डनं वामभागदन्तमध्यस्य विकृतिर्नाशो भवेत् । वाऽऽपगातटविघट्टनेन नदीकूलसंघर्षणेन वामध्यरदभंगखण्डनं शत्रुनाशकृद्भवति अतोऽन्यथाऽपरम शुभं भवतीति ॥ ६१ ॥

अथ भयकृद्गजचेष्टितमाह ।

स्खलितगतिरकस्मात्त्रस्तकर्णोऽतिदीनः
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् ।
द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽस्टक्शकृत्कृत् ॥ ६२ ॥

स्खलितगतिरिति ॥ अकस्माद्दैवयोगेन स्खलितगतिर्भवेत् अपिच त्रस्तकर्णो सभीतकर्णोऽतिदीनोऽतिदुःखी श्वसिति उच्छ्वासं करोति । अथच मृदु मन्दं सुदीर्घमतिदीर्घं पृथिव्यां न्यस्तहस्तो धृतशुण्डो भवेत् । द्रुतमुकुलितदृष्टिः शीघ्रं शीघ्रं यथा तथासम्मीलितनेत्रः स्वप्नशीलः शयनशाली विलोमो विपरीतगतिरहितभक्षी अभक्ष्यभक्षी । अपिच नैकशो न एकशो बहुवारमस्टक् शोणितं शकृत्कृत् पुरीषकृद्भयकृद्भवतीति ॥ ६२ ॥

अथ जयकृद्गजचेष्टितमाह ।

बल्मीकस्थाणुगुल्मेक्षुतरुविमथनः स्वेच्छया हृष्ट-
दृष्टिर्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नाम्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चोच्चैः । कक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं बृंहते वा तत्कालं वा मदाप्तिर्जयकृदथ रदं वेष्टयन् दक्षिणञ्च ॥ ६३ ॥

वल्मीकस्थाणुगुल्मेक्षुतरुविमथन इति ॥ वल्मीकस्थाणुगुल्मेक्षुतरुविमथनो यदि भवति । वल्मीको वामलूरः (वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकमित्यमरः) स्थाणुश्छिन्नवृक्षप्रकाण्डः (स्थाणुर्वाना ध्रुवः शङ्कुरित्यमरः) गुल्मः प्रकाण्डरहितवृक्षभागः (अप्रकाण्डे स्तम्बगुल्माविल्यमरः) इक्षुः प्रसिद्ध एव । एषां विमथनो विमर्दनशाली स्वेच्छया निजेच्छया यदि भवति । अपिच स्वेच्छया हृष्टदृष्टिर्हर्षितनेत्रो यात्रानुलोमं गम्यदिगाभिमुखं यायाद्गच्छेत् । उच्चैर्वक्रं मुखमुन्नाम्योन्नमय्य त्वरितपदगतिः शीघ्रचरणजवो भवति । अपिच कक्ष्यासन्नाहकाले मध्यबन्धनोपयोगिरज्ज्वा (दूष्या कक्ष्या वरत्रा स्यादित्यमरः) बन्धनसमये मुहुर्वारम्वारम् शीकरमम्बुकणं जनयति चोत्पादयति च । वा बृंहते गलगर्दं कुरुते वा तत्कालं यात्रासमयमधि मदाप्तिर्मदप्राप्तिर्भवति । अथरदं दन्तं दक्षिणं वेष्टयन् शुण्डेनेति तदा जयकृज्जयकारी भवतीति ॥ ६३ ॥

अथ जलप्रवेशे गजग्राहग्रहणवशेन शुभाशुभफलमाह ।

प्रवेशनं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य । ग्राहं गृहीत्वोत्तरणं द्विपस्य तोयात्स्थले वृद्धिकरं नृभर्तुः ॥ ६४ ॥

इति हस्तीङ्गितम् ।

प्रवेशनं वारिणीति ॥ वारिणि जले वारणस्य गजस्य ग्रा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हेण नक्रेण प्रवेशनं यदि भवेत्तदा नृपस्य राज्ञो नाशाय भवेत् । ग्राहं गृहीत्वा तोयाज्जलाद् द्विपस्य गजस्य स्थले भूमावुत्तरणमुद्धरणं भवेत्तदा नृभर्तू राज्ञो वृद्धिकरं भवेदिति ॥ ६४ ॥

इति हस्तींगितविवृतिः समाप्ता ।

अथ रणे माद्यद्गजशालिन एव राज्ञो जयश्रीर्भवतीति मदकरणौषधकथनाय बीजं वपति ।

रणे जित्वा शत्रून्भवति नृपलक्ष्मीःक्षितिभृतां
जयस्तेषां येषां मदमलिनगण्डाः करिवराः ।
भिनत्त्येको मत्तः परबलममत्तेभबहुलं
यतोऽतोऽहं वक्ष्ये करिमदकरं द्रव्यनिचयम् ॥६५॥

रणे जित्वेति ॥ रणे सङ्ग्रामे शत्रून् जित्वा क्षितिभृतां राज्ञां नृपलक्ष्मी राजश्रीर्भवति जयश्च तेषां राज्ञां भवति येषां मदमलिनगण्डाः करिवरा गजश्रेष्ठाः सन्ति एक एकाकी मत्तो मदयुक्तो हस्ती । अमत्तेभबहुलं परबलं विगतमदयुक्तहस्तिप्रचुरमन्य सैन्यं भिनत्त्यतोऽहं वराहमिहिराचार्यः करिमदकरं हस्तिमदकरं द्रव्यनिचयं पदार्थसमूहं वक्ष्ये ॥ ६५ ॥

अथातो मदकरद्रव्यसमूहं कथयति त्रयोदशभिः ।

जातीगुडूचीकदलीतिलानामास्फोतकर्पासबला-
न्वितानाम् । भार्गीसनीलीगिरिकर्णिकानां धत्तूर-
कस्यन्दनमाषभागः ॥ ६६ ॥

जातीगुडूचीकदलीतिलानामिति॥जातीगुडूचीकदलीतिलानामत्रजाती लोके चमेली) पुष्पे जाती प्रभृतय इत्यमरः । अन्ये प्रसिद्धा एवेति । किञ्चिद्विशिष्टानामेतेषामास्फोतकर्पासबलान्वितानामत्रास्फोतो म-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्दारः (अर्काह्वसुकाऽऽस्फोतगणरूपविकीरणाः मन्दारश्चार्कपर्णोत्रामरः) अन्ये प्रसिद्धा एव । भार्गीसनीलीगिरिकर्णिकानाम् । अत्र भार्गी भारङ्ग इति ख्याता (हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिकेत्यमरः) सनीली औषध विशेषः गिरिकर्णिकाऽपराजिता । एतेषां समभागः यथोक्तं शार्ङ्गधरे भागेनोक्तेतु साम्यं स्यादित्युक्तत्वादेतेषां समांशः । अत्रधत्तूरकस्यन्दन माषभागः । क्षेप्यः धत्तूरः प्रसिद्धः स्यन्दनो (लो० सादन) तिनिशे स्यन्दनो नेमी रथद्रुरति मुक्तक इत्यमरः । अर्थान्माषप्रमितो धत्तूरः क्षेप्यस्तथा माषमितः स्यन्दनः क्षेप्य इति ॥ ६६ ॥

कलम्बुका कर्णकमाषपर्णी पुनर्नवा भृङ्गरजोऽश्वगन्धाः । शेफालिकांसोटककच्छुराश्च कोशातकी गोक्षुरकं विदारी ॥ ६७ ॥

कलम्बुका कर्णकमाषपर्णीति ॥ कलम्बुका कर्णकमाषपर्णी कलम्बुका (लोके अमलतास इति) कर्णको (लो. कनेर.) माषपर्णी माषविशेषस्य पत्रम् । (हयपुच्छीतु काम्बोजी माषपर्णी महासहेत्यमरः) पुनर्नवा प्रसिद्धा । (पुनर्नवा तु शोथघ्नीत्यमरः) भृंगरजोऽश्वगन्धाः । (भृंगरजो लोके घमिरा) स्यान्मार्कवो भृंगरजो भृंगराजः सुजागर इति रभसः ॥ अश्वगन्धो (लोके असगन्ध इति) शेफालिकांसोटककच्छुराश्च शेफालिका (लोके शमहालू शेफालिका तु सुवहा निर्गुण्डी नीलिका च सेत्यमरः इति च) आंसोटकः (लो० सहोर इति) कच्छुराश्च (लो० यवासा) (रोदनी कच्छुरान्ता समुद्रान्ता दुरालभेत्यमरः)। कोशातकी गोक्षुरकं विदारी अत्र कोशातकी (लोके तरोई इति) कोशातकः कचे पुंसि पटोल्यां घोषके स्त्रियामिति मेदिनी गोक्षुरकं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(लोके गुखुरू इति) बिदारी विंदार्य्या मूलं (बिदारी क्षीर-शुक्लेक्षुगन्धेत्यमरः) ॥ ६७ ॥

विष्णुक्रान्ता दुग्धिका शालपर्णी खट्वापादी वाकुची वस्तगन्धा । व्याघ्री च स्यात्पृष्णिपर्णी मृणालं पटोरकः सल्लकी तन्दुलीयः ॥ ६८ ॥

विष्णुक्रान्ता दुग्धिकेति ॥ विष्णुक्रान्ताऽपराजिता दुग्धिका (लोके दुधिया) (क्षीरावी दुग्धिका समेत्यमरः) शालपर्णी (लोके शरिवन) विदारिगन्धांशुमती शालपर्णी स्थिरा ध्रुवेत्य-मरः) खट्वापादी (लो० बननिवारि) वाकुची (लो० बकु-ची) (सोमराजी कृष्णफला वाकुची कुष्ठनाशिनीति निघण्टुः) (कालमेषी कृष्णफला वाकुची पूतिफलपपीत्यमरः) वस्तगन्धा (लोके विरहरा बबई) व्याघ्रीच (कठैया लोके) पृश्निपर्णी (सिंहपुच्छी पिठवण इति च) पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रि-वल्लिकेत्यमरः) मृणालं (विसाँढ लोके) मृणालं विसामित्यमरः पटोरकः (लोके परवर) सल्लकी (सालई इति) सल्लकी ह्लादिनीति चेत्यमरः तन्दुलीयः (लोके चौराई मरसा इति ॥

एतैर्यथासम्भवसम्प्रयुक्तैर्मत्तस्य नागस्य मदाभि-वृद्धिः । दानप्रभेदश्च मदोज्झितस्य सर्वाङ्गशोभा च मुखेऽतिरिक्ता ॥ ६९ ॥

एतैर्यथासम्भवसम्प्रयुक्तैरिति ॥ एतैः पूर्वकथितौषधैर्यथास-म्भवसम्प्रयुक्तैर्यथाप्राप्तसम्मिलितैर्मत्तस्य मदशालिनो नागस्य मदाभिवृद्धिर्भवति दानाभ्युपचयो भवति (मदो दानमित्यमरः)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अपिच मदोज्झितस्य मदरहितस्य हस्तिनो दानप्रभेदश्च भवति । मदस्रवो भवतीति । सर्वांगशोभा च सकलशरीरकान्तिश्च मुखे मुखदेशेऽतिरिक्ताऽत्यधिकता शोभा भवतीति ॥ ६९ ॥

जीवकमधूकधन्वनपटेरकङ्कोलकदलिऋषभाणाम् ।
सौभाञ्जननिम्बेङ्गुदपरूषकाणाञ्च मूलानि ७० ॥

जीवकमधूकधन्वनपटेरकङ्कोलकदलिऋषभाणामिति ॥ जीवकमधूकधन्वनपटेरकङ्कोलकदलिऋषभाणां मूलानि । अत्र जीवकः (लोके तिलकोड़ इति) (सर्ज्जकासनवन्धूक पुष्यप्रियकजीविका इत्यमरः) मधूकः (महुआ इति) । धन्वनो (धनीति लोके) पटेरः (पटेरे लो.) कङ्कोलः प्रसिद्धः । (कङ्कोलं कोशफलमित्यमरः कदली रम्भेति । ऋषभ ऋषभाख्यौषधविशेषः । (शृङ्गीतु ऋषभो वृष इत्यमरः) । सौभाञ्जननिम्बेङ्गुदपरूषकाणाञ्च मूलानि । अत्र सौभाञ्जनं (लोके सोहिजन इति) (सौभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचका इत्यमरः) निम्बः प्रसिद्धः । इङ्गुदः [इङ्गुदी तापसतरुरित्यमरः]परूषकः [लो.फालसा] एतेषामौषधानां मूलानीति ॥ ७० ॥

मूलानि शतावर्याः काकोली क्षीरसञ्ज्ञकाकोली ।
श्लेष्मान्तकशाल्मलिशल्लकीजटाःस्युर्विदार्यश्च ७१

मूलानि शतावर्या इति ॥ शतावर्य्याः शतावर्य्येव लोके ख्याताया मूलानि [ऋष्यप्रोक्ताऽभीरुपत्नी नारायण्यः शतावरीत्यमरः] काकोली शीतपाकीति [काकोली शीतपाकी च पयस्या वायसोलिकेति निघण्टुः] क्षीरसञ्ज्ञकाकोली महावीरा [पयस्या क्षीरकाकोली महावीरा पयस्वनीति च निघण्टुः] । श्लेष्मान्त-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कशाल्मलिशल्लकीजटाः स्युः । अत्र श्लेष्मान्तको भूकर्बुदारः (लो. लभेरः) । (श्लेष्मान्तकः कर्बुदारः पिच्छिलो लेखसाटक इति निघण्टुः) । शाल्मलिस्तरुः प्रसिद्ध एवेति शल्लकी (लो. सालई) (शल्लकी गजभक्ष्या च गजप्रिया चाह्लादिनीति निघण्टुः) । जटाः (लो. जटामासीति) विदार्यश्च (लो. विदाई कन्द इति) भवन्तीति ॥ ७१ ॥

काशीसाश्मन्तकराजमाषमूलानि चैवमेतानि ।
सर्वाणि वक्त्रशोभा जनयन्ति सदैव नागानाम् ७२

काशीसाश्मन्तकराजमाषमूलानीति ॥ कासीसः (लो० कसीस) अश्मन्तकः पाषाणभेदः राजमाषः (लो. लोबिया) एतेषां पूर्वप्रतिपादितौषधीनां मूलानि सर्वाणि सदैव सर्वसमये नागानां हस्तिनां वक्त्रशोभां मुखकान्तिं मदोत्पत्तिं जनयन्त्युत्पादयन्तीति ॥७२॥

नीलीपत्रैश्चूर्णितैर्माषचूर्णो दध्ना युक्तो माहिषेणैव पिण्डः । नागेन्द्राणामाशु धत्ते मदाप्तिं नील्येकैव द्रव्यवर्गे प्रधाना ॥ ७३ ॥

नीलीपत्रैश्चूर्णितैरिति ॥ चूर्णितैश्चूर्णीभूतैर्नीलीपत्रैः (लो. नील) (नीलीतु नीलिनी नीला मेघवर्णा च क्रुत्सलेति निघण्टुः) माषचूर्णो युक्तो योजितो माहिषेणैव दध्ना पिण्डः कार्यः। नागेन्द्राणामाशु शीघ्रं मदाप्तिं धत्ते । अपिच द्रव्यवर्गे गजौषधसमूहे नील्येका प्रधाना श्रेष्ठेति ॥ ७३ ॥

एकैव करोति काकजंघा ह्येकैव च माषमुद्गपर्णी । ताम्बूलवनार्द्रवृश्चिकाल्पश्चैकैका मददास्तथैव मुस्ताः ॥ ७४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकैव करोतीति ॥ काकजङ्घा प्रसिद्धा (काकजङ्घा च काकाञ्ची काकाङ्गी काकनासिकेति निघण्टुः) । एकैव मदाप्तिं करोति । हि निश्चये एकैकैव च माषमुद्गपर्णी माषमुद्गयोः पर्णी मदाप्तिं करोति । ताम्बूलवनार्द्रवृश्चिकालघ्वैकैका मददा भवन्ति । नागानां तथैव मुस्ताः (लो॰ मोथा) मददा भवन्ति इति ॥ ७४ ॥

कर्पास्यैका चञ्चुसंयोजिता वा ज्ञेया चैका कण्टकी शैलिकाख्या । एकः शस्तो वल्कलः स्फूर्जकस्य जातीभृङ्गेनान्वितो वा कुठेरः ॥ ७५ ॥

कर्पास्यैकेति ॥ एका कर्पासी केवला कर्पासी प्रधाना ज्ञेया । वा पक्षान्तरे चञ्चुसंयोजिता चञ्च्वाख्यशाकसम्मिलिता (चञ्चुश्च विजला चञ्चुः कलभीरुपताऽत्रिका । चञ्चुरश्चञ्चुपत्रश्च सुशाकः क्षेत्रसम्भव इति निघण्टुः) एका प्रधाना कण्टकी (भटकटैया) ज्ञेया । शैलिकाख्या एका प्रधाना ज्ञेया । स्फूर्जकस्य तिन्दुलस्य वल्कलस्त्वगेकः प्रधानः शस्तो ज्ञेयः । वा पक्षान्तरे जातीभृङ्गेनान्वितः कुठेरः जातीपुष्पविशेषः भृंगस्त्वक्पत्रं (त्वक्पत्रमुत्कटं भृंगमित्यमरः) आभ्यां युक्तः कठिञ्जरः (कठिञ्जरकुठेरकाविल्यमरः) शस्तो ज्ञेयो गज भैषज इति ॥ ७५ ॥

एकमेवेंगुदीमूलमदप्राचुर्यकारकम् ।
एका च श्वेतकाम्बोजी श्वेता चैकाऽपराजिता ७६

एकमेवेंगुदीमूलमिति ॥ इंगुदीमूलं तिक्तकमूलमेकं प्रधानमदप्राचुर्यकारकं सुबहुबलदानकारकं भवति । श्वेतकाम्बोजी शुक्लहयपुच्छी एका प्रधाना भवति । (हयपुच्छी तु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

काम्बोजीत्यमरः) श्वेता शुक्लैकाऽपराजिता विष्णुक्रान्ता मददा भवतीति ॥ ७६ ॥

समूलो वीरणस्तम्बः समूला मल्लिका तथा ।
मदप्राचुर्यसौरभ्यं कुर्वन्तीन्दीवराणि च ॥७७॥

समूलो वीरणस्तम्ब इति ॥ समूलो मूलसहितो वीरणस्तम्बो वीरतरप्रकाण्डः (स्याद्वीरणं वीरतरं मूलेऽस्योशीरमस्त्रिया-मित्यमरः) । तथा समूला मल्लिका मूलयुक्तगवाक्षी । इति मद-प्राचुर्यसौरभ्यं कुर्वन्ति इन्दीवराणि च नीलाम्बुजन्मानि च मद-प्राचुर्यसौरभ्यं कुर्वन्तीति ॥ ७७ ॥

सुरसा गुडसंयुक्ता पुनर्नवा गोमयेऽथ वा स्विन्ना ।
वाराहीमूलानि च भिदन्ति गुडेन युक्तानि ॥७८॥

सुरसा गुडसंयुक्तेति ॥ गुडसंयुक्ता सुरसा नाकुली (नाकुली सुरसा रास्नेत्यमरः । अथवा गोमये स्विन्ना सिद्धा पुनर्नवा प्रसिद्धा । गजौषधे शस्ता भवतीति । गुडेन युक्तानि वाराही मूलानि [वाराही कटाई] भिन्दन्ति मादयन्तीति ॥ ७८ ॥

अथाहारवशेन विशेषमाह द्वाभ्याम् ।

मध्वालुका मधुयुता मुखशोभामातनोति नागानाम् । नेक्ष्वाहारस्य हितो गुडेन पिण्डो हितो दध्ना ॥ ७९ ॥

मध्वालुकेति ॥ मधुयुता मधुनान्विता मध्वालुका (लो. महुआ इति) नागानां गजानां मुखशोभामातनोति मुखकान्तिं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुविस्तारयति । इक्ष्वाहारस्येक्षुभक्षकस्य गजस्य गुडेन गुडसाकं पिण्डो भेषजपिण्डो न हितो भवति तस्य दध्ना पिण्डो हितो भवतीति ॥ ७९ ॥

माषाशिनां गुडयुतस्तृणाशिनां शस्यते वसा-
युक्तः । व्यतिमिश्राहाराणां विज्ञाय बलाबलं
दद्यात् ॥ ८० ॥

माषाशिनामिति ॥ माषाशिनां माषभक्षणरतानां हस्तिनां गुडयुतः पिण्डो हितो भवति । तृणाशिनां तृणभक्षणपराणां वसायुक्तः पिण्डः शस्यते । भक्षणायेति । व्यतिमिश्राहाराणां माषतृणाद्याहाररतानां गजानां बलाबलं सामर्थ्यं विज्ञाय भेषजं दद्यादिति ॥ ८० ॥

प्रायो मदस्य पवनः कुरुते विघातं
स्रोतांस्यतो घृतयुतैर्बहुशोऽस्य पिण्डैः ।
संस्वेदयेद्भवति येन मदप्रवृद्धि-
र्भिन्नस्य चापि मदवृद्धिकराणि दद्यात् ॥ ८१ ॥

इति श्रीवराहमिहिराचार्य्यकृतायां योगयात्रायां
हस्तिलक्षणाध्यायो दशमः ॥ १० ॥

प्रायो मदस्येति ॥ प्रायो बाहुल्येन पवनो वायुर्मदस्य दानस्य विघातं विशेषेण हानिं कुरुतेऽतोऽस्य मदस्राविगजस्य बहुशो बारंवारं घृतयुतैः पिण्डैर्घृतमिलितभेषजसमुदायैरेरण्डवी-जादिचूर्णैः स्रोतांस्यम्बुसरणानि (स्रोतोम्बुसरणं स्वत इत्यमरः) संस्वेदयेत्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

येन मदप्रवृद्धिर्भवति भिन्नस्य चापि मदरहितगजस्य चापि मदवृद्धिकराणि भेषजानि दद्यादिति ॥ ८१ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां
हस्तिलक्षणाध्यायो दशमः ॥ १० ॥

अथाश्वेङ्गिताध्यायो व्याख्यायते तत्रादौ धन्याश्वमाह ।

दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः
सूक्ष्मत्वक्केशवालःसुशफगतिमुखो ह्रस्वकर्णोष्ठपुच्छः
जङ्घाजानूरुवृत्तःसमसितदशनश्चारुसंस्थानरूपो
वाजी सर्वाङ्गशुद्धो भवति नरपतेःशत्रुनाशायनित्यम् १

दीर्घग्रीवाक्षिकूट इति ॥ यो वाजी घोटको दीर्घग्रीवाक्षिकूटो भवति अर्थाद्दीर्घगलो दीर्घनेत्रकोशो भवति । अपिच त्रिकहृदय-पृथुः कटिदेशे हृदये च विपुलो भवति । ताम्रताल्वोष्ठ-जिह्वस्ताम्रवद्रक्ततालवोष्ठजिह्वावान् । सूक्ष्मत्वक्केशवालः शरीरत्वक् सूक्ष्मः । मस्तककेशः सूक्ष्मः । वालः पुच्छः सूक्ष्मकेशान्वितो भवति । सुशफलगतिमुखः शोभनखुरगमनाननो भवति । ह्रस्वकर्णोष्ठपुच्छो लघुकर्णो लघ्वोष्ठो लघुपुच्छो भवति । जंघाजानूरुवृत्तो वर्तुलजं-घाजानूरुवान् । समसितदशनस्तुल्यशुक्लदन्तश्चारुसंस्थानरूपः । सुन्दराकारस्वरूपो भवति । अपिच सर्वाङ्गशुद्धः सकलशरी-रोऽशुभावर्त्तहीनो भवति । एषोऽश्वो नरपते राज्ञो नित्यं सततं शत्रुनाशाय भवतीति ॥ १ ॥

अथातो हयाङ्गज्वलनवशेन फलमाह ।

उत्सर्गान्न शुभदमासनापरस्थ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वामे च ज्वलनमतो परं प्रशस्तम् ।
सर्वाङ्गज्वलनमवृद्धिदं हयानां
द्वे वर्षे दहनकणाश्च धूपनं वा ॥ २ ॥

उत्सर्गादिति ॥ उत्सर्गात्स्वभावत आसनापरस्थमासनभिन्नस्थमुपवेशनस्थानादन्यत्र पृष्ठस्थं ज्वलनमुष्णता स्यात् । तदा न शुभदम् वामे च न शुभं भवति। अतोऽपरस्थं दक्षिणभागस्थं प्रशस्तं शुभदायकं भवेत् । हयानां सर्वाङ्ग ज्वलनमवृद्धिदं सकलपदानामपचयकारकं भवति द्वे वर्षे दहनकणाश्चाग्निकणा धूपनं वाऽवृद्धिकरं भवतीति ॥ २ ॥

अन्तःपुरं नाशमुपैति मेढ्रे कोशः क्षयं यात्युदरे प्रदीप्ते । पायौ च पुच्छे च पराजयः स्याद्वक्त्रोत्तमाङ्गज्वलने जयश्च ॥ ३ ॥

अन्तःपुरमिति ॥ मेढ्रे लिङ्गे प्रदीप्ते प्रज्वलिते सत्यन्तः पुरमन्तर्गृहं राज्ञीवासं नाशमुपैति प्राप्नोति। उदरे जठरे प्रदीप्ते कोशो धनागारः क्षयं याति गच्छति । पायौ च गुदे च प्रदीप्ते च पुच्छे प्रदीप्ते पराजयः स्यात् । वक्त्रोत्तमाङ्गज्वलने मुखमस्तकप्रदीप्ते जयश्च स्यादिति ॥ ३ ॥

अथ विशेषमाह ।

स्कन्धासनांशज्वलनं जयाय बन्धाय पादज्वलनं प्रदिष्टम्। ललाटवक्षोऽक्षिभुजे च धूमः पराभवाय ज्वलनं जयाय ॥ ४ ॥

स्कन्धासनांशज्वलनमिति ॥ स्कन्धासमांशज्वलनं स्कन्धांशो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ग्रीवाऽऽसनांशो पृष्ठनिकटांशः । एषु ज्वलनं जयाय जयार्थं भवति । पादज्वलनं चरणप्रदीप्तं बन्धाय बन्धनाय प्रदिष्टं कथितम् । ललाटवक्षोऽक्षिभुजे च धूमः स्वभावतो वाष्पोद्गमः पराभवाय पराजयाय प्रदिष्टः । ज्वलनं तत्र जयाय भवति ॥४॥

अथाऽश्ववर्णवशेन ज्वलनफलमाह ।

नासापुटप्रोथशिरोऽश्रुपातनेत्रे च रात्रौ ज्वलनं जयाय। पालाशताम्रासितकर्बुराणां नित्यं शुकाभस्य सितस्य चेष्टम् ॥ ५ ॥

नासापुटप्रोथशिरोऽश्रुपातनेत्रे चेति ॥ नाशापुटप्रोथशिरोऽश्रुपातनेत्रे च रात्रौ ज्वलनं जयाय भवति । अत्र प्रोथो घोटकनासिकाग्रभागः । अश्रुपातो नेत्रजलपातस्थानमन्यत्स्पष्टम् ॥ केषामिति पालाशताम्रासितकर्बुराणामर्थाद्धरितरक्तकृष्णचित्रवर्णानामश्वानामिति । तत्रापि शुकाभस्य हरितवर्णस्याऽश्वस्य च नित्यप्रवर्तितं ज्वलनं जयाय भवति । सितस्य च शुक्लवर्णस्याऽश्वस्य च इष्टं शुभफलदायकं ज्वलनं भवतीति ॥ ५ ॥

अथाश्वानां कुचेष्टितान्याह ।

प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्ताद्विना
कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा सम्भवः ।
अस्वप्नश्च विरुध्यता निशि दिवा निद्रालसध्यानता
सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम्

प्रद्वेषो यवसाम्भसामिति ॥ येषां वाजिनां यवसाम्भसां प्रद्वेषः प्रपतनं भवेत् । क्रमेणार्थाद्यवसानां घासानां (घासस्तु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यवसस्तृणमित्यमरः) प्रद्वेषोऽभक्षणता । अम्भसां जलानां प्रपतनं शरीरादिति शेषः । अपिच निमित्तात्कारणाद्विना स्वेदो घर्मोद्गमो वा तद्विना कम्पो भवेच्च वदनान्मुखाद्रक्तपतनो शोणितपातो वा धूमस्य बाष्पविशेषस्य सम्भवः सम्यक् प्राप्तिः । निशि रात्रावस्वप्नो निद्राराहित्यं विरुद्धता दिनभ्रान्तिर्दिवा दिने निद्रालसध्यानता । अपिच सादोऽधोमुखताऽऽरोहणसमयेऽधोमुखता इदं कथितं विचेष्टितं कुचेष्ठितं नेष्टमशुभफलदायकं स्मृतं कथितमिति ॥ ६ ॥

पुनस्तदाह ।

आरोहणमन्यवाजिनां पर्याणादियुतस्य वाजिनः ।
उपवाह्यतुरङ्गमस्य वा कल्पस्यैव विपन्नशोभना ॥७॥

आरोहणमन्यवाजिनामिति ॥ पर्याणादियुतस्याश्वारोहणसामग्र्यादिसमन्वितस्य वाजिनोऽश्वस्योपर्यन्यवाजिनां घोटकानामारोहणं यदि भवेत् । वा उपवाहनतुरङ्गमस्यारोहणयोग्यघोटकस्यान्यवाजिन उपर्यारोहणं भवेत्तदा कल्पस्यैव समर्थस्यैव राज्ञो विपत्कष्टं स्यात् । न शोभना स्यादिति ॥ ७ ॥

अथाश्वानां सुचेष्टितमाह ।

क्रौञ्चवद्रिपुवधाय हेषितं ग्रीवया त्वचलया च सोन्मुखम् । स्निग्धमुच्चमनुनादि हृष्टवद्ग्रासरुद्धवदनैश्चवाजिभिः ॥ ८ ॥

क्रौञ्चवद्रिपुवधायेति ॥ यस्य तुरंगमस्यारोहणसमये क्रौञ्चवत्क्रौञ्चपक्षिवद्धेषितं शब्दो रिपुवधाय शत्रुनाशाय भवति । अचलया स्थिरया ग्रीवया सोन्मुखमन्यवाजिनं प्रति हेषितं च तथा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रिपुवधाय भवतीति । अपि च ग्रासरुद्धवदनैर्भक्ष्यावरुद्धमुखैर्वा-जिभिर्घोटकैः स्निग्धं श्लक्ष्णमुच्चं प्लुतस्वरमनुनादि पूतिशब्दं हृष्टवद्धसति तथापि रिपुवधाय भवतीति ॥ ८ ॥

अथारोहणे सुशकुनान्याह

पूर्णपात्रदधिविप्रदेवता गन्धपुष्पफलकाञ्चनादि च।
द्रव्यमिष्टमथवापरं भवेद्धेषता यदि समीपतो जयः ६

पूर्णपात्रदधिविप्रदेवता इति ॥ यदि यात्रासमये पूर्णपात्रदधि-विप्रदेवता दृश्यन्ते । गन्धपुष्पफलकाञ्चनादि च दृश्यते ॥ अथवाऽपरं द्रव्यमिष्टं पट्टाम्बरं रत्नादि भवेत् । यदि ह्रेषताऽश्वशब्द-विशेषता (हेषा ह्रेषा चेत्यमरः) भवेत्तदा समीपतो निकटादेव जयो भवतीति ॥ ६ ॥

अथाभिमतार्थदवाजिनश्चेष्टितमाह ।

भक्ष्यपानखलिनाभिनन्दिनःपत्युरौपयिकनन्दि-
नोऽथवा । सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छिता-
र्थफलदास्तुरङ्गमाः ॥ १० ॥

भक्ष्यपानखलिनाभिनन्दिन इति ॥ भक्ष्यपानखलिनाभि-नन्दिनः भक्षणपेयकविकाभिरामोदशब्दशालिनो (कविका तु खलीनोऽस्त्रीत्यमरः) ऽथवा पत्युरौपयिकनन्दिनः । पत्युर्भर्त्तुः औपयिकनन्दिनः स्वामिसमीपगतामोदशब्दशालिनः अथवा सव्यपार्श्वगतदृष्टयो दक्षिणभागगतदृष्टयः । एते तुरङ्गमा अश्वा वाञ्छितार्थफलदा अभिमतफलदा भवन्तीति ॥ १० ॥

अथाश्वचेष्टया गमनाशुभमाह ।

वामैश्च पादैरभिताडयन्तो महीं प्रवासाय भवन्ति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भर्त्तुः । सन्ध्यासु दीप्तामवलोकयन्तो हेषन्ति चेद्बन्धपराजयाय ॥ ११ ॥

वामैश्च पादैरिति ॥ वामैः पादैश्चरणैर्महीं पृथ्वीमभिताडयन्तो भर्त्तुः प्रभोः प्रवासाय भवन्ति यात्रां सूचयन्तीति । सन्ध्यासु सन्ध्यासमयेषु दीप्तां दिशमालोकयन्तश्चेद्धेषन्ति शब्दविशेषं कुर्वन्ति तदा बन्धपराजयाय भवन्ति भर्तुरितिशेषः ११

पुनस्तदाह ।

अतीव हेषन्ति किरन्ति बालान्निद्रारताश्च प्रवदन्ति यात्राम् । रोमत्यजा दीनखरस्वरांश्च पांशून्ग्रसन्तश्च भयाय दिष्टाः ॥ १२ ॥

अतीव हेषन्तीति ॥ यद्यतीवातिशयेन हेषन्ति शब्दं कुर्वन्ति अपिच बालान् पुच्छबालान् किरन्ति भिन्नं भिन्नं विरलं कुर्वन्ति निद्रारताश्च निद्रालीनाश्च भवेयुस्तदा यात्रां प्रवदन्ति कथयन्ति भर्त्तुरिति । रोमत्यजा रोमत्यागिनो दीनखरस्वराश्च कातरगर्दभवच्छब्दाश्च भवेयुः । पांशून् धूलीर्ग्रसन्तश्च कवलयन्तश्च भर्त्तुर्भयाय दिष्टाः कथिताः ॥ १२ ॥

पुनः सुचेष्टितमाह ।

समुद्गवद्दक्षिणपार्श्वशायिनः पादं समुत्क्षिप्य च दक्षिणं स्थिताः । जयाय शेषेष्वपि वाहनेष्विदं फलं यथासम्भवमादिशेद्बुधः ॥ १३ ॥

समुद्गवद्दक्षिणपार्श्वशायिन इति ॥ येऽश्वाः समुद्गवद्दक्षिणपार्श्वशायिनः सम्पुटवद्दक्षिणभागपार्श्वशयनशालिनो भवेयुः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दक्षिणं पादं दक्षिणभागचरणं समुत्क्षिप्योद्धृत्य स्थिता भवेयुस्तदा जयाय भवन्ति । शेषेष्वपि गजोष्ट्रादिष्वपीदं पूर्वोक्तं यथासम्भवं फलं बुधः पण्डितः आदिशेत्कथयेदिति ॥ १३ ॥

अथ सद्यो धनदचेष्टितमाह ।

आरोहति क्षितिपतौ विनयोपपन्नो
यात्रानुगोऽन्यतुरगं प्रति हेषितं च ।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं
योऽश्वः सभर्त्तुरचिरात्प्रचिनोति लक्ष्मीम् ॥१४॥

आरोहतीति ॥ क्षितिपतौ राजनि आरोहति सति योऽश्वो विनयोपपन्नो विशेषनयेन युक्तो भवति यात्रानुगो गम्यदिगभिमुखो भवति स्वेनैवान्यतुरगमन्याश्वं प्रति हेषितं च करोति वा वक्त्रेण मुखेन दक्षिणमात्मपार्श्वं सव्यस्वकीयपार्श्वं स्पृशति । सोऽश्वो भर्त्तुः स्वामिन अचिरात्सद्यो लक्ष्मीं राजसम्पदं प्रचिनोति वितनोतीति ॥ १४ ॥

अथ वाजिनामशिवचेष्टितमाह ।

मुहुर्मुहुर्मूत्रशकृत्करोति
न ताड्यमानोऽप्यनुलोमयायी ।
अकार्यभीतोऽस्त्रुविलोचनश्च
शिवं न भर्त्तुस्तुरगोऽभिधत्ते ॥ १५ ॥

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायामश्वेङ्गिताध्याय एकादशः ॥ ११ ॥

मुहुर्मुहुरिति ॥ योऽश्वो मुहुर्मुहुर्वारंवारं मूत्रशकृत्करोति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रस्तावोच्चारं करोति । ताड्यमानोऽपि कशापीड्यमानोऽप्यनुलोमयायी अनुकूलगमनशीलो न भवति । अपिच योऽश्वोऽकार्यभीतः कारणं विनैव त्रस्तो भवत्यस्नुविलोचनश्चास्नुयुक्तदृग्भवति । स तुरगो भर्त्तुः स्वामिनः शिवं कल्याणं नाभिधत्ते न ददातीति ॥ १९ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायामश्वेङ्गिताध्याय एकादशः ॥ ११ ॥

अथ खड्गलक्षणाध्यायो व्याख्यायते ।

तत्रादौ ज्येष्ठकनिष्ठखड्गकथनपूर्वकं व्रणफलं वक्ति ।

अङ्गुलशतार्धमुत्तम ऊनः स्यात्पञ्चविंशतिः खड्गः।
अङ्गुलमानाज्ज्ञेयः समांगुलस्थो व्रणः शुभदः ॥१॥

अंगुलशतार्धमुत्तम इति ॥ अंगुलशतार्धं ५० पञ्चाशदंगुलमितः खड्ग उत्तमो भवति । पञ्चविंशत्यंगुलमितः खड्ग ऊनो लघुः स्यात् । इति खड्गोऽङ्गुलमानाज्ज्ञेयः । तत्र समाङ्गुलस्थो व्रणश्चिन्हविशेषः शुभदो भवति । तत्रखड्गे विषमांगुलस्थो व्रणोऽशुभदो भवतीति ॥ १ ॥

अथ खड्गे शुभचिह्नान्याह ।

श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणाःप्रशस्ता ध्वजायुधस्वस्तिकानां च ॥२॥

श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानामिति ॥ यदि खड्गे श्रीवृक्षवर्द्धमानातपत्रशिवलिंगकुण्डलाब्जानाम् । विल्ववृक्षशरावछत्रमहेशलिंगकर्णवेष्टनकमलानाम् । अत्र (शरावो वर्धमानक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्यमरः) एतेषां सदृशाः समाना व्रणाश्चिह्नविशेषाः प्रशस्ताः शुभदा भवन्ति । ध्वजायुधस्वस्तिकानाञ्च समाना व्रणाः प्रशस्ता भवन्ति । अत्र स्वस्तिकश्चतुर्द्वारतोरणः (स्वस्तिकः सर्वतो भद्र इत्यमरः) ॥ २ ॥

अथ खड्गेऽशुभदचिह्नान्याह।

कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च॥३॥

कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतय इति ॥ यदि खड्गे कृपाणे कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिका कृतयो व्रणा भवंति तदा न शुभदा भवन्ति । कृकलासः सरटः । काकः प्रसिद्धः । कङ्कः पक्षी (लोके चील्ह इति) क्रव्यादो मांसभक्षयिता पक्षी गृद्धादिः । कबन्धश्छिन्नशिरस्कः । वृश्चिकः प्रसिद्धः वंशानुगताः खड्गमध्यभागलीना व्रणा न शुभदा भवन्ति । प्रभूताश्च बहवो व्रणाश्च न शुभदा भवन्तीति ॥ ३ ॥

अथ विशेषमाह ।

स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः
अस्वर इति चानिष्टः प्रोक्तविपर्यस्त इष्ट फलः ४॥

स्फुटित इति ॥ स्फुटितस्त्रुटितः । ह्रस्वो लघुः । कुण्ठोऽतीक्ष्णो वंशच्छिन्नो मध्यभागभङ्गो दृग्मनोऽनुगतो न दृष्टिमानसप्रियो न भवति । अस्वरः शब्दरहित इति चानिष्टोऽनिष्टफलदः प्रोक्तः कथितः । प्रोक्तविपर्यस्तः कथितव्यत्यय इष्टफलो भवत्यर्थादस्फुटितो बृहत् तीक्ष्णः । मध्यच्छिन्नरहितो दृष्टिमनः प्रीतिकरः । सशब्द इतीष्टफलो भवतीति ॥ ४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ पुनर्विशेषमाह ।

क्वणितं मरणायोक्तं पराजयायाप्रवर्त्तनं कोशात् ।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ५

क्वणितमिति ॥ क्वणितं शब्दितं स्वयमेव यदि भवति तदा मरणाय भवति कोशात् (म्यानइतिलोके) अप्रवर्त्तनं बहिर्गमनं नभवेत्तदा पराजयाय हानये भवति । स्वयमुद्गीर्णे निःसृते युद्धं भवति । ज्वलिते खड्गे युद्धसमये स्वयं ज्वालायुक्ते विजयो भवति । सर्वत्र स्वामिन इतिशेषः ॥ ५ ॥

अथान्यद्विशेषमाह ।

नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न वास्य कथयेत्प्रतिमानयेच्च
नैवस्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥ ६ ॥

नाकारणमिति ॥ अकारणं कारणं विना न विवृणुयान्न बहिर्निः क्रामयेत् । न विघट्टयेच्च केनापि वस्तुना न विघट्टयेत् न ताडयेच्च । तत्र खड्गे वदनं मुखं न पश्येन्नालोकयेत् । मूल्यं खड्ग मूल्यं न वदेन्न कथयेत् । न वाऽस्य खड्गस्य देशं निर्माणस्थानं न कथयेत् । न प्रतिमानयेन्नाङ्गुलादिना मापयेत् । अप्रयतोऽपवित्रः सन् नृपती राजाऽसियष्टिं खड्गगात्रं नैव स्पृशेन्नैवस्पर्शनं कुर्यादिति ६

पुनः प्रशस्तचिह्नान्याह ।

गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्त्रसदृशश्चन्द्रमण्डलाग्रः प्रशस्तश्च ॥ ७ ॥

गोजिह्वासंस्थान इति ॥ गोजिह्वासंस्थानो गोजिह्वाकृतिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नीलोत्पलवंशपत्रसदृशश्च नीलकमलाभः । वंशपत्रसमानश्च । करवीरपत्रसदृशश्चन्द्रमण्डलाभः खड्गः प्रशस्तश्च शुभदश्चेति भवति ॥ ७ ॥

अथ निर्माणसमयेऽधिके निष्पन्ने विशेषमाह ।

निष्पन्नो न च्छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥८॥

निष्पन्न इति ॥ निष्पन्नः खड्गो निर्माणसमयेऽधिकसिद्धो न छेद्यो भवति । अपिच निषकैः शाणैः प्रमाणयुक्तः सखड्गः कार्यः । मूले छिन्ने सति स्वामी म्रियतेऽग्रतोऽग्रभागाच्छिन्ने तस्य स्वामिनो जननी माता म्रियत इति ॥ ८ ॥

अथ खड्गमुष्टिभागचिह्नवशेन विशेषं वक्ति ।

यस्मिन्त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य ।
वनिता नामिव तिलकं गुह्ये वाच्यो मुखे दृष्ट्वा ॥९॥

यस्मिन्निति ॥ यस्य खड्गस्य यस्मिन् त्सरुप्रदेशे मुष्टिमध्ये (त्सरुः खड्गादिमुष्टौ स्यादित्यमरः) व्रणो भवेत्तस्य खड्गस्य तस्मिन् प्रदेशे तद्वदेव व्रणं वदेत् । अर्थान्मुष्टिमध्ये यदि व्रणो भवेत्तदा खड्गमध्येऽपि व्रणं वदेद्यदि मुष्टिमूले तदा खड्गादौ वदेद्यद्यग्रे भवेत्तदा खड्गाग्रे व्रणं वदेत् वनितानामिव स्त्रीणामिव मुखे तिलकं चिह्नविशेषं दृष्ट्वा गुह्ये गुह्यस्थाने वाच्यः कथनीयो भवतीति ॥ ९ ॥

अथान्यद्विशेषं वक्ति ।

अथवा स्पृशति यदङ्गं पृष्टा निस्त्रिंशभृत्तदवधार्य ।
कोशस्थस्यादेश्यो व्रणोऽसि शास्त्रं विदित्वेदम् १०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथवेति ॥ अथवा पक्षान्तरे निस्त्रिंशभृत् प्रष्टा खड्गधारकः प्रच्छको यदङ्गं स्पृशति तदवधार्य तद्विचिन्त्य । इदं वक्ष्यमाणमसिशास्त्रं खड्गविद्यां विदित्वा ज्ञात्वा कोशस्थस्य खड्गस्य व्रण आदेश्यः कथनीय इति ॥ १० ॥

अथातो मस्तकाद्यङ्गस्पर्शवशेन खड्गस्थचिह्नान्याह पञ्चभिः पद्यैः ।

शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे । भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च ११

शिरसि स्पृष्ट इति ॥ शिरसि मस्तके स्पृष्टे स्पर्शे कृते सति प्रथमेऽङ्गुले खड्गमूलात्प्रथमाऽङ्गुलावधिर्व्रण आदेश्यो ललाटस्पर्शे द्वितीयेऽङ्गुले मूलादित्यादेश्यः । भ्रूमध्ये च स्पृष्टे तृतीयेऽङ्गुले व्रण आदेश्यः । नेत्रे स्पर्शे च चतुर्थेऽङ्गुले व्रणआदेश्य इति ॥ ११ ॥

नासौष्ठकपोलहनुश्रवणग्रीवांशकेषु पञ्चाद्याः ।
उरसि द्वादशसंस्थः त्रयोदशे कक्षयोर्ज्ञेयः ॥ १२ ॥

नासौष्ठकपोलहनुश्रवणग्रीवांशकेष्विति ॥ नासौष्ठकपोलहनुश्रवणग्रीवांशकेष्वंगेषु स्पर्शेषु क्रमात्पञ्चाद्याः ५ । ६ । ७ । ८ । ९ । १० । ११ खड्गांगुलप्रदेशजाव्रणा आदेश्याः । उरसि वक्षसि स्पर्शे द्वादशसंस्थो व्रण आदेश्यः । कक्षयोः स्पर्शयोस्त्रयोदशेऽङ्गुले व्रणो ज्ञेय इति ॥ १२ ॥

स्तनहृदयोदरकुक्षौ नाभौ च चतुर्दशादयो ज्ञेयाः ।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः स्यात् १३॥

स्तनहृदयोदरकुक्षाविति ॥ स्तनहृदयोदरकुक्षौ नाभौ च चतु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्देशादयो ज्ञेयाः क्रमेण १४ । १५ । १६ । १७ । १८ ॥ नाभी-मूले कट्यां गुह्ये चैकोनविंशतितो व्रणा वाच्याः क्रमेण १९ । २० २१ ॥ १३ ॥

ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे ।
जानुनि च चतुर्विंशे जंघायां पञ्चविंशे स्यात् ॥१४॥

ऊर्वोरिति ॥ ऊर्वोर्द्वाविंशेऽगुले व्रणो वाच्यः । ऊर्वोर्मध्ये ऊरुमध्यभागे स्पर्शने त्रयोविंशेऽगुले जानुनि चतुर्विंशेऽगुले व्रणो वाच्यो जंघायाञ्च स्पर्शे पञ्चविंशे व्रणः स्यादिति ॥ १४ ॥

जंघामध्ये गुल्फे पार्ष्ण्यां पादे तथांगुलीष्वपि च ।
षड्विंशादिषु यावत्त्रिंशदिति मतेन गर्गस्य ॥१५॥

जंघामध्येति ॥ जंघामध्ये जंघयोर्मध्यभागस्पर्शे षड्विंशे व्रणो वाच्यः । गुल्फे स्पर्शे सप्तविंशे व्रणो वाच्यः । पार्ष्ण्यां स्पर्शेऽष्टविंशेऽगुले व्रणो वाच्यः । पादे स्पर्शे एकोनत्रिंशे व्रणो वाच्यस्तथांगुलीष्वपि च स्पर्शेषु त्रिंशेऽगुले व्रणो वाच्य एवं षड्विंशाद्यावत्त्रिंशदङ्गुलावधिरिति गर्गस्य गर्गाचार्य्यस्य मतेनेति ॥ १५ ॥

अथैषां फलान्याह चतुर्भिः ।

पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च वधश्च ।
एकाद्यंगुलसंस्थैर्व्रणैः फलं निर्दिशेत्क्रमशः ॥ १६ ॥

पुत्रमरणमिति ॥ एकाद्यंगुलसंस्थैर्व्रणैः क्रमशः पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च लक्ष्म्यश्च वधश्चेति फलंनिर्दिशेत्कथयेत् पञ्चांगुलं यावदिति ॥ १६ ॥

सुतलाभः कलहो हस्तिलयः पुत्रमरणधनलाभौ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति १७

सुतलाभ इति ॥ सुतलाभः कलहो हस्तिलयो गजनाशः पुत्रमरणधनलाभौ विनाशवनिताप्तिचित्तदुःखानि क्रमशः षट्प्रभृति षडङ्गुलमारभ्य त्रयोदशाङ्गुलावधि फलानि कथयेदिति ॥ १७ ॥

लब्धिर्हानिस्त्रीलयो वधो वृद्धिमरणपरितोषाः ।
ज्ञेयाश्च चतुर्दशादिषु धनहानिश्चैकविंशे स्यात् १८

लब्धिरिति ॥ लब्धिरर्थलाभश्चतुर्दशेऽङ्गुले हानिरर्थनाशः । पञ्चदशेऽङ्गुले स्त्रीलयः स्त्री विनाशः । षोडशे बधो मरणम् । सप्तदशे वृद्धिरर्थादीनामष्टादशे मरणमेकोनविंशे परितोषश्चित्ततुष्टिर्विंशे । एवं चतुर्दशांगुलादिष्वंगुलेषु ज्ञेयाः । एकविंशे धनहानिर्विसनाशः स्याद् भवतीति ॥ १८ ॥

वित्ताप्तिरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम् ।
ऐश्वर्यमृत्युराज्यानि च क्रमात्त्रिंशदिति यावत् १९

वित्ताप्तिरिति ॥ वित्ताप्तिर्धनागमो द्वाविंशे । अनिर्वाणं मृत्युस्त्रयोविंशे । धनागमो वित्तलाभश्चतुर्विंशे । मृत्युर्मरणं पञ्चविंशे । सम्पदो लक्ष्म्यः षड्विंशे । अस्वत्वं निर्धनत्वं सप्तविंशे । ऐश्वर्यमष्टविंशे । मृत्युर्मरणमेकोनत्रिंशे । राज्यं त्रिंशे एवमनेन विधिना क्रमात् क्रमशस्त्रिंशदिति त्रिंशत्पर्यन्तं फलानि वाच्यानीति ॥१९॥

अथ विशेषमाह ।

परतो न विशेषफलं विषमसमस्थाश्च पापशुभफलदाः । कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत् ॥ २० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परतो न विशेषफलमिति ॥ अतोऽस्मात्रिंशत्परतो विशेषफलं न भवति । विषमसमस्थाश्च विषमसमांगुलस्थाश्च पापशुभफलदा भवन्ति क्रमेण विषमे पापफलदाः समे शुभफलदा इति । त्रिंशत्परतोऽग्रं खड्गाग्रं यावदिति कैश्चिदाचार्यैरफला निष्फलाःप्रादिष्टाः कथिता इति ॥ २० ॥

अथ युग्मेन गन्धजफलमाह ।

करवीरोत्पलगजमदघृतकुंकुमकुन्दचम्पकसुगन्धिः ।
शुभदो गोमूत्रहरितालपङ्कमेदसदृशगन्धिः ॥ २१ ॥
कूर्मवसाऽस्टक्क्षारोपमश्च भयदुःखदो भवति गन्धः ।
वैडूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ॥ २२ ॥

करवीरोत्पलगजमदघृतकुंकुमकुन्दचम्पकसुगन्धिरिति ॥ करवीरोत्पलगजमदघृतकुंकुमकुन्दचम्पकसुगन्धिः । करवीरपुष्पम् उत्पलं नीलोत्पलम् । गजमदो हस्तिमदः । घृतं सुप्रसिद्धम् । कुंकुमं प्रसिद्धम् । कुन्दं माध्यं पुष्पम् । चम्पकं पुष्पविशेषः । एषां सुगन्धिः सदृशगन्धः । खड्गः शुभदः शुभफलदो भवति गोमूत्रहरितालपङ्कमेदसदृशगन्धोऽशुभदो भवति । गोमूत्रं प्रसिद्धम् । हरितालः प्रसिद्धः । पङ्कः कर्दमः । मेदो मांसजन्यस्नेहः । एषां समान गन्धोऽशुभद इति ॥ २१ ॥

कूर्मवसाऽस्टक्क्षारोपमश्चेति ॥ कूर्मः कच्छपः वसा मज्जाऽस्टग्रक्तम् । क्षारं लवणम् । एतेषामुपमायस्य स तत्सदृशगन्धश्च भयदुःखदो भवति । वैडूर्यकनकविद्युत्प्रभः खड्गः । वैडूर्यो मणिविशेषः । कनकं सुवर्णम् । विद्युत्तडित् । एषां सदृशप्रभस्तुल्यकान्तिर्जयारोग्यवृद्धिकरो भवति । जयं विजयम् । आरोग्यं शरीरारोग्यम् । वृद्धिं च करोति ॥ २२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथातः कामनाभेदेन विविधशस्त्रपानं वक्ति ।

इदमौशनसञ्च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्ताम् । हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षयमिच्छतश्चवित्तम् ॥ २३ ॥

इदमौशनसञ्चेति ॥ इदं वक्ष्यमाणं शस्त्रपानमौशनसमुशनसा शुक्रेण प्रोक्तम् । प्रदीप्तामुत्कृष्टां श्रियं लक्ष्मीमिच्छतो याचयतो रुधिरेण रक्तेन पानम् । गुणवत्सुताभिलिप्सोर्गुणिपुत्राभिलाषिणो हविषा घृतेन । अक्षयं नाशरहितं वित्तं धनमिच्छतश्च पुंसः सलिलेन जलेन पानमिति ॥ २३ ॥

वडवोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिः । झषपित्तमृगाश्ववस्तदुग्धैः करिहस्तच्छिदये सतालगर्भैः ॥ २४ ॥

वडवोष्ट्रकरेणुदुग्धपानमिति ॥ यदि पापेन वधादिनार्थसिद्धिं समीहतेऽभिलषति तदा वडवोष्ट्रकरेणुदुग्धपानम् । वडवा अश्वतरी । उष्ट्रा करभी करेणुर्हस्तिनी एतासां दुग्धैः पानं खड्गपानं विधेयम् करिहस्तच्छिदये हस्तिकरच्छेदनाय झषपित्तमृगाश्ववस्तदुग्धैर्मत्स्यपित्तहरिणघोटकजक्षीरैः किम्भूतैः सतालगर्भैस्तालो वृक्षस्तस्य गर्भो निर्यासस्तैरिति पानं विधेयम् ॥ २४ ॥

अर्के पयो हुडविषाणमषीसमेतं
पारावताखुशकृता च युतं प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥ २५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आर्कमिति ॥ आर्कमर्कस्य मन्दारस्येदं पयो दुग्धं किं विशिष्टं हुडविषाणमषीसमेतम् । हुडो मेषस्तस्य विषाणं शृङ्गं तस्य मेष- शृंगस्य मषी भस्म तेन सहितं कार्यम् । अपि च पारावताखुश- कृता च कपोतमूषकाविष्टया च युतं मिलितं प्रलेपो देय इति कस्य तैलमथितस्य तिलतैलमर्दितस्य शस्त्रस्य ततस्तदनन्तरमस्य तैलमथितस्य प्रलेपलेपितस्य शस्त्रस्य पानं कथितं यथायोग्यं विधेयं पश्चात्ततश्चाच्छितस्य शाणोद्धूतस्य शिलासु पूस्तरेषु विघातो न भवेत् ॥ २५ ॥

अथाध्यायोपसंहारे विशेषमाह ।

क्षारे कदल्या मथितेन युक्ते-
दिनोषिते पायितमायसं यत् ।
सम्यक्छितं चाश्मनि नैति भङ्गं
नचान्यलौहेष्वपि तस्य कौण्ठ्यम् ॥ २६ ॥

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायां
खड्गलक्षणाध्यायो द्वादशः ॥ १२ ॥

क्षार इति ॥ मथितेन तक्रेण युक्ते कदल्या रम्भायाः क्षारे भस्मनि किम्विशिष्टे दिनोषिते एकाहोरात्रस्थापिते द्वितीयदिने अनेन पायितं पानीयकृतमायसं लौहम् । सम्यक् समीचीनरी- त्या शितञ्च साणोल्लीढं चाश्मनि पूस्तरे भंगं विनाशं नैति न प्राप्नोति तस्य शस्त्रस्य चान्यलोहेष्वपि कौण्ठ्यं कुण्ठता न स्यादिति ॥ २६ ॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां
खड्गलक्षणाध्यायो द्वादशः ॥ १२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ अथ प्रास्थानिकाध्यायो व्याख्यायते ॥

तत्रादौ प्रस्थानस्थानविधिमाह ।

अन्तःपुराद्वा स्वनिवेशनाद्वा सिंहासनादग्निपरिस्तराद्वा । कुर्यान्नरेन्द्रः प्रथमं प्रयाणं विप्रैः शताग्र्यैः कृतमङ्गलाशीः ॥ १ ॥

अन्तः पुरादिति ॥ शताग्र्यैः शताग्रगामिभिर्विप्रैर्ब्राह्मणैः कृतमङ्गलाशीः कृतशुभाशीर्वादो नरेन्द्रो राजा प्रथममादावन्तःपुरात्स्वकुलदेवतागृहाद्वा स्वनिवेशनात्स्वशयनगृहाद्वा सिंहासनाद्भद्रासनाद्वाग्निपरिस्तरादग्न्यागारात् प्रयाणं प्रस्थानं कुर्यादिति १॥

प्रयाणे मन्त्रोच्चारणमाह ।

द्विजो विष्णुक्रमाद्भूयं मन्त्रेणानेन दापयेत् ।
इदं विष्णुर्विचक्रम इत्येवं पादमुद्धरेत् ॥२॥

स्पष्टार्थमिदम् मन्त्रौ प्रसिद्धौ ॥ २ ॥

अथ मङ्गलदर्शनस्पर्शनश्रवणपूर्वकविशेषमाह ।

अमुकस्य वधायेति दक्षिणं क्षितिपो न्यसेत् ।
मङ्गलानि ततः पश्यन्स्पृशन् शृण्वन्नृपो व्रजेत् ॥३॥

अमुकस्येति ॥ अमुकस्यामुकनाम्नः शत्रोर्वधायेति नाशायेति निश्चित्य दक्षिणं चरणं क्षितिपो राजा न्यसेद्भूमाविति । ततस्तदनन्तरं मङ्गलानि शुभसूचकवस्तूनि पश्यन्विलोकयन् वा स्पृशन् शृण्वन् नृपो राजा व्रजेद्गच्छेदिति ॥ ३ ॥

अथ मङ्गलान्याह ।

वेदाङ्गवेदध्वनिशङ्खभेरीमृदङ्गपुण्याहपुराणशब्दाः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

धर्मार्थशास्त्राणि च भारतं च रामयणं मङ्गलकीर्तनानि

वेदाङ्गवेदध्वनिशङ्खभेरीमृदङ्गपुण्याहपुण्णशब्दा इति ॥ वेदाङ्गम् शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषामयनं छन्द इति श्रुत्यङ्गम्। वेदाश्चत्वारः श्रुतयः। एतेषां ध्वनिः शब्दः शङ्खः प्रसिद्धः भेरी दुन्दुभिः मृदङ्गो मुरजः। पुण्याहः पुण्याहवाचनम्। पुराणं वेदव्यासरचितं मत्स्यमार्कण्डेयाद्यष्टादश एतेषां शब्दाः धर्मार्थशास्त्राणिच। मनुस्मृत्यादीनि च भारतं च कौरवपाण्डव-कथेतिहासाख्यं च रामायणं श्रीरामचरितं वाल्मीक्यादि मङ्गल-कीर्तनानि शुभकथनानीति ॥ ४ ॥

पुनर्मंगलान्याह।

वाचः शुभाः सारसचाषबर्हिणः कादम्बहंसाश्च सजीवजीवकाः। काकश्च पङ्काक्तवराहपृष्ठगः श्री वृक्षवालव्यजनानि चन्दनम् ॥ ५ ॥

वाच इति ॥ शुभा मांगालिका वाचोगिरः। सारसचाषब-र्हिणः। सारसः पुष्कराह्वः (पुष्कराह्वस्तु सारस इत्यमरः) चाषः किकीदिविर्वा नीलकण्ठः (अथ चाषः किकीदिविरित्यमरः) बर्ही मयूरः। कादम्बहंसाश्च कलहंसाश्च (कादम्बः कलहंसः स्यादित्यमरः) सजीवजीवकाश्चकोराः काकश्च प्रसिद्धएव सच पङ्काक्तवराहपृष्ठगः कर्दमाश्लिष्टशूकरपृष्ठनिष्ठः। श्रीवृक्षवा-लव्यजनानि बिल्ववृक्षचामराणि चन्दनं श्रीखण्डादि ॥ ५ ॥

पुनर्मंगलान्याह।

गौर्वत्सलाऽजो रुचकः प्रियङ्गुर्लाजा नृयुक्तश्च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रथः पताका । सर्वौषधी स्वस्तिकपूर्णपात्राण्य-
श्वोऽथ दूर्वार्द्रकगोमयञ्च ॥ ६ ॥

गौरिति ॥ गौर्वत्सला सवत्सा गौः । अजश्छागो रुचको बीजपुरः (लोके नेंबू) प्रियंगुः फलिनी लाजा प्रसिद्धा नृयुक्तो मनुष्यसहितो रथः । पताका वैजयन्ती । सर्वौषधी (कुष्ठं मांसी हरिद्रे मुराशैलेयचन्दनम् वचा चम्पक मुस्ताच सर्वौषध्यो दशैवहि) स्वस्तिकपूर्णपात्राणि सर्वतोभद्रपूरितभाजनानि । अश्वो घोटकः । अथ दूर्वाऽऽर्द्रकगोमयं च तात्कालिक-गोमयं चेति ॥ ६ ॥

पुनर्मंगलान्याह ।

सरांस्यशोष्याणि सरित्समुद्रा रुद्रेन्द्रलोकेशमही-
ध्रनागाः । दिशो ग्रहर्क्षाणि शिवः सुपर्णः स्कन्दो
विशाखो मरुतश्च साध्याः ॥ ७ ॥

सरांसीति ॥ सरांस्यशोष्याणि अशुष्कसरांसि सरित्समुद्रा रुद्रेन्द्रलोकेशमहीध्रनागाः शिवशक्रविष्णुपर्वतगजाः दिशः पूर्वादयो ग्रहर्क्षाणि ग्रहनक्षत्राणि शिवः कल्याणदः सुपर्णो गरुडः स्कन्दः कार्त्तिकेयः किम्विशिष्टो विशाखो मरुतश्च वायवश्च साध्याः देवविशेषा इति ॥ ७ ॥

अथाशीराशयः ।

मूर्द्धादशार्का वसवोऽश्विनौ च स्वाहा शची मातृ-
गणो भवानी । पत्न्यो जनन्यश्च सुरासुराणां
साध्योगणाश्चाप्सरसः सविद्याः ॥ ८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भूरिति ॥ भूः पृथ्वी द्वादशार्का द्वादशादित्याः वसवोऽष्टौ अश्विनौ च नासत्यौ च स्वाहा देवी शचीन्द्राणी मातृगणो गौरी पद्मत्यादिका भवानी पार्वती । सुरासुराणां देवदैत्यानां पत्न्यः स्त्रियो जनन्यश्च मातरश्च साध्यागणाश्चाप्सरसः सविद्याः सहितविद्याधरा इति ॥ ८ ॥

पुनराप्याशीराशीनाह ।

यक्षाः ससिद्धा मुनयः सजायाः पर्जन्यकल्पद्रुम-
मारुताश्च । प्रजापतिः सर्वगतश्च विष्णुः शिवाय
ते भूप भवन्तु याने ॥ ९ ॥

यक्षा इतिं ॥ यक्षा यक्षोगणाः । ससिद्धाः सिद्धसहिताः । मुनयो मरीच्यत्रिमुखाः सप्तर्षयः सजायाः सस्त्रियः । पर्जन्यकल्पद्रुममारुताश्च मेघदेवतरु वायवश्च । प्रजापतिर्ब्रह्मा सर्वगतः सकलचराचरव्याप्तो विष्णुः हे भूप राजन् ते तव याने यात्रायां शिवाय मङ्गलाय भवन्तु ॥ ९ ॥

पुनर्मङ्गलान्याह ।

सिद्धार्थकादर्शपयोऽञ्जनानि वर्द्धैकपश्वामिष-
पूर्णकुम्भाः । उश्नीषभृङ्गारनृवर्धमानपुंयानवी-
णातपवारणानि ॥ १० ॥

सिद्धार्थकादर्शपयोञ्जनानीति ॥ सिद्धार्थकादर्शपयोञ्जनानि । सर्षपदर्पणजलसौवीराञ्जनानि । वर्द्धैकपश्वामिषपूर्णकुम्भाः प्रसिद्धाः । उश्नीषभृंगारनृवर्धमानपुंयानवीणातपवारणानि शिरोवेष्टनसुवर्णरचितपात्रविशेषपुत्रकलत्रान्वितपुरुषनृयानविपञ्चिच्छत्राणीति ॥ १० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्मङ्गलान्याह ।

दधि मधु घृत रोचना कुमारी ध्वजकनकाम्बुज-
भद्रपीठशङ्खाः । सित वृषकुसुमाम्बराणि मीन-
द्विजगणिकाप्तजनाश्च चारुवेषाः ॥११॥

दधीति ॥ दधि मधु घृत रोचना कुमारी ध्वजकमकाम्बुज भद्रपीठशङ्खाः प्रसिद्धा एव । सितवृषकुसुमाम्बराणि शुक्लोक्षपुष्पवस्त्राणि मीनद्विजगणिकाप्तजनाश्च मत्स्यब्राह्मणवेश्याशिष्टनराश्च चारुवेषाः सुन्दराकृतयः ॥ ११ ॥

पुनर्मङ्गलान्तराण्याह ।

ज्वलितशिखिफलाक्षतेक्षुभक्ष्या द्विरदमृदङ्कु-
शचामरायुधानि । मरकतकुरुविन्दपद्मरागाः
स्फटिकमणिप्रमुखाश्च रत्नभेदाः ॥१२॥

ज्वलितशिखिफलाक्षतेक्षुभक्ष्या इति ॥ ज्वलितशिखिः प्रज्वलिताग्निः । फलमाम्रादि अक्षतेक्षुरखणितेक्षुः भक्ष्या भक्ष्यपदार्थाः द्विरदो हस्ती मृन्मृत्तिका अङ्कुशो गजवाहकशस्त्रविशेषश्चामरो वालव्यजनमायुधमस्त्रमेतानि । मरकतकुरुविन्दपद्मरागा मणयः स्फटिकमणिप्रमुखाश्च स्फटिकमण्यादयश्च रत्नभेदा रत्नानामिन्द्रनीलवज्रादीनां भेदा इति ॥१२॥

अथ कथितमाङ्गलिकवस्तुषु विशेषमाह ।

स्वयमथ रचितान्ययत्नतो वा यदि कथितानि
भवन्ति मङ्गलानि । स जयति सकलां ततो
धरित्रीं ग्रहणदृगालभनश्रुतैरुपास्य ॥१३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वयमिति ॥ यात्रासमये यदि कथितानि पूर्वोक्तानि मङ्गलानि स्वयमात्मनैक रचितानि घटितानि भवन्ति । अथवाऽयत्नतोऽनायासेन भवन्ति ततस्तदनन्तरं स ग्रहणदृगालभनश्रुतैः स्पर्शावलोकनालिङ्गनश्रवणैरुपास्योपासनं मङ्गलानां कृत्वा सकलां समग्रां धरित्रीं पृथ्वीं जयति स्वायत्तीकरोति ॥१३॥

अथामङ्गलान्याह ।

कार्पासौषधकृष्णधान्यलवणक्लीबास्थितैलं वसा
पङ्काङ्गारगुड़ाहिचर्मशकृतः केशायसव्याधिताः ।
वान्तोन्मत्तजड़ेन्धनतृणतुषक्षुत्क्षामतक्रारयो
मुण्डाभ्यक्तविमुक्तकेशपतिताःकाषायिनश्चाशुभाः

कार्पासौषधकृष्णधान्यलवणक्लीबास्थितैलमिति ॥ कार्पासौषधकृष्णधान्यलवणक्लीबास्थितैलम् । कार्पासः प्रसिद्धः । औषधं भैषज्यम् । कृष्णधान्यं तिलादि लवणं सिन्धूत्थम् । क्लीबो नपुंसकम् । अस्थि शल्यम । तैलं तिलभवं स्नेहम । वसापङ्काङ्गार गुड़ाहिचर्म्मशकृतः । वसा मांसजनितस्नेहः । पङ्कः कर्दमः । अङ्गारो दग्धकाष्ठम् । गुड़ः प्रसिद्धः । अहिः सर्पः । चर्म प्रसिद्धम् । शकृद्विष्ठा । केशायसव्याधिताः केशो वालः । आयसो लोहः । व्याधितो रोगी । वान्तोन्मत्तजड़ेन्धनतृणतुषक्षुत्क्षामतक्रारयः । वान्तो वमनम् । उन्मत्तो वर्वरः । जड़ोऽत्यन्तमूढः । यदुक्तम् । इष्टं वाऽनिष्टंवा सुखदुःखे वानचेह यो मोहात् । विन्दति परवशगः स भवेदिह जड़संज्ञकः पुरुष इति ॥ इन्धनं काष्ठम् । तृणं घासः । तुषो धान्यादित्वक् । क्षुत्क्षामो बुभुक्षया कृशः । तक्रं प्रसिद्धम् । अरयः शत्रवः मुण्डाभ्यक्तविमुक्तकेशपतिताः । मुण्डो मुण्डितो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वपितः । अभ्यक्तोऽभ्यञ्जनम् । विमुक्तकेशोऽबद्धकेशः । पतितो जात्यादिभ्रष्टः । काषायिनश्च काषायवस्त्रधारिणश्चैतेऽशुभा अशुभफलदा भवन्तीति ॥१४॥

अथ विशेषमार्गं कथयति ।

पटुपटहमृदङ्गशङ्खभेरीपणवरवं सपताकतोरणाग्रम् । प्रचुरकुसुमतोयशान्तरेणु सुरभिसुवेषजनं व्रजेच्च मार्गम् ॥ १५ ॥

पटुपटहमृदङ्गशङ्खभेरीपणवरवमिति । पटुपटहमृदङ्ग शङ्खभेरीपणवरवं पटुभिर्वादनकुशलैः पटहमृदङ्गशङ्खभेरी पणवरवं यथा भवति । पटह आनकः । मृदङ्गो मुरजा । शङ्खः प्रसिद्धः । भेरी दुन्दुभिः । पणवो मर्दलः । एतेषां वाद्यानां रवः शब्दो यथा भवतितथा मार्गमयनं व्रजेदिति । किं विशिष्टं सपाताकतोरणाग्रं यथा भवति । प्रचुरकुसुमतोयशान्तरेणुं यथाभवति । प्रभूतपुष्पजलसमितधूलिं यथाभवति सुरभिसुवेषजनं गविस्वलङ्कृतनरमथ वा सुवासस्वाकृतिजनं यथा मार्गं भवति तथा व्रजेद्गच्छेदिति ॥ १५ ॥

अथाध्यायोपसंहारे विशेषमाह ।

यान्यत्र मङ्गलामङ्गलानि निर्गच्छतां प्रदिष्टानि । स्वप्नेष्वप्येतानि शुभाशुभानि विड्लेपनंधन्यम् १६

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायां प्रास्थानिकाध्यायस्त्रयोदशः ॥१३॥

यान्यत्रेति ॥ अत्र प्रास्थानिकाध्याये यानि मंगलामंगलानि शुभाशुभसूचकानि निर्गच्छतां गन्तॄणां प्रदिष्टानि कथितानि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वप्नेष्वपिस्वप्नावस्थास्वप्येतानि मंगलामंगलानि भवन्ति किञ्च विड्लेपनं विष्ठानुलेपनं स्वप्नेऽन्यमति शुभफलदं भवतीति १६

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां प्रास्थानिकाध्यायस्त्रयोदशः ॥ १३ ॥

अथ शकुनाध्यायो व्याख्यायते ॥ तत्रादौ वामभागे सुशकुनान्याह ।

छुछुन्दरी शूकरिका शिवा च-
श्यामा रला पिङ्गलिकाऽन्यपुष्टा ।
वामा प्रशस्ता गृहगोधिका च
पुंसंज्ञका ये च पतत्त्रिणः स्युः ॥ १ ॥

छुछुन्दरीति ॥ छुछुन्दरीति प्रसिद्धा । शूकरिकाऽपि प्रसिद्धा शिवा शृगालिनी श्यामा पक्षिविशेषः । रलाऽपि पक्षी पिंगालिका पक्षी अन्यपुष्टा कोकिला । इति वामा वामभागगा प्रशस्ता भवति याने गृहगोधिका च मुसली च वामा प्रशस्ता पुंसंज्ञकाः पुरुषसंज्ञकाश्च ये पतत्त्रिणः पक्षिणः स्युस्तेऽपि वामे प्रशस्ता भवन्ति १

अथ दक्षिणभागे सुशकुनान्याह ।

श्येनो रुरुः पूर्णकुटः कपिश्च
श्रीकर्णछिक्कारकपिप्पिकाऽजाः ।
स्त्रीसंज्ञिता ये च शिखिद्विपौ च
याने हिता दक्षिणभागसंस्थाः ॥ २ ॥

श्येन इति ॥ श्येनः पत्री (लोकेबाजइति) रुरुर्मृगविशेषः पूर्णकुटः (लोके कराहिका) कपिश्च वानरश्च श्रीकर्णछिकार-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कपिञ्चिकाऽजाः श्रीकर्णः पक्षिविशेषः छिक्कारको मृगजातिः पिप्पिका पक्षिविशेषोऽजश्छागः स्त्रीसंज्ञका ये च पक्षिणश्च शिखिद्विपौ च मयूरनागौ च एते याने यात्रायां दक्षिणभागसंस्थाहिताः शुभदा भवन्तीति ॥ २ ॥

अथ वामदक्षिणभागस्थशकुनान्याह ।

आस्फोटिताक्ष्वेडितशङ्खतूर्य-
पुण्याहवेदध्वनिगीतशब्दाः ।
वामाः प्रयाणे शुभदा नराणा-
माक्रन्दितं दक्षिणतः परेषाम् ॥३॥

आस्फोटिताक्ष्वेडितशङ्खतूर्य पुण्याहवेदध्वनिगीतशब्दा इति ॥ आस्फोटिताक्ष्वेडितशङ्खतूर्य्यपुण्याहवेदध्वनिगीतशब्दाः। अत्रास्फोटिता बाह्वोः परस्परहस्तेन ताडनम् । क्ष्वेडितं हस्तिचीत्कारः । शङ्खः प्रसिद्धः । तूर्याख्यो मुखवाद्यः पुण्याहरः पुण्याहवाचनम् । वेदः प्रसिद्धः । एतेषां ध्वनिः शब्दः । गीतशब्दाः गानशब्दाः । वामा वामभागगाः । नराणां प्रयाणे गमने शुभदाः शुभफलदा भवन्ति परेषामितरेषामाक्रन्दितं शब्दितं दक्षिणतो दक्षिणभागतः शुभो भवतीति ॥ ३ ॥

अथ विशेषमाह ।

भारद्वाज्यजबर्हिचाषनकुलाः सङ्कीर्तनाद्दर्शनात्
क्रोशन्तश्च शुभप्रदा न सरटो दृष्टः शिवाय क्वचित् ।
गोधाशूकरजाहकाऽहिशशकाः पापा रुतालोकने
धन्यं कीर्त्तनमृच्छवानरफलं तद्व्यत्ययाच्छोभनम् ४॥

भारद्वाज्यजबर्हिचाषनकुला इति ॥ भारद्वाज्यजबर्हिचा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पनकुक्काः भारद्वाजी पाक्षिणीति। अजश्छागः। बर्ही मयूरः। चाषो नीलकण्ठः। नकुलः प्रसिद्धः। एते सङ्कीर्त्तनात्सङ्कथनाद्दर्शनाद्दृग्गोचरात्क्रोशन्तश्च शब्दयन्तश्च शुभप्रदा भवंतीति। सरटः कुकलासो दृष्टो दृग्गोचरश्चेत्कचिच्छिवाय शुभफलार्थं न भवति। गोधाशूकरजाहकाऽहिशशका गोधा जलजीवविशेषः (लोकेगोहि। शूकरः प्रसिद्धः। जाहको गात्रसङ्कोची प्राणिविशेषः (लोके जोंक इति) अहिः सर्पः। शशकः प्रसिद्धः। एते रुतालोकने शब्ददर्शने पापाः पापफलदा भवन्ति। एतेषां कीर्त्तनं नामकथनं धन्यं सुशुभमिति। ऋक्षवानरफलं भल्लूककपिफलं तद्व्यत्ययात्पूर्वविपरीताच्छोभनमर्थाच्छब्ददर्शने शुभमिति ॥ ४ ॥

अथ पुनर्विशेषमाह।

नकुलस्य मृगस्य पक्षिणां वामाद्दक्षिणभागसेवनम्। शुभदं श्वशृगालयोरिदं व्यत्यासेन फलं प्रशस्यते ॥ ५ ॥

नकुलस्येति ॥ नकुलस्य मृगस्य पक्षिणां वामाद् वामभागाद्दक्षिणसेवनं दक्षिणभागगमनं शुभदं भवति। श्वशृगालयोःकुक्कुरशिवयोरिदं व्यत्यासेनार्थाद्दक्षिणाद्वामभागगमनं फलं प्रशस्यतेति५

अथ समयभेदेनाह।

चाषो नकुलश्च वामगौ दिवसार्धात्परतः शुभप्रदौ। मृगवच्च वनेषु कुक्कुराः शतपत्रोऽस्तमये च दक्षिणः ॥ ६ ॥

चाष इति ॥ चाषो नीलकण्ठः। नकुलः प्रसिद्धः एतौ वामगौ वामभागगतौ दिवसार्धान्मध्याह्नात्परतः शुभप्रदौ भवतः। वनेषु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वनगमनेषु कुक्कुराः श्वानो मृगवद्भवन्ति। शतपत्रो दार्वाघाटपक्षी अस्तमये सायंकाले दक्षिणः शुभो भवति ॥ ६ ॥

अथ कार्यभिन्नवशेनाह ।

नष्टावलोकनसमागमयुद्धकर्म-
वेश्मप्रवेशमनुजेश्वरदर्शनेषु ।
यानप्रतीपविधिना शुभदा भवन्ति
केचिज्जगुर्गमनवन्नृपदर्शनेषु ॥ ७ ॥

नष्टावलोकनसमागमयुद्धकर्मवेश्मप्रवेशमनुजेश्वरदर्शने-ष्विति ॥ नष्टावलोकनसमागमयुद्धकर्मवेश्मप्रवेशमनुजेश्वरदर्शनेषु नष्टवस्तुनोऽवलोकनमन्वेषणम् । समागमो बन्ध्वादिमेलनम् । युद्ध-कर्म प्रसिद्धम् । वेश्मप्रवेशो गृहप्रवेशः । मनुजेश्वरदर्शनं राज्ञो दर्शनम् । एते यानप्रतीपविधिना यात्रोक्तविलोमविधानेन शुभदा भवन्ति केचिदाचार्या नृपदर्शनेषु राजावलोकनेषु गमनवद्यात्रा-वज्जगुराहुरिति ॥ ७ ॥

अथ कुशकुने विशेषमाह ।

निरुपहतमनोज्ञवृक्षसंस्थाः
शुचिरुचिरावनिसस्यसंस्थिताश्च ।
शुभतिथिदिवसर्क्षलग्नकाले
ष्वशुभफलोऽपि शुभप्रदः प्रदिष्टः ॥ ८ ॥

निरुपहतमनोज्ञवृक्षसंस्था इति ॥ यात्रासमये निरुपहतमनोज्ञवृक्षसंस्था अखण्डमनोहरवृक्षसंस्था यदि भवन्ति शुचिरुचिरावनि-सस्यसंस्थिताश्च पवित्रसुन्दरभूमौधान्यसंस्थिताश्च यदि भवन्ति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुभतिथिदिवसर्क्षलग्नकालेषु सुतिथिवारनक्षत्रोदयसमयेष्वशुभ-फलोऽप्यनेष्टफलदायकोऽपि शुभप्रदः शुभफलदायकः प्रदिष्टः कथितः शकुन इति ॥ ८ ॥

अथ सुशकुने विशेषमाह ।

प्रभग्नशुष्कद्रुमकण्टकेषु
श्मशानभस्मास्थितुषाकुलेषु ।
प्राकारशून्यालयदुर्दृशेषु
सौम्योऽपि पापः शकुनः प्रदिष्टः ॥ ९ ॥

प्रभग्नशुष्कद्रुमकण्टकेष्विति ॥ प्रभग्नशुष्कद्रुमकण्टकेषु । अतिखण्डितनीरसतरुकण्टकेषु । श्मशानभस्मास्थितुषाकुलेषु । प्राकारशून्यालयदुर्दृशेषु यष्टिकण्टकादिरचितवेष्टनरिक्तगृहदुर्दृशेषु । सौम्योऽपि शुभोऽपि शकुनः पापोऽशुभः प्रदिष्टः कथित इति ॥ ९ ॥

अथाङ्गारदीप्तधूमितशान्तदिश आह ।

अङ्गारिणी दिग्रविणा प्रमुक्ता
यस्यां रविस्तिष्ठति सा प्रदीप्ता ।
प्रधूमिता यास्यति यां दिनेशः
शेषाश्च शान्ताः शुभदाश्च ताः स्युः ॥१०॥

अङ्गारिणीति॥ रविणा सूर्येण प्रमुक्ता त्यक्ता दिक् काष्ठा अङ्गारिणी कथ्यते । यस्यां दिशि रविस्तिष्ठति सा प्रदीप्ता दिगस्ति । यां दिशं दिनेशः सूर्यो यास्यति गमिष्यति सा प्रधूमितास्ति । शेषाश्च कथितेतराश्च शान्ताः कथिताः शुभदाश्च शुभफलदाश्च ता दिशः स्युरिति ॥ १० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ विशेषमाह ।

यातं मुक्तायां साम्प्रतं दीपितायामेष्यं ज्ञेयं धूमितायामनिष्टम् ।
शान्तास्वेवं दिक्षु तत्पञ्चमासु
प्रत्यासन्नं शेषयोः शान्तदीप्तम् ॥ ११ ॥

यातमिति ॥ मुक्तायां मुक्ताख्यदिशायामनिष्टमशुभं फलं यातमतीतं ज्ञेयम् । दीपितायां प्रदीप्तायामिति मनिष्टं फलं साम्प्रतं वर्त्तमानं ज्ञेयम् । धूमितायां प्रधूमिताख्यदिशायामनिष्टं फलमेष्यं भावि ज्ञेयम् । ताभ्योऽङ्गारिण्यादिभ्यः पञ्चमास्तत्पञ्चमासु शान्तासु शान्ताख्यासु दिक्षु एवं गतवर्त्तमानभावि फलं ज्ञेयम् शुभमिति शेषः । शेषयोर्द्वयोर्दिशोः प्रत्यासन्नं निकटवर्त्ति शान्तदीप्तं फलं ज्ञेयम् । एतदुक्तं भवति यस्यां या दिक् प्रत्यासन्ना निकटवर्त्तिनी तस्यां तथादीप्तायां यत्फलं तत्तस्यामेव वाच्यमिति । ते दिशौ भागद्वयेन परिकल्प्य निश्चयः कार्य इति ज्ञेयम् ॥ ११ ॥

अथान्यं विशेषमाह ।

पिशिताशुचिभोजनः प्रदीप्त-
स्तृणफलभुक् च निसर्गतः प्रशान्तः ।
उभयः कथितस्तथान्नभोजी
दिक्स्थानोदयकालतश्च चिन्त्याः ॥ १२ ॥

पिशिताशुचिभोजन इति ॥ पिशिताशुचिभोजनः पिशितंमांसमशुचिर्विष्टादि समश्नातीति । शकुनः प्रदीप्तो रौद्रसंज्ञः स्यात् निसर्गतः स्वभावतः । तृणफलाभुक् प्रशान्तः शुभफलप्रद इति ज्ञेयः । तथाऽन्नभोजी उभयो मिश्रः कथित उक्तः । एते शकुना दिक्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्थानोदयकालतश्चिन्त्याः । दिक् अंगारिण्यादिः । स्थानं देशः । उदयकाल उदयमारभ्येति । एतेभ्यो दिग्देशकालेभ्यः शकुना विचारणीया इति ॥ १२ ॥

अथैते सदसत्फलचिन्तका न भवेयुरित्याह ।

द्वन्द्वार्त्तरोगार्दितभीतमत्त-
वैरार्त्तयुद्धामिषकाङ्क्षिणश्च ।
सीमान्तनद्यन्तरिताश्च सर्वे
न चिन्तनीयाः सदसत्फलेषु ॥१३॥

द्वन्द्वार्तरोगार्दितभीतमत्तवैरार्त्तयुद्धामिषकाङ्क्षिणश्चेति । द्वन्द्वार्तरोगार्दितभीतमत्तवैरार्तयुद्धामिषकाङ्क्षिणश्च द्वन्द्वार्त्तो युद्धेनार्त्तः पीडितः । रोगार्दितो व्याधिपीडितः । भीतस्त्रस्तः । मत्तो विक्षिप्तः वैरार्त्तः शत्रुपीडितः । समरामिषाभिलाषिणः । सीमान्तनद्यन्तरिताश्च देशान्तद्यन्तसरिदन्तरिताश्चेति । सर्वे सदसत्फलेषु शुभाशुभफलेषु न चिन्तनीया न विचारणीयाः ॥१३॥

अथ शून्योऽपिघटःशुभोभवतीति जनभेदेऽप्यतीवचेत्याह ।

रिक्तोऽनुकूलः कलशो जलार्थ-
मभ्युद्यतः सिद्धिकरः प्रयाणे ।
विद्यार्थिनां चौर्यसमुद्यतानां
वणिक्क्रियाभ्युद्यमिनामतीव ॥ १४ ॥

रिक्तोऽनुकूल इति ॥ प्रयाणे गमने रिक्तः शून्यः कलशो घटो जलार्थमभ्युद्यतः सिद्धिकरो भवति । विद्यार्थिनां छात्राणां चौर्यसमुद्यतानां चौरकर्मसमुत्सुकानां वणिक्क्रियाभ्युद्यमिनां वैश्यकर्मोत्सुकानामतीवातिशयेन सिद्धिकरःकार्य्यसाधनकरो भव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तात्पर्यार्थः तथा भूद्यमिनामिति पाठे क्षेत्रवृत्तीनामिति ॥१४॥

अथ दिवासञ्चारिण आह ।

श्यामाश्येनशशघ्नवञ्जुलशिखिश्रीकर्णचक्राह्वया-
श्चाषाण्डीरकखञ्जरीटकशुकाः ध्वाङ्क्षःकपोतास्त्रयः ।
भारद्वाजकुलालकुक्कुटखरा हारीतगृध्रौ कपि-
स्फेटौ कुक्कुरपूर्णकूटचटकाश्चोक्ता दिवा सञ्चराः १५

श्यामाश्येनशशघ्नवञ्जुलशिखिश्रीकर्णचक्राह्वया इति ॥

श्यामाश्येनशशघ्नवञ्जुलशिखिश्रीकर्णचक्राह्वयाः श्यामा पक्षी । श्येनः पत्री शशघ्नः कुक्कुरः । वञ्जुलः पक्षिविशेषः शिखी मयूरः श्रीकर्णः पक्षिविशेषः चक्राह्वयः चक्रवाकः । चाषाण्डीरकखञ्जरीटकशुकाः चाषो नीलकण्ठः अण्डरीकः पक्षिविशेषः । खञ्जरीटकः खञ्जनः । शुकः प्रसिद्धः । ध्वाङ्क्षः काकः । कपोतास्त्रयः त्रिविधाः पारावताः । भारद्वाजकुलालकुक्कुटखराः । भारद्वाजः प्रसिद्धः । कुलालः पक्षी कुक्कुटश्चरणायुधः । खरो गर्दभः । हारीतगृध्रौ हारीतो (लोके हारिल) गृध्रः प्रसिद्धः । कपिर्मर्कटः स्फेटो जन्तुविशेषः । कुक्कुरपूर्णकूटचटकाश्च कुक्कुरा वनकुक्कुरः । पूर्णकूटः पक्षिविशेषः । चटकः कलविङ्कः । एते दिवासञ्चरा उक्ताः कथिता इति ॥ १५ ॥

अथ रात्रिसञ्चारिणं तथा दिवारात्रिचारिवशेन फलविशेषमाह ।

लोमासिका पिङ्गलछिप्पिकाख्यौ
वल्गुल्युलूकौ शशकश्च रात्रौ ।
सर्वे स्वकालोत्क्रमचारिणः स्यु-
र्देशस्य नाशाय नृपान्तदा वा ॥१६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोमासिकेति ॥ लोमासिका प्राणिविशेषः (लोके खिखिर इति । पिंगलछप्पिकाख्यौ पिंगलः पक्षिविशेषः । छप्पिका पक्षिविशेषः । वल्गुल्युलूकौ वल्गुलीवकः । उलूको दिवान्धः । शशकश्च (लोके खरहा) एते रात्रौ सञ्चराः सन्ति । स्वकालोत्क्रमचारिणः सर्वे दिवाचारिणो रात्रिचारिणो भवेयू रात्रिचारिणो दिवाचारिणो भवेयुः । समस्तास्तदा देशस्य राष्ट्रस्य नाशाय स्युर्भवन्ति वा नृपान्तदा राज्ञां नाशदा भवन्तीति ॥१६॥

अथोभयचारिणमाह ।

हयनरभुजगोष्ट्रद्वीपिसिंहर्क्षगोधा-
वृकनकुलकुरङ्गश्वाजगोव्याघ्रहंसाः ।
पृषतमृगशृगालश्वाविधाख्याऽन्यपुष्टा
द्युनिशमपि विडालः सारसः शूकरश्च ॥१७॥

हयनरभुजगोष्ट्रद्वीपिसिंहर्क्षगोधावृकनकुलकुरङ्गश्वाजगोव्याघ्रहंसा इति ॥ हयनरभुजगोष्ट्रद्वीपिसिंहर्क्षगोधावृकनकुलकुरङ्गश्वाजगोव्याघ्रहंसाः । हयोऽश्वः । नरो मनुष्यः । भुजगः सर्पः । उष्ट्रः करभः । द्वीपी शार्दूलः । सिंहो मृगेन्द्रः । गोधा प्रसिद्धो जलजीवः । वृक ईहामृगः। नकुलः प्रसिद्धः । कुरङ्गो हरिणः । श्वा कुक्कुरः । अजश्छागः । गौः प्रसिद्धः । व्याघ्र प्रसिद्धः । हंसः पक्षी । पृषतमृगशृगालश्वाविधाख्यान्यपुष्टाः । पृषतमृगो मृगविशेषः । शृगालः प्रसिद्धः । श्वाविधाख्यः शल्लकी । अन्यपुष्टः कोकिलः । विडालो मार्जारः । सारसः पक्षी शूकरश्च वराहश्च । द्युनिशमप्यहोरात्रमपिचारिणोऽर्थादेत उभयचरा इति१७

अथ द्युनिशोभयचारिवशेन फलान्याह ।

द्युनिशोभयचारिणः स्वकाले

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुरवनमिश्रचराः स्वभूमिसंस्थाः ।
सफला विफला विपर्ययस्था
गमनेप्सोः पुरपार्थिवाशुभास्ते ॥ १८ ॥

द्युनिशोभयचारिण इति ॥ स्वकाले स्वसमये द्युनिशोभयचारिणः । दिनरात्रिदिवसनिशाचारिणो जीवाः पूर्वोक्ताः पुरवनमिश्रचराः । ग्रामारण्योभयचराः स्वभूमिसंस्था निजपदचारिणो भवेयुस्तदा सफलाः सुफला भवन्ति । यदि विपर्ययस्थास्ते द्युनिशोभयचारिणोऽन्यसमयेऽन्यभूमिसंस्था भवेयुस्तदा विफला अनिष्टफलदा भवन्ति । गमनेप्सोर्यियासोः । अपि च पुरपार्थिवाशुभाः पुरवासिराज्ञामशुभा अनिष्टफलदा भवन्तीत्यर्थः

अथ यात्रासमये गमननिषेधपदान्याह ।

यानं धुरेण पतितं बृहती च कन्या
गर्भेण चातिमहता पुरतः स्थिता स्त्री ।
आगच्छ तिष्ठ विश गच्छसि वा किमर्थं
शब्दाःस्थिराश्च गमनं प्रतिषेधयन्ति ॥ १९ ॥

यानमिति ॥ धुरेण धुर्याख्येन यानं वाहनं पतितं स्खलितं भवेत् । बृहती च कन्याऽतिवयस्का कुमारी पुरतोऽग्रे स्थिता भवेत् । अति महता गर्भेण पुरतः स्थिता स्त्री भवेत् । आगच्छ तिष्ठ विश गच्छसि वा किमर्थमिति शब्दाश्च स्थिराः स्थिररवाश्च गमनं यात्रां प्रतिषेधयन्ति निषेधयन्तीत्यर्थः ॥१९॥

अथ सप्तस्वरग्रामगीतवशेनफलमाह ।

गान्धारषड्जऋषभाः खलु मध्यमश्च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यान स्वराः शुभकरा न तु येऽत्र शेषाः ।
ग्रामौ शुभावपि च मध्यमखड्जसज्ञौ
गान्धारगीतमपि भद्रमुशन्ति देवाः ॥२०॥

गान्धारषड्जऋषभा इति ॥ गान्धारषड्जऋषभाः खलु-निश्चयेन मध्यमश्च एते स्वराः याने गमने शुभकराः शुभदा भवन्ति । अत्र सप्तस्वरे ये त्रयो निषादधैवतपञ्चमाः शेषास्ते न शुभकरा भवन्ति। अपिच मध्यमषड्जसञ्ज्ञौ ग्रामौ च शुभौ भवतः। गान्धारमगीतमपि देवा भद्रं मङ्गलमुशन्ति कथयन्तीत्यर्थः ॥२०॥ स्वरा यथोक्तममरे निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त स्वरा इति ॥ तत्र निषादं नर्दन्ति गजाः । ऋषभं गावः । गान्धारमजादयः । षड्जं मयूराः । मध्यमं क्रौञ्चाः । धैवतमश्वाः । पञ्चमं कोकिलाः । तदुक्तं नारदेन । षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् । अजाविकौ तु गान्धारं क्रौञ्चो नर्दति मध्यम् ॥ १ ॥ पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् । अश्वस्तु धैवतं रौति निषादं रौति कुञ्जर इति ॥ २ ॥

अथ क्षुतशकुने विशेषकथनपूर्वकमार्जाररववस्त्रादि-पतने फलमाह ।

सर्वत्र पापं क्षुतमुद्दिशन्ति
गोस्तुच्छुतं मृत्युकरं यियासोः ।
मार्जाररावस्खललं च यातु-
र्वस्त्रस्य भङ्गश्च न शोभनानि ॥ २१ ॥

सर्वत्रेति ॥ सर्वत्र सकलकर्मणि क्षुतं क्षिकापापमशुभमुद्दिशन्ति कथयन्त्याचार्य्याः । गोस्तु क्षुतं यियासोर्जिगमिषोर्मृत्यु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करं भवति । अत्र गोपदेन पशुमात्रमपि गृह्यते सर्वशकुनग्रन्थस्वारस्येनेति । मार्जाररावो बिडालशब्दः । यातुर्जिगमिषोर्वस्त्रस्य स्खलनं पतनं वस्त्रस्य भङ्गो नाशः कण्टकादिना इति शोभनानि शुभानि न भवन्तीति ॥ २१ ॥

अथ शकुने दिग्वशेन विशेषमाह ।

जालकरश्वकरौ न शुभौ प्राग्-
घातकशस्त्रकरौ यमदिक्स्थौ ।
षण्ढकमद्यकरावपि पश्चा-
दासनसीरखलैः सह चोदक् ॥ २२ ॥

जालकरश्वकराविति ॥ जालकरश्वकरौ जालहस्तः कुक्कुरहस्त इति प्राक् पूर्वदिशि न शुभकरौ भवतः । घातकशस्त्रकरौ हिंसकशस्त्रहस्तौ यमदिक्स्थौ दक्षिणभागगतौ न शुभौ भवतः । षण्ढकमद्यकरावपि नपुंसकमद्यहस्तौ पश्चात्पश्चिमदिशि न शुभौ भवतः । आसनसीरखलैः सहचोदक् आसनहलनीचैः सहिता उत्तरदिक् च न शुभा भवतीति ॥ २२ ॥

अथ दिग्वशेन सुशकुनान्याह ।

द्रव्याणि शुक्लानि तुरङ्गमश्च
पूर्वेण याम्येन शवं समांसम् ।
पश्चात्कुमारी दधि चातिशस्तं
सौम्येन गोब्राह्मणसाधवश्च ॥२३॥

द्रव्याणीति ॥ शुक्लानि शुभ्राणि द्रव्याणि रजतादीनि तुरङ्गमश्च घोटकश्च पूर्वेण प्राग्भागेन शुभः स्यात् । समांसं शवं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सहितमांसं मृतको याम्येन दक्षिणेन शुभो भवति । पश्चात्पश्चिमदिशा कुमारी दधिचातिशस्तं सौम्येनोत्तरदिशा गोब्राह्मणसाधवश्च शुभा भवन्तीति ॥ २३ ॥

अथ करायिकाचेष्टितमाह ।

यः पूर्णकूटः सकरायिकाख्यो
वामः प्रशस्तः स च पूर्वदेशे ।
काकः शुभो दक्षिणतश्च तेषा-
मन्येषु देशेषु विपर्ययेण ॥ २४ ॥

य इति ॥ यः पूर्णकूटः करायिकाख्यः स वामो वामभागगः प्रशस्तो भवति स च प्रशस्तः पूर्वदेशे अर्थात्कूर्मचक्रविभागेन यः पूर्वदेशस्तस्मिन्निति । कूर्मचक्रार्थं बृहत्संहिता विलोक्या दक्षिणतो दक्षिणदिशि काको ध्वाङ्क्षः शुभो भवति । अन्येषु देशेषु कूर्मचक्रवशेन पूर्वेतरदेशेषु तेषां करायिककाकानां विपर्ययेण विपरीतेनार्थात्करायिकाख्यो दक्षिणः प्रशस्तो भवति काको वामभागगः प्रशस्तो भवतीति ॥ २४ ॥

अथ डिड्यकचेष्टितमाह ।

वामे शस्तो धन्वनः सिद्धिदाता
प्रोत्तुङ्गश्चेद्धस्तमात्रं जयाय ।
आकायश्चेदुन्नतो वामभागे
पृथ्वीलाभं धन्वनागः करोति ॥ २५ ॥

वाम इति ॥ वामे वामभागे धन्वनो डिड्यकः शस्तः कथितः सिद्धिदाताऽभीष्टदाता भवति । हस्तमात्रं प्रोत्तुङ्गश्चेद्भूमेर्हस्तमात्रोच्छ्रितश्चेज्जयाय विजयार्थं भवति । चेद्यदि गन्तुराकाया-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्देहाच्चावधुन्नतोच्छ्रितश्चेद्वामभागे तदा धन्वनागो ऽथ्यक्षः पृथ्वीलाभं करोति ॥ २५ ॥

अथ श्वचेष्टितमाह ।

नरतुरगगजातपत्रकुम्भध्वजशयनासनपुष्पचा-
मराणि । व्रजति यदि पुरोऽवमूत्र्य यातुः क्षप-
यति शत्रुवलं ततो नरेन्द्रः ॥ २६ ॥

नरतुगगजातपत्रकुम्भध्वजशयनासनपुष्पचामराणीति ॥ नरो मनुष्यस्तुरगोऽश्वो गजो हस्ती । आतपत्रं छत्रम् । कुम्भः कलशः । ध्वजः प्रसिद्धः । शयनं शय्या अशनं भक्ष्यम् । पुष्पं प्रसिद्धम् । चामरं वालव्यजनम् । एतानि यदि श्वा सारमेयो ऽमूत्र्य मूत्रेण सिक्त्वा यातुर्गन्तुः पुरतोऽग्रतो व्रजति गच्छति ततोऽनन्तरं नरेन्द्रो राजा शत्रुवलं शत्रुसैन्यं क्षपयति आच्छादयतीति दन्तसकारपाठे आसनमिति ॥२६॥

अथ शुनः कुचेष्टितमाह ।

विषकण्टकिशुष्कवृक्षलोष्टा-
नवमूत्र्यास्थिचितेन याति चेच्छ्वा ।
न शुभोऽभिमुखो भषन् विधुन्वन्
युध्यन् गां विलिखन्नखैर्वमंश्च ॥ २७ ॥

विषकण्टकिशुष्कवृक्षलोष्टानिति ॥ विषकण्टकिशुष्कवृक्ष-लोष्टान् विषवृक्षः (लोकेकोचिला) कण्टकी सकण्टकवृक्षः । शुष्कवृक्षः प्रसिद्धः । लोष्टो मृत्पिण्डः । एतानवमूत्र्य मूत्रेण सिक्त्वा ऽस्थिचितेन कूल्यश्मसानेन (कूल्यमस्थि चेत्यमरः) चेद्यदि श्वा याति गच्छति तदा न शुभोऽर्थादनिष्टदो भवति । अभिमुखः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सम्मुखो भषन् न शुभो भवति । अभिमुखो विधुन्वन् कम्पयन् गात्रमिति शेषः न शुभो भवति । युध्यन् न शुभो भवति । नखैर्नखरैर्गां पृथ्वीं विलिखन् विदारयन् न शुभो भवति वमंश्च वमथुं कुर्वन् न शुभो भवतीति ॥ २७ ॥

अथ शुनः शकुने विशेषमाह ।

उत्तानपादः स्वपते च पापो
विलोक्य सूर्यं विरुवंश्च दीनम् ।
शुष्कास्थिलाभाभिमुखश्च कष्टो
मांसादिभिः पूर्णमुखश्च शस्तः ॥२८॥

उत्तानपाद इति ॥ उत्तानपादः स्वपते ऊर्ध्वचरणः शयते तदा श्वा पापोऽनिष्टदो भवति । सूर्यं विलोक्य दीनमार्तं विरुवन् च पापो भवति । शुष्कास्थिलाभाभिमुखश्च शुष्कास्थिलाभाय सम्मुखश्च कष्टोऽनिष्टदो भवति । मांसादिभिरार्द्रमांसादिभिः पूर्णमुखश्च पूरिताननश्च शस्तः शुभदो भवति ॥ २८ ॥

अथ चाषचेष्टितमाह ।

पूर्णाननो यस्य करोति चाषः
प्रदक्षिणं स्वस्तिकमेव वा खे ।
लाभो महान्तस्य पराभवाय
काकेन भङ्गो विजयो जयोऽस्य ॥२९॥

पूर्णानन इति ॥ यस्य यातुश्चाषः किकीदिविः पूर्णाननो भक्ष्यपूरितमुखः प्रदक्षिणं करोति वा खे आकाशे स्वस्तिकमण्डलाकृतिमेव करोति तस्य गन्तुर्महान् विपुलो लाभः प्राप्तिर्भ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वति । अस्य चाषस्य काकेन भङ्गः पराजयः पराभवाय अनादराय भवति । अस्य चाषस्य विजयो गन्तुर्जयाय जयार्थं भवतीति ॥ २९ ॥

अथ शकुननिश्चयमाह ।

कार्यन्तु मूलशकुनेऽन्तरजे तदह्नि
विन्द्यात्फलं नियतमेवमिमे विचिन्त्याः ।
प्रारम्भयानसमयेषु तथा प्रवेशे
ग्राह्यं क्षुतं न शुभदं क्वचिदप्युशन्ति ॥ ३० ॥

कार्यमिति ॥ मूलशकुने तु प्रथमशकुने तु शुभे सति कार्यं विन्द्याज्जानीयात् अर्थात्प्रथमशकुने शुभे कार्यसिद्धिः । प्रथमेऽशुभेऽसिद्धिरिति । अन्तरज इति प्रथमशकुनान्तरं यात्रासमाप्तिं यावदिति तदनन्तरम् । तस्मिन्नन्तरजे मध्यजाते शकुने तदह्नि यात्रादिने फलं विन्द्याज्जानीयात् । अर्थात्प्रथमशकुने शुभेऽन्तरजेऽपि शुभे तदह्नि यात्रादिने कार्यसिद्धिः । अथ च प्रथमशकुनेऽशुभेऽन्तरजेऽप्यशुभे तदह्नि कार्यहानिरिति । इमे कथिताः शकुना नियतं नियमेन विचिन्त्याः । केषु प्रारम्भयानसमयेषु तथा प्रवेशे प्रारम्भोऽखिलकार्याणाम् । यानसमयो गमनकालः । प्रवेशो गृहादिप्रवेशः । अथ च क्षुतं नासिकाशब्दः । ग्राह्यं सकलकार्येषु क्षुतं श्रुत्वा न किमपि कार्यं करणीयमिति । क्वचिदपि कुत्रापि क्षुतं शुभदं नोशन्ति न कथयन्त्याचार्या इति ॥ ३० ॥

अथानिष्टशकुनविरुते कर्त्तव्यमाह ।

क्रोशादूर्ध्वं शकुनविरुतं निष्फलं प्राहुरेके
तत्रानिष्टे प्रथमशकुने मानयेत्पञ्च षट् च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्राणायामान्नृपतिरशुभे षोडशैवं द्वितीये
प्रत्यागच्छेत् स्वभवनमतो यद्यनिष्टस्तृतीयः ३१

क्रोशादूर्ध्वमिति ॥ क्रोशादूर्ध्वमेकक्रोशादनन्तरं शकुनविरुतं निष्फलम् । एके प्रधाना आचार्या वसिष्ठकश्यपादयः प्राहुरूचुः । तत्र प्रथमशकुनेऽनिष्टे नृपती राजा पञ्च षट् च । अर्थादेकादश प्राणायामान् । मानयेत् पूरयेत् । एवं द्वितीये शकुनेऽनिष्टे षोडश प्राणायामान् पूरयेत् । प्राणायामः सन्ध्योदितविधिरेव । अतो द्वितीयवारादनन्तरं तृतीयः शकुनो यद्यनिष्टस्तदा गन्ता स्वभवनं निजगृहं प्रत्यागच्छेत् निवर्तेत ॥ ३१ ॥

अथ शकुनप्रशंसामाह ।

शुभं दशापाकमविघ्नसिद्धिं
मूलाभिरक्षामथवा सहायान् ।
दुष्टस्य संसिद्धिमनामयत्वं
वदन्ति ते मानयितुर्नृपस्य ॥ ३२ ॥

इति श्रीवराहमिहिरकृतायां योगयात्रायां शकुनाध्यायश्चतुर्दशः ॥ १४ ॥

शुभमिति ॥ ते शकुनाः शुभसूचका नृपस्य राज्ञो मानयितुः तान् शकुनान् मानयति पूजयति तस्य शुभं शोभनं दशापाकं दशाफलम् । अविघ्नसिद्धिं कुशलेन कार्यसिद्धिम् । मूलाभिरक्षां मूलस्थानाभिरक्षाम् । अथवा सहायान् सार्थकान् । दुष्टस्य दुःसाध्यस्य संसिद्धिं सम्यक्सिद्धिमिष्टस्य संसिद्धिमित्यपि पाठः । अनामयत्वमारोग्यताम् । एतत्सर्वं वदन्ति कथयन्ति शुभसूचनादिति ॥ ३२ ॥

इति श्रीहरिनन्दकृतायां योगयात्राप्रकाशिकाटीकायां शकुनाध्यायश्चतुर्दशः ॥१४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ प्रोत्साहनाध्यायो व्याख्यायते ॥

तत्रादौ सार्थकलक्षणान्याह ।

शूरकृतास्त्रमहाकुलजाताः
स्वामिहिता वलिनः कृतयोग्याः ।
दृष्टगुणा वहुवान्धवमित्रा-
नागकरोरुभुजाः कठिनाङ्गाः ॥ १ ॥

शूरकृतास्त्रमहाकुलजाता इति ॥ शूरकृतास्त्रमहाकुलजाताः। वीरशिक्षितास्त्रविद्यसुकुलप्रसूताः । स्वामिहिताः प्रभ्वनुकूलकराः । वलिनो वलशालिनः । कृतयोग्या वहुयोग्याः (युगपर्याप्तयोः कृतमित्यमरः) दृष्टगुणा दर्शितसुगुणाः । वहुवान्धवमित्राः । अधिकस्वजनसुहृदः । नागकरोरुभुजा गजहस्तवद्वक्षः स्थलवाहवः कठिनाङ्गाः कठोरशरीराः । एवंभूताः सहायाः सार्थकाः पुण्यकृतां पुण्यवतां समरेषु सङ्ग्रामेषु भवन्तीत्यग्रेण सम्वन्ध इति १

पुनः सुसार्थकलक्षणान्याह ।

व्याघ्रमृगेश्वरगोवृषनादाः
श्येनदृशः शुकसन्निभनासाः ।
केकरजिह्मनिमीलितनेत्राः
पुण्यकृतां समरेषु सहायाः ॥ २ ॥

व्याघ्रमृगेश्वरगोवृषनादा इति ॥ व्याघ्रमृगेश्वरगोवृषनादाः एतेषां शब्दवच्छब्दो येषांते तथा श्येनदृशः पत्रिनेत्रवन्नेत्रेयेषामिति तथा शुकसन्निभनासाः शुकपक्षिसदृशनासाः । केकरजिह्मनिमीलितनेत्राः । काणकुटिलमुद्रितदृशः । अर्थात्काणवत्कुटिले-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

षन्मुद्रितदृशः । पुण्यकृतां पुण्यात्मनां समरेषु सङ्ग्रामेषु एवं विधाः सहायाः सार्थका भवन्ति ॥ २ ॥

अथाग्रेसरानाह ।

देशगुणैःप्रथिताश्च पुरोगा-
स्ते वहवो गुणलक्षणलक्ष्याः ।
कालभृतो भृकुटीकृतवक्त्रा
वर्मभृतो विविधायुधहस्ताः ॥ ३ ॥

देशगुणैरिति ॥ देशगुणै राष्ट्रगुणैः प्रथिताश्च विदिताश्च ते वहवोऽनेके भवेयुः । गुणलक्षणक्ष्या गुणाः षड्गुणाः सन्ध्यादयस्तेषां लक्षणं चिह्नं तल्लक्षितुं योग्याः । कालभृतः समयधारिणो विभज्य गृहीतसमयाः । भृकुटीकृतवक्त्राः । भृकुट्या भ्रूभङ्गेनैव कृतो वक्त्रो विघ्नो पैस्ते तथा । अपि च वर्वभृतः कवचधारिणः । विविधायुधहस्ता नानास्त्रशस्त्रकराः । एवं भूताः पुरोगा अग्रेसरा भवेयुः ॥ ३ ॥

अथ ग्रहव्यूहानाह ।

दण्डोरगौ रविसुतस्य रवेस्तु चक्रं
शुक्रस्य पद्मशकटौ गरुडो बुधस्य ।
व्यूहा तु सूचिमकरौ धरणीसुतस्य
श्येनो गुरोः शिशिरगोरपि मण्डलाख्यः ॥४॥

दण्डोरगाविति ॥ रविसुतस्य शनेर्दण्डोरगौ लडुडसर्पो व्यूहौ स्तः । रवेस्तु सूर्य्यस्य तु चक्रमरिः स्यात् । शुक्रस्य पद्मशकटौ कमलानसी बुधस्य गरुडः । धरणीसुतस्य मङ्गलस्य तु सूचिम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करौ व्यूहौ स्तः । गुरोर्बृहस्पतेः श्येनः पत्री व्यूहो भवति शिशिरगोरपि चन्द्रस्यापि मण्डलाख्यो व्यूहोऽस्ति ॥४॥

अथ व्यूहप्रयोजनमाह ।

व्यूहमात्मशुभदग्रहस्य य-
द्विद्विषामशुभसंस्थितस्य वा ।
तत्प्रयोज्यमरियोजितस्य वा
घातनं तदरिभिर्बलोत्तरैः ॥ ५ ॥

व्यूहमात्मशुभदग्रहस्येति ॥ आत्मशुभदग्रहस्य स्वशुभफलदातृखगस्य यद्व्यूहं कथितं वा विद्विषां शत्रूणामशुभसंस्थितस्या निष्टफलदातुर्ग्रहस्य यद्व्यूहं समरे तत्प्रयोज्यम् । वा बलोत्तरैरुपचीयमानबलैस्तदरिभिः शत्रुशत्रुभिर्ग्रहैररियोजितस्य शत्रुपपक्षाश्रितस्य घातनं हननं विधेयमिति ॥ ५ ॥

अथ रणे समीपे सति दैवशाली मन्त्रिसभाजनितं कुर्यादित्याह ।

रणे प्रत्यासन्ने सदसि नृपतिर्मन्त्रिविदितं
बलोत्साहं कुर्यादहितबलविद्रावणकरम् ।
जयं नो दैवज्ञः कथयति जनः सत्यवचनो
निमित्तानीष्टानि द्विपतुरगयोधादिषु च मे ॥६॥

रणेप्रत्यासन्न इति ॥ रणे सङ्ग्रामे प्रत्यासन्ने समीपे सति सदसि सभायां मन्त्रिविदितं सचिवजनसंश्रुतमङ्गीकृतं बलोत्साहं त्रिविधशक्त्युत्साहमहितबलविद्रावणकरं शत्रुशक्तिविदारणकं कुर्यात् । सत्यवचनो दैवज्ञो गणको नोऽस्माकं जयं विजयं कथयति मे च मम च द्विपतुरगयोधादिषु गजाश्वभटादिषु निमित्तानि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शकुनानि इष्टानि शुभसूचकानि भवन्तीति ॥ ६ ॥ *

अथ भटविभवं वर्णयन् कार्याभिमुखं तं करोति ॥

अभिजनयुता यूयं सौर्यं जनाः कथयन्ति वो
धनुषि कणये चक्रे शक्त्यामसौ च कृतश्रमाः ।
मयि च भवतामस्ति स्नेहः कथं न जयो मम
द्विरदतुरगं स्यादाक्रान्तं भवद्भिरिदं यदा ॥७॥

अभिजनयुता इति ॥ यूयं भटा अभिजनयुता निजजनपरिजनसंवलिताः स्युः । वो युष्माकं सौर्यं पराक्रमं जना लोकाः कथयन्ति । धनुषि धनुर्विद्यायां कणये शस्त्रविशेषे चक्रेऽसौ शक्त्यां छूरिकायामसौ खड्गे च शब्देनान्येषु व्यायामादिषु कृतश्रमाः सुशिक्षिता यूयम् । मयि च मद्विषये च भवतामस्त्रशस्त्राद्यनेकविद्यानिष्णातानां स्नेहोऽनुरागोऽस्ति।यदा भवद्भिः कार्यसम्पादनकुशलैरिदमुपास्थितं द्विरदतुरगं गजाश्वमाक्रान्तमाक्रमणविषयीभूतं स्यात्तदा मम जयो विजयश्रीलाभः कथंन । अर्थादनायासेन केवलं भवदनुकम्पयैव स्यादेवेति ॥७॥

अथ स्वाभ्युदयं दर्शयाति ।

बृंहति हेषन्ति शिवं ब्रुवन्ति दीप्यन्ति शोचन्ति
मुदान्विताश्च । नागाश्वविप्रानलशत्रुयोधाः
कः संशयश्चात्र रणे जयस्य ॥८॥

बृंहन्तीति ॥ नागाश्वविप्रानलशत्रुयोधा बृंहन्ति हेषन्ति शिवं ब्रुवन्ति दीप्यन्ति शोचन्ति मुदान्विताश्चात्र क्रमेण नागा गजा-बृंहन्ति । गलगर्ज कुर्वन्ति । अश्वा घोटका हेषन्ति । विप्रा ब्राह्म-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

णाशिवं कल्याणं ब्रुवन्ति । अनला होमाग्नयो दीप्यन्ति प्रकाशवन्तो द्योतन्ते । सत्त्वः शोचन्ति । योधा भटा मुदाश्च हर्षयुक्ताश्च दृश्यन्ते अत्रास्मिन्समये रणे सङ्ग्रामे जयस्य जयलक्ष्म्या लाभे कः संशयो न कोऽपि संशय इत्यर्थः ॥८॥

अथ युद्धे धर्म्ममभिवर्णयन् कुलकेन सुलभमुक्तिकीर्त्ती दर्शयति ॥

द्वैपायनेन मुनिना मनुना च धर्म्मा युद्धेषु ये निगदिता विदितास्तु ते वः । स्वाम्यर्थगोद्विजहिते त्यजतां शरीरं लोका भवन्ति सुलभा विपुलं यशश्च ॥९॥

द्वैपायनेनेति ॥ द्वैपायनेन वेदव्यासेन मनुना स्मृतिकर्त्रा वैवस्वतेन युद्धेषु ये धर्म्मा निगदिताः कथितास्ते विविधधर्म्मा वो युष्माकं विदितास्तु प्रथितास्तु । स्वाम्यर्थगोद्विजहिते प्रभ्वर्थगवि विप्ररक्षणे शरीरं देहं त्यजतां जनानां लोकाः परलोकाः सुलभा सुखेन लभ्या भवन्ति । च शब्देन इह लोके विपुलं सुमहद्यशश्च सुकीर्त्तिश्च भवतीति ॥ ९ ॥

तपस्विभिर्या सुचिरेण लभ्यते
प्रयत्नतः सत्रिभिरिज्यया च या ।
व्रजन्ति तामाशु गतिं मनस्विनो
रणाश्वमेधे पशुतामुपागताः ॥ १० ॥

तपस्विभिरिति ॥ तपस्विभिस्तापसैः प्रयत्नतो वर्षातपशीतकृच्छ्रादितो या गतिर्मुक्तिः सुचिरेण बहुकालेन लभ्यते प्राप्यते । या च गतिः सत्रिभिर्धनोत्राकायैः सह इज्यया यागेनाश्वमेधादिना लभ्यते । तां गतिं मुक्तिं रणाश्वमेधे रण एवाश्वमेध इति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथा तस्मिन् समराश्वमेधे पशुतां पशुधर्मतामुपागताः प्राप्ता मनस्विनो वीरा व्रजन्ति गच्छन्तीति ॥१०॥

यस्य तपो न जनाः कथयन्ति नो मरणं समरे विजयं च । न श्रुतदानमहाधनतां वा तस्य भवः क्रिमिकीटसमानः ॥ ११ ॥

यस्येति ॥ यस्य जनस्य तपो जना लोका न कथयन्ति । समरे सङ्ग्रामे मरणं नो कथयन्ति । समरे विजयं च नो कथयन्ति । यस्य श्रुतदानमहाधनतां च शास्त्रत्यागसुभाग्यत्वं न कथयन्ति । तस्य संज्ञामात्रस्य जनस्य भव उत्पत्तिः क्रिमिकीटसमानोऽस्ति । अर्थाद्यथा पिपीलिकाकीटादिर्भूत्वा भूत्वा स्वयमेव नश्यति तथेति ॥११॥

संरक्ष्यमाणमपि नाशमुपैत्यवश्य-
मेतच्छरीरमपहाय सुहृत्सुतार्थान् ।
तत्किं वरं प्रलपतां सुहृदां समक्षं
किं निघ्नतः परबलं भृकुटीमुखस्य ॥ १२ ॥

संरक्ष्यमाणमपीति ॥ संरक्ष्यमाणमप्येतच्छरीरं देहोऽवश्यं निश्चयेन सुहृत्सुतार्थान् मित्रपुत्रधनान्यपहाय त्यक्त्वा नाशमुपैति लयं प्रयाति । प्रलपतां सुहृदां मित्राणां समक्षं प्रत्यक्षं तन्नाशं किंवरं श्रेष्ठम् । किं परबलं शत्रुसैन्यं निघ्नतो घातयतो भृकुटीमुखस्य भ्रुवोः कुटी कौटिल्यं तेन युक्तं मुखं यस्येति तथा तस्यनाशं वरम् । अनयोः शत्रुसैन्यं नाशयतो नाशमेव वरमिति ॥१२॥

हा तात मातेति च वेदनार्तः कण्ठच्छकृन्मूत्रक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

फानुलिप्तः । वरं मृतः किं भवने किमाजौ सन्दष्ट-
दन्तच्छदभीमवक्त्रः ॥ १३ ॥

हा तातेति ॥ हा तात हा मात इतीत्थं वेदनार्त्तः । अनुभव-पीडितः क्वणन् । अव्यक्तं वदन् सन् शकृन्मूत्रकफानुलिप्तो मल प्रस्रावश्लेष्मानुषिक्तो भवने गृहे मृतः किं वरम् । किमाजौ किं सङ्ग्रामे सन्दष्टदन्तच्छदभीमवक्त्रो दन्तेन सम्पीड्यौष्ठभयानक-मुखो वरम् । अनयोर्मरणयोर्मध्ये रणमरणमेव वरमिति अत्र मूले मातेत्यत्र सन्धिराचार्यस्य मौढ्यादवगन्तव्य इति ॥१३।

लोकः शुभस्तिष्ठतु तावदन्यः पराङ्मुखानां सम-
रेषु पुंसाम् । पत्न्योऽपि तेषां न ह्रिया मुखानि
पुरः सखीनामवलोकयन्ति ॥ १४ ॥

लोक इति ॥ समरेषु सङ्ग्रामेषु पराङ्मुखानां पृष्ठापवर्त्तिनां पुंसां पुरुषाणां तावदादौ लोको निजजनपरिजनात्मकः शुभः कुशलं तिष्ठतु । अन्यो वा तिष्ठतु । तेषां रणापवर्त्तिनां पत्न्यो-ऽपि स्त्रियोऽपि ह्रिया लज्जया सखीनां सहचरीणां पुरोऽग्रतो मुखानि वदनानि नावलोकयन्ति न पश्यन्तीति मानहानिर्भियेति १४

शत्रुसैन्यमवदार्य वर्त्ततां
यत्सुखन्तु कथयामि तादृशम् ।
शृण्वतां स्वयशसोग्रपल्लवान्
दिग्वधूवदनकर्णपूरकान् ॥ १५ ॥

शत्रुसैन्यमिति ॥ शत्रुसैन्यमरिबलमवदार्य विदार्य वर्त्ततां तिष्ठतां स्वयशसोग्रपल्लवान् निजकीर्त्तितरुसुकिशलयान् किञ्च-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शिष्टान् दिग्वधूवदनकर्णपूरकान् दिगङ्गनामुखश्रुतिपुटपूरकान् शृण्वतां जनानां यत्सुखं तु यादृशं सुखंतु भवति तादृशं कथयामीति ॥ १५ ॥

अथ जयसुखमाह ।

निपतति शिरसि द्विपस्य सिंहः
स्वतनुशताधिकमांसराशिमूर्तेः ।
पिबति च तदसृग्मदेष्टगन्धं
वदनगतांश्च शनैः प्रसृज्य मुक्तान् ॥१६॥

निपततीति ॥ द्विपस्य हस्तिनः शिरसि मस्तके सिंहो मृगेन्द्रो निपतति । किम्विशिष्टस्य स्वतनुशताधिकमांसराशिमूर्त्तेः सिंहशरीरशतगुणाधिकमांससमूहशरीरस्य । वदनगतान् मुखप्राप्तान् मुक्तान्मौक्तिकान् प्रसृज्य त्यक्त्वा शनैर्मन्दंमन्दं तदसृग्मदेष्टगन्धं तत्तस्य गजस्य शोणितदानसुसौरभं पिबति स्वादयति ॥ १६ ॥

अथ युद्धभीरोरेतन्न भवतीत्याह।

मणिकनकविभूषिता युवत्यो
द्विपतुरगं वसुचामरानिलश्च ।
अविरलशशिकान्ति चातपत्रं
भवति न मातृमुखस्य युद्धभीरोः ॥ १७ ॥

मणिकनकविभूषिता इति ॥ मातृमुखस्य मातर्यभिमुखस्य युद्धभीरोः रणकातरस्य पुंसो मणिकनकविभूषिता रत्नसुवर्णस्वलङ्कृता युवतयः स्त्रियो न भवन्ति । द्विपतुरगं गजाश्वं न भवति । वसु धनं न भवति । चामरानिलश्च बालव्यजनवीजनञ्च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न भवति । अक्लिष्टशशिकान्ति चातपत्रं घनविद्युद्युति छत्रं न भवतीति ॥ १७ ॥

अथ विशेषसुखमाह ।

रुचिमत्कुचबाहुपञ्जरे हरिणाक्ष्यः प्रवरोरुपीडनम् । रमयन्ति विमानसंस्थिताः सुरवध्वोऽतिमुदा रणार्जिताः ॥१८॥

रुचिमत्कुचबाहुपञ्ज इति ॥ अतिमुदाऽतिशयहर्षेण विमानसंस्थिता व्योमयानसङ्गताः सुरवध्वो देवाङ्गना हरिणाक्ष्यो मृगशावकनयना रणार्जिता रणेन सङ्ग्रामेणोपार्ज्जिता रुचिमत्कुचबाहुपञ्जरे शोभाशालिकुचयुगभुजपञ्जरमध्ये प्रवरोरुपीडनं कुचयुगमर्दनं यथास्यात्तथा रमयन्ति क्रीडयन्ति जयिनंजनमिति शेषः ॥ १८ ॥

अथ जयिपराजयिजनयोर्विशेषफलमाह ।

एकतोऽस्य सुरसुन्दरीजनः श्रीः प्रतीच्छति युयुत्सुतोऽन्यतः । पद्मया सह पलायते यशश्चैकतः कुलकलङ्ककारकम् ॥१९॥

एकतोऽस्येति ॥ एकतोऽस्य जयिनः पुंसः सुरसुन्दरीजनो देवाङ्गनागणः प्रतीच्छति । आलिङ्गितुमिच्छति । अपि च युयुत्सुतः पुंसः श्रीर्लक्ष्मीः प्रतीच्छति प्रकर्षेणेच्छति । अन्यतः पराङ्मुखस्य युद्धपराजितस्य पद्मया लक्ष्म्या सह सहितं यशःकीर्त्तिः पलायते एकतश्च कुलकलङ्ककारकं पलायनकलङ्कश्च भवति १९

अथ राजपालितस्य युद्धभीरोःसकलं व्यर्थं दर्शयति ।

आरामदेवकुलकूपतडागयज्ञा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ये वः कृता विलसितञ्च नृपप्रसादात् ।
तद्वो वृथा यदि न निश्छलमाजिमध्ये
विद्युल्लताविकसितानि करोति वोऽसिः ॥२०॥

आरामदेवकुलकूपतडागयज्ञा इति ॥ नृपप्रसादाद्राज्ञः प्रसन्नतातः आरामदेवकुलकूपतडागयज्ञा उपवनसुरगणाम्बुजलाशयमखा यो वो युष्माभिः कृता निर्मिता विलसितं च क्रीडितं च तत्सर्वं वो युष्माकं वृथा मुधा । यद्याजिमध्ये रणभूमौ वोऽसिर्युष्माकं षड्गो निश्छलं निःकपटं यथा भवति तथा विद्युल्लताविकसितानि तडिद्वल्लीवस्फुरणानि न करोति । अर्थाच्छत्रुगात्रासृगुक्षितेन बहलरुधिरधाराधारणानि नोत्पादयेत्तदा पूर्वोक्तं सर्वं वृथा व्यर्थमेवेति ॥२०॥

अथ स्वामिकार्ये देहत्यागिनामुभयत्र यश आह ।

चित्रं किमस्मिन्वद साहसं वा यत्स्वामिनोऽर्थे गणयन्ति नासून् । युद्धात्प्रनष्टो विदितोऽरिमध्ये यद्बालिशस्तिष्ठति साहसं तत् ॥२१॥

चित्रमिति ॥ अस्मिन्नृणे यद्यस्मात्कारणात्स्वामिनोऽर्थे प्रभोः प्रयोजने असून् प्राणान् जीवनानि न गणयन्ति न विचारयन्ति तच्चित्रमाश्चर्यं किं वा साहसं करणानर्हत्वं किम् । इति वद कथय युद्धात्सङ्ग्रामात्प्रनष्टो दैवात्पराजितश्चेत् । अरिमध्ये शत्रुसैन्यदले विदितः ख्यातो भवेत् । यद्यस्मात्कारणाद्बालिशो बालकोऽपि तत्साहसं तिष्ठति । अर्थात्तत्यवसरे बालकोऽपि साहसं करोतीति ॥ २१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ शूरस्य पुंसो वंशस्येतरानिन्दापूर्वकविशेषालङ्करणमाह ।

न केवलं गात्रविभूषणानि क्षतानि शूरस्य रणे कृतानि । यशस्तरोर्मूलकृषिक्षतानि तान्येव वंशस्य विभूषणानि ॥ २२ ॥

न केवलमिति ॥ केवलं गात्रविभूषणानि स्रक्चन्दनमणिमुक्ताभरणानि न विभूषणानि भवन्ति । किञ्च शूरस्य वीरस्य रणे सङ्ग्रामे कृतानि क्षतानि व्रणचिह्नानि विभूषणानि भवन्ति यशस्तरोः कीर्तिवृक्षस्य मूलकृषिक्षतानि बुध्नक्षेत्रच्छिन्नानि तान्येव नत्वन्यानि वंशस्य गोत्रस्य विभूषणानि भवन्तीति ॥ २२ ॥

अथ रणहतस्य पारमार्थिकसुखमाह ।

भग्नेषु योधेष्ववपूर्य शस्त्राण्याजौ प्रवृत्ता व्यसवः कृता ये । ऊर्ध्वाननां वाजिमखाप्तलोकास्तेषां विमानान्यवलोकयन्ति ॥ २३ ॥

भग्नेष्विति ॥ योधेषु भटेषु भग्नेषु प्रनष्टेषु शस्त्राण्यवपूर्य आयुधानि पूरयित्वा । आजौ सङ्ग्रामे प्रवृत्ता व्यसवः प्राणरहिताः कृता ये भवन्ति तेषां रणहतानां विमानानि व्योमयानानि अवलोकयन्ति सम्पश्यन्ति के वाजिमखाप्तलोका वाजिमखेनाऽश्वमेधयागेनाप्ताः प्राप्तालोकाः स्वर्गलोकायैस्ते तथा किंविशिष्टा ऊर्ध्वानना उत्तानमुखा इति तदुपरिगमनत्वादिति ॥ २३ ॥

अथ रणमृतस्य पदेपदेऽश्वमेधफलं भवतीत्याह ।

यैरश्वमेधेऽभिहितं फलं वा दैवैर्द्विजैर्वा श्रुति-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शास्त्रकारैः । तैरेव भङ्गे प्रतिलोमगस्य पदे पदे वाजिमखः प्रदिष्टः ॥ २४ ॥

यैरश्वमेध इति ॥ यैर्द्वयैर्द्विजैर्वा यैः श्रुतिशास्त्रकारैरश्वमेधेऽश्वमेधयागे फलमभिहितं कथितं तैरेव देवादिभिराचार्यैर्नान्यैः प्रतिलोमगस्य शत्रुशम्मुखस्य भङ्गे नाशे पदे पदे चरणे चरणे वाजिमखोऽश्वमेधयागः प्रदिष्टः कथितः ॥२४॥

अथानेकविधस्वर्गमार्गेषु सरलमार्गमाह ।

स्वर्गस्य मार्गा बहवः प्रतिष्ठास्ते कृच्छ्रसाध्याः कुटिलाः सविघ्नाः । निमेषमात्रेण महाफलोऽयं मृजुश्च पन्थाः समरे व्यसुत्वम् ॥ २५ ॥

स्वर्गस्येति ॥ स्वर्गस्य स्वर्गगमनस्य बहवोऽनेके मार्गाः पन्थानः प्रदिष्टाः कथिता आचार्यैरिति । ते मार्गाः कृच्छ्रसाध्याः क्लेशसाध्याः सन्ति कुटिला वक्राः सन्ति । सविघ्ना विघ्नसहिताः सन्ति । निमेषमात्रेण पक्ष्मपातसमयेन महाफलोयमृजुश्च सरलश्च पन्था मार्गोऽस्ति किंतदाह समरे रणे व्यसुत्वं प्राणरहितत्वमिति २५

अथ समरहतानामैश्वर्यं विलोक्य स्वर्गस्थायिनो रणलाभाय जन्मेच्छन्तीत्याह ।

दृष्ट्वैश्वर्यं स्वामिगोब्राह्मणार्थे
त्यक्तासूनां सङ्गरे सङ्गतानाम् ।
कृच्छ्रोपायैरर्जितस्वर्गलोकाः
जन्मेच्छन्ति क्षिप्रमेवाजिलोभात् ॥ २६ ॥

दृष्ट्वैश्वर्यमिति ॥ स्वामिगोब्राह्मणार्थे प्रभुगोविप्रहेतौ सङ्गरे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सङ्ग्रामे सङ्गतानां सम्प्राप्तानां त्यक्तासूनां रहितप्राणानामैश्वर्यं विभूतिं दृष्ट्वा कृच्छ्रोपायैः कष्टोपायैरर्जितस्वर्गलोका उपार्जितनाकाः आजिलोभात् सङ्ग्रामलोभात् क्षिप्रं शीघ्रं जन्मेच्छन्ति अर्थात्पुनर्भूमौ जन्मलब्धे रणमरणमेव वरयन्तीति ॥ २६ ॥

अथ रणविचेष्टितस्य पारमार्थिकं सुखं दर्शयति ।

संमूर्छितं संयुगसंप्रहारैः
पश्यन्ति सुप्तप्रतिबुद्धतुल्यम् ।
आत्मानमङ्केषु सुराङ्गनानां
मन्दाकिनीमारुतवीजिताङ्गाः ॥ २७ ॥

संमूर्छितमिति ॥ संयुगसम्प्रहारैः । रणसम्प्रहारैः संमूर्छितं सम्यग्विचेष्टितं सुप्तप्रतिबुद्धतुल्यं शयनप्रतिबोधितसमं सुराङ्गनानामङ्केषु क्रोडेषु आत्मानं निजात्मानं मन्दाकिनीमारुतवीजिताङ्गा वियद्गङ्गापवनपरिवीजिताङ्गाः पश्यन्ति विलोकयन्तीति ॥ २७ ॥

अथ गृहभीरुमरणात् रणमरणमेव वरं दर्शयति ।

जीवितोऽपिनिहतस्य वा रणे
धर्म एव हि नरस्य युध्यतः ।
निश्चयान्न मरणं हि सङ्गरे
नैव भीरुरजरामरः क्वचित् ॥ २८ ॥

जीवितोऽपीति ॥ जीवितोऽपि जीवनादपि रणे समरे युद्ध्यतो नरस्य निहतस्यैव हि निश्चयेन धर्मः । निश्चयात् हि यतो रणे समरे मरणं नहि भवति । भीरुः कातरोऽजरोऽमरः क्वचित्कुत्रापि नैव भवति । अर्थाद्भीरूरपि समये मृयते गृहेऽपीति ॥ २८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ मानमेवावलम्ब्य कीटादिकोऽपि युध्यते किम्पुनर्नर इत्याह ।

मानमात्रमवलम्ब्य युध्यते कीटकोऽपि विहगोऽथ वा पशुः । कोहि नाम पुरुषस्त्यजेद्रणं स्वर्गमान-सुखकीर्त्तिवित्तदम् ॥ २६ ॥

मानमात्रमिति ॥ कीटकोऽपि पिपीलिकासमुदायोऽपि विहगोऽपि पक्ष्यपि । अथवा पशुश्चतुष्पदोऽपि मानमात्रं चित्तसमुन्नतिमात्रमेवावलम्ब्याश्रित्य युद्ध्यते । को हीति निश्चयेन नाम प्रसिद्धः पुरुषो वीरो रणं समरं त्यजेत् न कोऽपि किंविशिष्टं रणम् स्वर्गमानसुखकीर्त्तिवित्तदं स्वर्गवासचित्तसमुन्नतिपुण्ययशोधनदमिति ॥ २९ ॥

अथ भाव्यभावित्वेन विशेषमाह ।

यदभावि न मेऽस्ति तत्क्वचित्सदद्भावि न मे क्व यास्यति । इति सम्परिचिन्त्य पण्डिताःपरसैन्यानि विशन्त्यविक्लवाः ॥ ३० ॥

यद्भाविनमेऽस्तीति ॥ मे मम यदभावि यच्छुभाशुभमभाव्यं तत्क्वचित्कुत्रापि नास्ति न भविष्यति मे मम सदसद्भावि शुभाशुभभावियत् तत्क्वचित्कुत्रापि भवनवननगादिषु न यास्यति न गमिष्यति सर्वत्रापि तद्भविष्यत्येव । इति एवं पण्डिताः शिक्षितबुद्धयः सम्परिचिन्त्य सम्यग्विचार्य अविक्लवा अभयाः सन्तः परसैन्यानि शत्रुबलानि विशन्ति प्रविशन्ति ॥ ३० ॥

अथ रणहतस्य परमोत्कृष्टसुखं दर्शयति ।

उरः कृत्वा वेद्यां मणिफलकगाढस्थितकुचं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भुजा वालम्ब्यैहीत्यमरवनिता व्योमगृहगाः ।
अपद्वारेणैवं त्वरितपद मित्याहुरपरा
हतं हस्तालम्बैर्हरति सुरलोको रणमुखात् ॥३१॥

उरःकृत्वेति ॥ उरो वक्षस्थलं वेद्यां अङ्गणादिषु कृतोपवेशनस्थाने कृत्वा संस्थाप्य किंविशिष्टमुरः मणिफलकगाढ़स्थितकुचं मणेरेवफलकोऽङ्गरक्षकः कञ्चुकिस्तेन गाढ़ं दृढं स्थितं कुचं यत्रेति तथा । भुजौ हस्तौ आलम्ब्याश्रित्य एत्यायाहि इत्येवं प्रकारेण व्योमगृहगा गगनभवनगता अमरवनिता देवाङ्गना हतं रणहतं पुमांसमाहुः कथयन्तीति । अपरा गन्धर्वललना अपद्वारेणापगतद्वारेण त्वरितपदं सुवेगितचरणं यथास्यात्तथैहि रणहतमिति । सुरलोको देवगणो रणमुखात् समरस्थानाद्धतं हस्तालम्बैः सोपानभूतहस्तैर्हरत्यानयाति ॥३१॥

अथाध्यायोपसंहारे रणहताः कीदृशं विमानम्प्रविशन्तीत्याह ।

हंसाढ्यं मणिवेदिकाकुहरकव्यालं विहाराम्बरं
निर्व्यूहस्थितरत्नचित्रकनकं स्तम्भाश्रितव्यालकम् ।
घण्टाकिङ्किणिचारुचामरयुतं स्त्रीगीतनृत्यान्वितं
वालार्कोपममाविशन्त्यभिमुखा युद्धे विमानं हताः

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायां प्रोत्साहनाध्यायः पञ्चदशः ॥ १५ ॥

हंसाढ्यमिति ॥ युद्धे रणे येऽभिमुखाः सम्मुखमुखा हता मृतास्ते वीरा विमानं व्योमयानमाविशन्त्याप्रविशन्ति किम्विशिष्टं विमानमिति हंसाढ्यं हंसाख्यपक्षिणा सहितं पुनः किम्विशिष्टं मणिवेदिकाकुहरकव्यालं रत्नासनसुषिरसर्पचित्रम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनर्विशिनष्टि विहाराम्बरं क्रीड़ावस्त्रम् । क्रीड़ार्थवस्त्रं यत्रेतितथा पुनर्निर्व्यूहस्थितरत्नाचित्रकनकम् । अविरलनिष्ठमणिखचितविविधाकारसुवर्णम् । पुनः स्तम्भाश्रितव्यालकम् । स्तम्भखचितसर्पचित्रम् । घण्टाकिङ्किणिचारुचामरयुतं घण्टारव्यवाद्यक्षुद्रघण्टिका रुचिरवालव्यजनान्वितं स्त्रीगीतनृत्यान्वितं बालार्कोपममुदयकालिकसूर्यसदृशमिति ॥ ३२॥

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकायां प्रोत्साहनाध्यायः पञ्चदशः ॥ १५ ॥

अथोपसंहाराध्यायो व्याख्यायते तत्रादौ शुक्रविचारमाह कुलकेन ।

छत्रध्वजप्रहरणान्यभिमन्त्रितानि
कुर्वन्ति शत्रुकदनं रिपुवाहिनीनाम् ।
मन्त्रं जगाद भगवानुशनाः स्वशास्त्रे
यल्लिख्यते स इह पूर्वविधिक्रमेण ॥ १ ॥

मन्त्रोयथा ॥ "ओँ इन्द्रोग्निरिन्द्रवज्रधरोऽयं हरिणोऽभिनिर्यायपरं हनहनदहदहस्वाहा ॥ पूणत्रेनयुतोमन्त्रः" ॥

छत्रध्वजप्रहरणानीति ॥ अभिमन्त्रितानि छत्रध्वजप्रहरणानि आतपत्रकेतनायुधानि । शत्रुकदनं वैरिदलनं कुर्वन्ति । रिपुवाहिनीनां शत्रुसैन्यानां कदनं कुर्वन्ति भगवान् शस्त्रास्त्रैश्वर्यवानुशनाः शुक्रो यन्मन्त्रं विचारं जगाद उक्तवान् । तदिह मन्त्रं पूर्वविधिक्रमेण विधानपुरः सररीत्या लिख्यतइति ॥१॥

प्रचलितगजवाजिश्रूरयोधं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समभिमुखोद्यतशस्त्रमभ्युपेतम् ।
अभिमुखदिनकृत्प्रभञ्जनं च
स्थिरहृदयोऽखिलं सुखं निहन्यात् ॥ २ ॥

प्रचलितगजवाजिशूरयोधमिति ॥ प्रचलितगजवाजिशूरयोधं प्रस्थितहस्त्यश्ववीरभटम् समभिमुखोद्यतशस्त्रं सम्यगभिमुखे । उद्यतान्युत्थापितान्यस्त्राणि यस्य तत् । अभ्युपेतं समीपागतमखिलम् एवंभूतमपि शत्रुसैन्यम् । अभिमुखदिनकृत्प्रभञ्जनमभिमुखं सम्मुखं दिनकृत्प्रभञ्जनौ सूर्यवायू यस्य तत्तःसत् स्थिरहृदयः स्थिरं निश्चलं दृढं हृदयं मनो यस्येति तथाभूतो राजा सुखमक्लेशं यथा भवति तथा निहन्यान्मारयेदिति ॥ २ ॥

अशुभखगमृगं च दक्षिणे
निपतति केतुपताकमेव वा ।
परुषविषममन्दजर्जरो
यदि खलु तूर्यरवोऽस्य वामतः ॥ ३ ॥
यत्पृष्ठतः सेभगजाश्वयोध-
मनिष्ठितव्यूहमरातिसैन्यम् ।
यस्येन्द्रचापं च ललाटसंस्थं
तत्पृष्ठभागः कुशलोऽभिहन्यात् ॥४॥

अशुभखगमृगमिति ॥ यद्यशुभमनिष्टफलदम् । खगाः पक्षिणः । मृगा वनचारिणः पशवः । वा केतुर्ध्वजा । पताका प्रसिद्धैव । एतदिति समाहारे नपुंसकम् । अस्य यायिनो राज्ञो दक्षिणे दक्षिणभागे निपतति । यदि खलु तूर्यरवः । तूर्यं वाद्यविशेषः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्य रवः शब्दः । परुषः कर्कशः । विषमोऽनियतैकरूपः । मन्दो नीचस्वरः । जर्जरोऽस्फुटः । अस्य राज्ञो वामतो वामभागे निपतति भवतीत्यर्थः ॥ ३ ॥ यत्पृष्ठत इति । यस्य राज्ञ इति शेषः । पृष्ठतः पृष्ठभागे । सेषुगजाश्वयोधम् । इषुभिः शरैः । गजैर्हस्तिभिः । अश्वैस्तुरगैः सह योधा भटा यस्मिन्तत् । आनिष्ठिसव्यूहमप्रतिनियतसेनारचनादिं । अरातिसैन्यं शत्रुबलं निपतत्यापतति । यस्य च ललाटसंस्थं शिरोऽग्रभागवर्ति । इन्द्रचापं सुरधनुः । तत्पृष्ठभागः । तस्य राज्ञः पृष्ठयायी कुशलो निपुणो ऽभिहन्यात् तं राजानं नाशयेदित्यर्थः ॥ ४ ॥

नार्ता न भीता न तृणाननाश्च
विमुक्तशस्त्राः प्रपलायमानाः ।
क्षीणायुधा वाजिगजावतीर्णा-
ह्येते न वध्या न च पीडनीयाः ॥ ५ ॥

नार्तेति ॥ आर्ताः पीड़िता रणे न वध्या अवध्याः । भीता भययुक्ता न वध्या न च पीड्नीयाः । तृणाननाश्च घासमुखाश्च न वध्याः । न च पीडनीयाः । विमुक्तशस्त्रास्त्यक्तास्त्राः । प्रपलायमानाः स्वगृहाभिमुखपरावर्त्तिताः । क्षीणायुधा विगतशस्त्राः । वाजिगजावतीर्णा हि । घोटकनागेभ्योऽवतीर्णाः । हि निश्चये एते न वध्या न वधार्हाः न च पीडनीया इति ॥ ५ ॥

कुलैकतन्तुः शरणागतो वा
कृताञ्जलिर्यश्च वदेत्तवाऽस्मि ।
अयुध्यमाना नवगम्यहन्या-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्न बालकान्स्त्रीपरिरक्षितांश्च ॥ ६ ॥

कुलैकतन्तुरिति ॥ कुलैकतन्तुर्गोत्रैकपुत्रावशेषः । वा शरणागतः शरणप्राप्तोयश्च कृताञ्जलिरञ्जालिबद्धस्तस्तवास्मि तवाहम् (अस्मीत्यहमर्थे) वदेत्कथयेत् । अयुध्यमानान् । अवगम्य ज्ञात्वा हन्यान्मारयेत् बालकान् स्त्रीपरिरक्षितांश्च न हन्यान्न मारयेदिति ॥ ६ ॥

अथ विजयेऽप्यभद्रमाह ।

दिग्दाहक्षितिजरजोश्मवृष्टिपातै-
र्निर्घातक्षितिचलनादिवैकृतैश्च ।
युद्धान्ते मृगशकुनैश्च दीप्तनादै-
र्नोभद्रं भवति जयेऽपि पार्थिवस्य ॥ ७ ॥

दिग्दाहक्षितिजरजोश्मवृष्टिपातैरिति ॥ युद्धान्ते रणावसाने दिग्दाहक्षितिजरजोश्मवृष्टिपातैः प्रसिद्धैरेतैः । निर्घातक्षितिचलनादिवैकृतैश्च मेघसङ्घर्षणभूकम्पकरकापतनाकालवर्षणादिविकारैश्च । मृगशकुनैश्च हरिणशकुनैश्च दीप्तनादैर्घोररवैः पार्थिवस्य राज्ञो जयेऽपि सकलकार्यसिद्धेऽपि नो भद्रं नो मङ्गलं भवतीति ॥ ७ ॥

अथ विजये शत्रुरहितसुखमाह ।

शुभा मृगपतत्रिणो मृदुसमीरणोह्लादकृ-
द्ग्रहाः स्फुटमरीचयो विगतरेणुदिग्मण्डलम् ।
यदन्यमपि वैकृतं न विजयावसाने यदा
तदा सुखमकण्टकं नृपतिरत्ति देशं रिपोः ॥८॥

शुभा मृगपतत्रिण इति ॥ विजयावसाने शुभाः शुभसूचकाः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मृगपतत्रिणो हरिणपक्षिणो दृग्गोचरा भवेयुः । मृदुसमीरणः कोमलपवनो ह्लादकृत्सुखजनको भवेत् । ग्रहाः सूर्यादयः स्फुटमरीचयो विकसितकिरणा भवेयुः । विगतरेणुदिग्मण्डलं रहितरजः पूर्वादिदिशो भवेयुः । अन्यदैकृतं यद्दिविभूम्यन्तरिक्षजमुत्पातं तद्यदा न भवेत्तदा नृपती राजा रिपोः शत्रोर्देशं राष्ट्रं सुखं सुखपूर्वकमकण्टकं शत्रुरहितं निर्भरं यथा तथाऽस्ति सुभोगङ्करोतीति ८

अथ परपुराप्तौ कर्त्तव्यमाह ।

परविषयपुराप्तौ साधुदेवद्विजस्वं
कुलजनवनिताश्च क्ष्माधिपो नोपरुन्ध्यात् ।
जनपदहितयुक्तान्पूजयेत्पौरमुख्या-
ञ्छुभतिथिकरणर्क्षे हृष्टसैन्यो विशेच्च ॥९॥

परविषयपुराप्ताविति ॥ परविषयपुराप्तौ शत्रुदेशनगरप्राप्तौ क्ष्माधिपो राजा साधुदेवद्विजस्वं सुजनविबुधविप्रधनं नोपरुन्ध्यात् न हरेत् कुलजनवनिताश्च कुलीनजनस्त्रीश्चापि नोपरुन्ध्यात् । जनपदहितयुक्तान् देशहितैषिणः पौरमुख्यान् ग्राम्यप्रधानान् पूजयेन्मानयेत् । ततः शुभतिथिकरणर्क्षे विहिततिथिकरणनक्षत्रे हृष्टसैन्यो हर्षितसैनिको राजा विशेच्च नगरं प्रविशेदिति ॥९॥

अथ यो राजा नीतिपूर्वकगणकवचनं करोति तस्य सकलाधिपत्यं दर्शयति ।

इति मनुजपतिर्यथोपदेशं भगणविदां प्रकरोति यो वचांसि । स सकलमहिमण्डलाधिपत्यं व्रजति दिवीव पुरन्दरोऽचिरेण ॥१०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इति मनुजपतिरिति । इतीत्थं प्रकारेण मनुजपती राजा यथोपदेशं कथितनीतिपुरःसरं भगणविदां ज्योतिर्विदां वचांसि वचनानि यः प्रकरोति । स राजा सकलमहिमण्डलाधिपत्यं समस्तभूमण्डलस्वामित्वं साम्राज्यमचिरेणाल्पकालेन व्रजति गच्छति दिवि स्वर्गे पुरन्दर इन्द्र इवेति ॥१०॥

अथ राज्ञः प्रथमादिकर्त्तव्यमाह ।

अलब्धलिप्सा प्रथमं नृपस्य लब्धस्य संरक्षण-सम्प्रवृद्धी । सम्यक्प्रवृद्धस्य च लाभकोऽयं तीर्थेषु सम्यक्प्रतिपादनानि ॥११॥

अलब्धलिप्सेति ॥ प्रथममादौ नृपस्य राज्ञोऽलब्धलिप्सा-ऽप्राप्तस्येच्छा कर्त्तव्या लब्धस्य प्राप्तस्य पदस्य संरक्षणसम्प्र-वृद्धी सम्यग्रक्षणं सम्यग्वर्द्धनं च विधेयम् । सम्यक्प्रवृद्धस्य च धनस्य चायं लाभकः तीर्थेषु तीर्थस्थानेषु सम्यक्प्रतिपादनानि सुनीतिपूर्वकभोजनदानानीत्येव परमो लाभ इति ॥११॥

अथ गृहप्रवेशमाह ।

केन्द्रेषु सौम्यैर्गुरुशुक्रलग्ने पापेषु केन्द्राष्टम-वर्जितेषु । ग्राम्ये स्थिरे वाऽनिधने च लग्ने गृहं विशेच्छीतकरेऽनुकूले ॥१२॥

केन्द्रेष्विति ॥ सौम्यैः शुभग्रहैः केन्द्रेषु १।४।७।१०। स्थितैः । तत्र गुरुशुक्रलग्ने सति पापेषु पापग्रहेषु केन्द्राष्टमवर्जितेषु १।४।७।८।१० एतद्रहितेषु ग्राम्ये द्विपदराशौ वा स्थिरे स्थिरराशौ । अनिधने च लग्ने जन्मलग्नराशिभ्यामष्टमरहिते लग्ने शीतकरे चन्द्रेऽनु-कूले विहिते गृहं विशेद्राजेति शेषः ॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ गृहप्रवेशपञ्चाङ्गमाह ।

पौष्णे धनिष्ठास्वथ वारुणेषु स्वायम्भुवर्क्षेषु त्रिगूत्तरासु । अक्षीणचन्द्रे शुभवासरे च तिथावरिक्ते च गृहप्रवेशः ॥१३॥

पौष्णे धनिष्ठास्वथेति ॥ पौष्णे रेवत्यां धनिष्ठासु (ताराभिप्रायेण बहुवचनम्) । अथ वारुणेषु शतभिषाभेषु । स्वायम्भुवर्क्षेषु रोहिणीनक्षत्रेषु । त्रिषूत्तरासु उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रनक्षत्रेषु । अक्षीणचन्द्रे क्षीणबलरहिते विधौ । शुभवासरे च अक्षीणचन्द्रबुधगुरुशुक्रदिवसे च । अरिक्ते रिक्तारहिते तिथौ च गृहप्रवेशः शुभो भवतीति ॥ १३ ॥

अथ धर्मपुरःसरप्रवर्त्तमाननृपस्यापरामरेश्वरत्वं वक्ति ।

धर्मेण पृथ्वीं किल पालयित्वा जलाशयारामसुरालयाढ्याम् । कृत्वा सकूपां चितिभिश्चितां च जयन्ति लोकानमरेश्वरस्य ॥१४॥

धर्मेणेति ॥ धर्मेण कथितराजधर्मेण पृथ्वीं भूमण्डलं किल निश्चयेन पालयित्वा समन्ताद्रक्षयित्वा । किम्विशिष्टां पृथ्वीं जलाशयारामसुरालयाढ्यां तड़ागवाप्यादिजलाधारोपवनदेवमन्दिरयुक्तां सकूपां कूपसहितां चितिभिश्चितांच इष्टिकादिभिर्युक्तांच कृत्वा राजानोऽमरेश्वरस्येन्द्रस्य लोकान् भुवनानि जयन्ति ॥ १४ ॥

अथ विजयानन्तरं स्वपुरागतस्य कर्त्तव्यमाह ।

स्वविषयमुपगम्यमानरेन्द्रो वलिमुपयाचित-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कानि चाधिकानि । निगदितविधिनैव सम्प्रद-
द्यात्प्रमथगणासुरभूतदेवताभ्यः ॥१५॥

स्वविषयमिति ॥ नरेन्द्रो राजा स्वविषयं निजदेशमुपगम्य प्राप्य उपयाचितकानि च पूर्वोपकल्पितानि च । अधिकानि च तदधिकानि च बलिं यथा भवति तथा निगदितविधिनैव बल्युपहाराध्यायकथितप्रकारेणैव प्रमथगणासुरभूतदेवताभ्यः परिषत्समुदायदैत्यदेवयोनिदेवेभ्यः सम्प्रदद्यात्सम्यक्प्रदद्यादिति १५

अथ ग्रन्थोपसंहारे सकलाध्यायनाम वक्ति ।

यात्रावतार आदावाचारश्चाभियोज्यको देशः ।
योगाध्यायो मिश्रकबल्युपहारौ तथा स्नानम् ॥१६॥
अग्निनिमित्तं नक्षत्रकैन्दुभं लक्षणं तथा वार्याः ।
शालाविधिर्गजेङ्गितमदकरणं वाजिचेष्टा च ॥१७॥
पड्गाविधिः प्रस्थानं शाकुनमुत्साहपुरनिवेशश्च ।
अध्यायसंग्रहोऽयं समासतश्चात्र निर्दिष्टः ॥१८॥

इति श्रीवराहमिहिराचार्यकृतायां योगयात्रायामुपसंहाराध्यायः षोडशः

यात्रावतार इति ॥ आदौ प्रथमो यात्राऽवतारो दैवपुरुषाकाराध्यायः । आचारश्च । आचाध्यायो द्वितीयः । अभियोज्यको देशोऽभियोगाध्यायस्तृतीयः योगाध्यायश्चतुर्थः । मिश्रकबल्युपहारौ । मिश्रकाध्यायः पञ्चमः । बल्युपहाराध्यायः षष्ठः । तथा स्नानं नक्षत्रविजयस्नानप्राशनाध्यायः सप्तमः ॥ १६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अग्निनिमित्तम् अग्निमित्ताध्यायोऽष्टमः । नक्षत्रैकैन्दुभम् । नक्षत्रैकेन्दुभाध्यायो नवमः । तथा वार्या गजबन्धनाख्यस्य लक्षणाम् । शालाविधिर्गजगृहप्रकारः । गजेङ्गितमदकरणम् । एतदाध्यायो दशमः । वाजिचेष्टाच ॥ अश्वाङ्गिताध्याय एकादशः चक्रविधिः खड्गलक्षणाध्यायो द्वादशः । प्रस्थानं प्रास्थानिकाध्यायस्त्रयोदशः । शाकुनकम् शाकुनिकाध्यायश्चतुर्दशः । उत्साहपुरनिवेशौ चेति प्रोत्साहनाध्यायः पञ्चदशः । गृहप्रवेशः । अध्यायसंग्रह एतदुपसंहाराध्यायः षोडशः । अयं कथित विषयः समासतश्चात्र संक्षेपतश्चात्र योगयात्रायां निर्दिष्टः कथितो मयेति शिवम् ॥ समासत इति पदेनेयं लघुयोगयात्रा यथा लघुजातक इति । अनेन बृहज्जातकवद्बृहद्योगयात्राऽन्याऽऽचार्यकृतिरिति स्फुटम् ॥ १८ ॥ समाप्तेयं प्रकाशिका * * *

अनेककोशान् बहुवेदग्रंथानालोच्य सद्विज्ञजनानुमत्या ।
प्रकाशितेयं लघुयोगयात्रा स्वामोददाऽऽचारवतां नृपाणाम् । १ ।

इति श्रीहरिनन्दनकृतायां योगयात्राप्रकाशिकाटीकाया-
मुपसंहाराध्यायः षोडशः ॥ १६ ॥

अथ समासतष्टीकाकर्तृदेशवंशवर्णनम्

अभूदवनिमण्डले निगमशास्त्रतत्त्वार्थवित्पुरा जनविधित्वतो जनक एव यो भूपतिः । तदीयभुवि भूसुरः सुजनगीतकीर्तिव्रजः सुधाकर इवाम्बुधौ कुलविकासनो भवनः ॥ १ ॥ तदात्मजोऽभूद्भुवि लालमिश्रः सद्धर्मगोप्ता जनलालनेच्छुः । उदारचेता महनीयमूर्तिः श्रीशम्भुमिश्रोऽजनि तस्य सूनुः ॥ २ ॥ श्रीमच्छम्भुसुतोऽथ शम्भुसदृशः श्रीशम्भुपूजाधनो यो राजत्यधुना भवा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निपुरके सद्विज्ञमर्त्यैर्नुतः । सद्विद्यागुणवान्परोपकृतिकृच्छ्रीगोनरो
विश्रुतस्तस्याहं हरिनन्दनो वरसुतश्चक्रेऽत्र टीकां पराम् ॥ ३ ॥
नगलोचननागमही १८२७ प्रमिते शकवर्षगते हरिबोधतिथौ ।
हरिजे दिवसे हरिनन्दनकृद्विवृतेर्विरतिर्मिहिरस्य कृतौ ॥ ४ ॥
मनः प्रमादात्क्वचिदन्यथा चेद्वदन्तु संशोध्य बुधाः सुसन्तः ।
बद्धाञ्जलेः श्रीहरिनन्दनस्य निवेदनं तत्पदपङ्कजाग्रे ॥५॥

* इति *

पुस्तकप्राप्तिस्थानम्

ज्यौतिषाचार्य पं० श्रीहरिनन्दन मिश्र

चटाईमुहाल रामपाठशाला

शहर—कानपुर

द्वितीयप्राप्तिस्थानम्

पं० श्रीगोनौड़ मिश्र

मौ० भवानीपुर पो० पण्डौल

जिला दरभङ्गा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE